# संस्कृतकलिका

## तृतीयो भागः

### अष्टमश्रेणी



ବିଦ୍ୟାଳୟ ଓ ଗଣଶିକ୍ଷା ବିଭାଗ

ଓଡ଼ିଶା ସରକାର



ମୋ ନାମ:......................................................

ମୋ ବାପାଙ୍କ ନାମ :.............................................

ମୋ ମା'ଙ୍କ ନାମ :...............................................

ମୋ ବିଦ୍ୟାଳୟର ନାମ:.........................................

ମୋ ଶ୍ରେଣୀ ଶିକ୍ଷକ / ଶିକ୍ଷୟିତ୍ରୀଙ୍କ ନାମ :

.....................................................................

ମୋ ଗାଁ / ସାହିର ନାମ : ...................................



DRAFT

# संस्कृतकलिका

## तृतीयो भागः

### अष्टमश्रेणी-संस्कृतपाठ्यपुस्तकम्

DRAFT

विद्यालयः गणशिक्षाविभागःच,
ओड़िशा सर्वकारः

शिक्षक-शिक्षा-निर्देशालयः तथा राज्य- शैक्षिक -
अनुसन्धान -प्रशिक्षण - परिषद् ।
ओड़िशा, भुवनेश्वरम् ।

ओड़िशा विद्यालय शिक्षा
कार्यक्रम प्राधिकरणम्,
भुवनेश्वरम् ।

# संस्कृतकलिका (तृतीयो भागः)

## अष्टमश्रेणी - संस्कृतपाठ्यपुस्तकम्
(परीक्षामूलक-संस्करणम्)


**सम्पादकमण्डली**

ड. कालीप्रसन्न शतपथी
ड. गौतम महारणा
ड. श्री रमाकान्त सा
ड. रवीन्द्रनाथ आचार्यः

**समीक्षका :**

प्रफेसर गोपालकृष्ण दाशः
ड. कालीप्रसन्न शतपथी
पण्डित नृसिंह चरण पण्डा
ड. विपिन विहारी शतपथी

**संयोजिका**
श्रीमती भारती टुड्डु

**मुख्यसंयोजिका**
ड. सविता साहुः



DRAFT



**प्रकाशकः** विद्यालयः गणशिक्षाविभागःच, ओडिशा सर्वकारः

**प्रथमसंस्करणम्** २०२६

**प्रस्तुति** शिक्षक - शिक्षा - निर्देशालयः तथा राज्यशैक्षिक - अनुसन्धान -प्रशिक्षण परिषद्, ओड़िशा, भुवनेश्वरम्

ओडिशा राज्यपाठ्य पुस्तक-प्रणयन-प्रकाशन-संस्था, भुवनेश्वरम्

**मुद्रणम्** पाठ्यपुस्तक-उत्पादन-विक्रयः, भुवनेश्वरम्

# प्रस्तावना

राष्ट्रिय-शिक्षा-नीतिः २०२० भारतीयसांस्कृतिकपरम्परायाः मानविकमूल्यबोधस्य ज्ञानचर्यायाः सभ्यतायाः उपलब्धीनां च आधारेण परिकल्पिता एका आदर्शशिक्षाप्रणाली अस्ति । राष्ट्रियपाठ्य-चर्या-२०२३ रूपरेखा छात्राणां विश्लेषणात्मक-वर्णनात्मक-आख्यानात्मक-सामर्थ्यानामुन्नयनार्थं प्रयासं करोति । फलतः छात्राः आगामि-प्रत्याह्वानानाम् अवसराणां च कृते प्रस्तुताः भविष्यन्ति ।

अस्मिन् स्तरे विविधाः पाठ्यक्रमाः प्रदत्ताः यत्र बहवः विषयाः सम्मिलिताः सन्ति । एतादृशः पाठ्यक्रमः छात्राणां सर्वाङ्गीणविकासाय सहायकः भवेत् । एतादृश्याः परिवर्तनकारि-शिक्षणसंस्कृतेः कृते केचन अनिवार्यनिबन्धाः सन्ति । एषा भूमिका प्रत्यक्षशिक्षणस्य अनुसन्धानस्य जिज्ञासायाः च अवसराणां मध्ये समुचितं सन्तुलनं स्थापयेत् । अन्यासु आवश्यक-परिकल्पनासु कक्षायाः समुचिता व्यवस्था शिक्षकाणां सुष्ठु प्रस्तुतिः च महत्वपूर्णे । एताभ्यां सह शैक्षिकविषयाणां तदन्तर्गतावधारणात्मकतथ्यानां च सम्बन्धस्थापनस्य अत्यावश्यकता वर्तते ।

राज्य-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् छात्रेभ्यः उच्चगुणयुक्तं पाठ्यपुस्तकं प्रदातुं प्रतिबद्धा अस्ति । तत्र प्रमुखाः विषयविशेषज्ञाः शिक्षाशास्त्रविशारदाः शिक्षाविदः अनुभव-शालिनः कार्यरताः शिक्षकाः च सम्मिलिताः भवन्ति, ये पाठ्यपुस्तकानां समुचितं विकासार्थं विविधान् प्रयासान् कुर्वन्ति । अष्टमश्रेणीकृते संस्कृत-पाठ्यपुस्तकम् एकः अत्युत्तमः प्रयासः । संस्कृतकलिका इति नामधेये पुस्तके समाविष्टाः कथाः कविताः श्लोकाः निबन्धाः च सामाजिक-सांस्कृतिक-भौगोलिक-परिवेशादि-प्रतिबिम्बैः परिपूर्णाः सन्ति ये छात्राणाम् आदर्शजीवनयापनार्थं प्रेरणादायकाः भवन्ति । संस्कृतकलिका इति पुस्तके भारतीयज्ञानपरम्परायाः विशालं वैभवं, भारतीयकला-संस्कृतिपरम्परायाः स्मृतिचित्राणि च सम्मिलितानि सन्ति । अस्मिन् पुस्तके नैतिकमूल्यबोधः पारिस्थितिकी संवेदनशीलता लैङ्गिकसमानता वैषयिककौशलादिविषयाः च संयोजिताः येन व्यावहारिकदृष्ट्या एतत् पाठ्यक्रमस्य उद्देश्यं सफलीकरोति । प्रथमतः उपयुक्तसामग्रीचयनमाध्यमेन छात्राणां स्वाभाविकजिज्ञासायाः प्रोत्साहनं द्वितीयतः श्रवण-भाषण-पठन-लेखनादीनां भाषाशिक्षणकौशलानां मूलक्षमतानां च विकासः इति एतयोः पूरणार्थं कार्यकलापाः योग्यताविस्तरादयः सन्निवेशिताः । शब्दावलीज्ञानेन सह व्याकरणस्य सप्रसङ्गशिक्षणम् अर्थपूर्णसन्दर्भस्य बोधे सहायकं भवेत् ।

पुस्तकेऽस्मिन् अतिरिक्तसामग्रीणाम् अन्वेषणार्थं प्रोत्साहनं प्रदतम् । एतदर्थं विद्यालयीय-पुस्तकालयस्य महत्त्वपूर्णभूमिका विद्यते । वस्तुतः छात्राणां मार्गदर्शन-प्रेरणार्थं शिक्षकाणां मातापित्रोः च भूमिका अतीव मूल्यपूर्णा गुरुत्वपूर्णा च । एतत्-पुस्तकनिर्माणे प्रकाशने च सम्मिलिताः सर्वे सज्जनाः विद्वांसः धन्यवादार्हाः । तेभ्यः मदीयाम् आन्तरिकीं कृतज्ञतां च प्रकटयामि । एतत् पुस्तकं सर्वेषां परामर्शाः प्रतिक्रियाः च आगामि-संवत्सरेषु पुस्तकस्य विकासाय उत्साहं वर्द्धयिष्यन्ति ।

(ମନୋଜ କୁମାର ପାଢୀ)
शिक्षक-शिक्षा निर्देशालयः
राज्यशैक्षिकानुसन्धान-प्रशिक्षण परिषद्,
ओडिशा, भुवनेश्वरम्

DRAFT

# ପୁସ୍ତକ ବିଷୟରେ

ସଂସ୍କୃତ ଭାଷା ବିଶ୍ୱର ସର୍ବପ୍ରାଚୀନ ଭାଷା । ବିକାଶଶୀଳ ରାଷ୍ଟ୍ରର ମୂଳଦୁଆ ସେହି ରାଷ୍ଟ୍ରର ସ୍ୱାଭିମାନ ଉପରେ ନିର୍ଭରଶୀଳ । ଭାରତରେ ପ୍ରଚଳିତ ଆଞ୍ଚଳିକ ମାତୃଭାଷା ସହିତ ତାକୁ ପରିପୁଷ୍ଟ କରୁଥିବା ସଂସ୍କୃତ ଭାଷାର ପ୍ରସାର ପ୍ରଚାର ଅପରିହାର୍ଯ୍ୟ । ଭାରତବର୍ଷର ସକଳ ଜ୍ଞାନ ବିଜ୍ଞାନ ଓ ଦର୍ଶନ ସଂସ୍କୃତ ଭାଷାରେ ଲିପିବଦ୍ଧ । ବେଦ, ବେଦାନ୍ତ, ପୁରାଣ, ଧର୍ମଶାସ୍ତ୍ର, ଚିକିତ୍ସାବିଜ୍ଞାନ, ରାଜନୀତି, ଅର୍ଥନୀତି ଓ ଶିଳ୍ପଶାସ୍ତ୍ର ପ୍ରଭୃତି ସମସ୍ତ ବିଷୟର ଗୂଢ଼ ତଥ୍ୟ ସଂସ୍କୃତ ଭାଷାରେ ପ୍ରାଚୀନ ଗ୍ରନ୍ଥମାନଙ୍କରେ ଉଲ୍ଲିଖିତ । ମାନବୀୟ ମୂଲ୍ୟବୋଧର ଭାବନାରେ ସମଗ୍ର ବିଶ୍ୱକୁ କୋଳେଇ ନେବାପାଇଁ ଭାରତବର୍ଷର "ବସୁଧୈବ କୁଟୁମ୍ବକମ୍" ଭାବନା ବିଶ୍ୱପାଇଁ ଶାନ୍ତିର ବାର୍ତ୍ତା ଦିଏ ।

ସଂସ୍କୃତ ଭାଷାର ଉପାଦେୟତାକୁ ଅନୁଭବ କରି ଜାତୀୟ ଶିକ୍ଷାନୀତି-୨୦୨୦ ଆଧାରରେ ବିଦ୍ୟାଳୟ ଶିକ୍ଷାରେ ଛାତ୍ରଛାତ୍ରୀମାନଙ୍କର ସର୍ବାଙ୍ଗୀଣ ବିକାଶ ଉଦ୍ଦେଶ୍ୟରେ ପାଠ୍ୟକ୍ରମ ସ୍ଥିର କରାଯାଇଛି । ଷଷ୍ଠ ଶ୍ରେଣୀଠାରୁ ଆରମ୍ଭ କରି ଅଷ୍ଟମ ଶ୍ରେଣୀ ପର୍ଯ୍ୟନ୍ତ 'ସଂସ୍କୃତ କଳିକା' ନାମରେ ପାଠ୍ୟପୁସ୍ତକ ରାଜ୍ୟ ଶିକ୍ଷକ ଶିକ୍ଷା ନିର୍ଦ୍ଦେଶାଳୟ ଏବଂ ରାଜ୍ୟ ଶିକ୍ଷା ଗବେଷଣା ଓ ପ୍ରଶିକ୍ଷଣ ପରିଷଦ, ଭୁବନେଶ୍ୱରଙ୍କ ତତ୍ତ୍ୱାବଧାନରେ ରାଜ୍ୟର ଅଭିଜ୍ଞ ସଂସ୍କୃତ ବିଦ୍ୱାନ୍‌ମାନଙ୍କୁ ନେଇ ପ୍ରସ୍ତୁତ କରାଯାଇଛି । ଶିକ୍ଷାର୍ଥୀମାନଙ୍କ ମନରେ ଦେଶପ୍ରୀତି, ମାନବୀୟ ମୂଲ୍ୟବୋଧ, ଭାରତୀୟ ଜ୍ଞାନ ବିଜ୍ଞାନ ପରମ୍ପରା ଏବଂ ନୈତିକ ଜ୍ଞାନ ପ୍ରତି ଶ୍ରଦ୍ଧା ଜନ୍ମାଇବା ପାଇଁ ୧୪ ଗୋଟି ବିଷୟ ଚୟନ କରାଯାଇ ପ୍ରତି ପୁସ୍ତକରେ ସ୍ଥାନ ଦିଆଯାଇଛି । ବୈଚାରିକ ସଂସ୍କାର ସହିତ ଦେବନାଗରୀ ଲିପିର ପଠନ ଜ୍ଞାନ ପ୍ରତି ଧ୍ୟାନ ଦେବାପାଇଁ ବିଚାର ରହିଛି । ରାଜ୍ୟର ବିଜ୍ଞ, ଅଭିଜ୍ଞ ଶିକ୍ଷକ ଶିକ୍ଷିକା ଏହି ପୁସ୍ତକ ଅନୁଯାୟୀ ବିଷୟ ପ୍ରବେଶ, ବିଷୟ ପଠନ ଓ ପ୍ରଶ୍ନାବଳୀ ଆଧାରରେ ପରୀକ୍ଷା ନିମନ୍ତେ ଶିକ୍ଷାର୍ଥୀମାନଙ୍କୁ ପ୍ରସ୍ତୁତ କରିବେ । ଏହା ବ୍ୟତୀତ ପ୍ରତ୍ୟେକ ବିଷୟ ଶେଷରେ 'ବୟଂ ଜାନୀମଃ' ଶୀର୍ଷକରେ ଶିକ୍ଷାର୍ଥୀମାନଙ୍କର ଅଧିକ ଜ୍ଞାନ ପାଇଁ ଯେଉଁ ବିଷୟଗୁଡ଼ିକୁ ଦିଆଯାଇଛି, ସେଗୁଡ଼ିକ କର୍ମଶାଳା ମାଧ୍ୟମରେ ଅଭ୍ୟାସ କରାଇବେ ।

ମାତୃଭାଷା ସହିତ ସରଳ ସଂସ୍କୃତରେ କଥାବାର୍ତ୍ତା କରିବା, ଗୀତ ମାଧ୍ୟମରେ ସଂସ୍କୃତ ପ୍ରତି ରୁଚି ଉତ୍ପନ୍ନ କରାଇବା, ନୈତିକତା ଓ ଆଧ୍ୟାତ୍ମିକତା ଗୁଣର ବିକାଶ ନିମନ୍ତେ ଶିକ୍ଷକ-ଶିକ୍ଷୟିତ୍ରୀ ତଥା ଅଭିଭାବକ ବିଶେଷ ଧ୍ୟାନ ଦେବେ ।

ଆବଶ୍ୟକ ସାମଗ୍ରୀର ଯଥାର୍ଥ ବ୍ୟବହାର, ଶିକ୍ଷାର୍ଥୀମାନଙ୍କର ଜିଜ୍ଞାସା ସମାଧାନ ଓ ପ୍ରାୟୋଗିକ ଦକ୍ଷତାର ବିକାଶ ହେତୁ ଶିକ୍ଷକ ବନ୍ଧୁମାନେ ଦୃଶ୍ୟ-ଶ୍ରାବ୍ୟ-ଯାନ୍ତ୍ରିକ-ସାମଗ୍ରୀ ତଥା ଛାତ୍ର ଛାତ୍ରୀମାନଙ୍କର କ୍ରିୟାକଳାପ ମାଧ୍ୟମରେ ସଂସ୍କୃତ ଭାଷାର ପ୍ରଚାର ପାଇଁ ପଥ ସୁଗମ କରିବେ । ପୁସ୍ତକ ରଚନା ଅପେକ୍ଷା ଶିକ୍ଷକ ଶିକ୍ଷିକାଙ୍କ ଯଥାର୍ଥ ପ୍ରଚେଷ୍ଟା ସର୍ବାଧିକ ଗୁରୁତ୍ୱପୂର୍ଣ୍ଣ ।

DRAFT

# शिक्षकान् प्रति

**माननीय शिक्षकबान्धवा: !**

कोमलमतीनां विद्यार्थिनां मध्ये संस्कृतस्य प्रचार:, संस्कृताध्ययनं प्रति आग्रहसृष्टि: नैतिकमूल्यबोधस्य विकास: तथा च मातृभूमिं प्रति तेषां श्रद्धाजागरणम् इत्यादिषु विषयेषु भवादृशां विदुषाम् उत्तरदायित्वम् अस्ति । समाजे स्वजागरणं नागरिक-कर्तव्यानि पर्यावरणसुरक्षां सामाजिकसमरसतां भारतीयपरिवारसङ्कल्पनां च प्रति जनजागरणाय भवतां प्रयत्न: नितरां विधेय: । इदं पुस्तकं केवलं भवतां सहायकमात्रम् । तथापि भवतां पाठ्यदानकर्माणि उत्साहवर्धनाय अभिनवपद्धत्या मनोविज्ञानदृष्ट्या च इयं 'संस्कृत कलिका' सम्पाद्यते । अस्मिन् पुस्तके राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषत्-पक्षत: प्रस्तुना अभ्यासप्रणाली अनुसृता ।

पुस्तकस्य विषय: सूचनात्मक: एव । भवन्त: अभ्यासद्वारा विद्यार्थिनां बुद्धे: विकासं कारयिष्यन्ति । प्रदत्तगीतानां सस्वरगानेन अभिनयेन च विद्यार्थिन: साग्रहं संस्कृताभिमुखा: भविष्यन्ति । रटनाभ्यासं विना प्रयोगाभ्यासेन संस्कृतस्य पाठनाय इयं 'संस्कृत कलिका' अवश्यं सहायिका भविष्यति इति आशा ।

पूर्वसम्पादितं विषयं क्रियाभित्तिकशैल्या सम्पाद्य 'संस्कृतकलिकाया:' इदं संस्करणं प्रस्तुतम् ।

**''जयतु संस्कृतम्, जयतु भारतम्''**

**सम्पादक-समीक्षक-मण्डली**

DRAFT

सत्यमेव जयते

# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः**

**भारतं**

(सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादि, सम्प्रदायनिरपेक्षं,
लोकतन्त्रात्मकं गणराज्यं विधातुम्)
तस्य समस्तान् नागरिकांश्च
सामाजिकम्, आर्थिकं, राजनीतिकं **न्यायं,**
विचारस्य, अभिव्यक्तेः
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां,**
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
(राष्ट्रस्य एकतायाः, अखण्डतायाश्च) सुनिश्चायिकां **बन्धुतां**
वर्धयितुं

कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९ – तमे वर्षे
नवम्बर–मासस्य २६ तमे दिने
(२००६ – तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्,
आत्मार्पितं च कुर्महे ।

१. संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २- अनुभागेन ''सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्'' इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः ।

२. उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन ''राष्ट्रस्य एकतायाः'' इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः ।

DRAFT

# वन्दे संस्कृतमातरम्

पठामि संस्कृतं नित्यम् ।
वदामि संस्कृतं सदा ।।
ध्यायामि संस्कृतं सम्यक् ।
वन्दे संस्कृतमातरम् ।।





संस्कृतस्य प्रसाराय ।
नैजं सर्वं ददाम्यहम् ।।
संस्कृते च सदा भक्तिः ।
वन्दे संस्कृतमातरम् ।।

संस्कृतस्य कृते जीवः ।
संस्कृतस्य कृते मनः ।।
आत्मानम् आहुतं मन्ये ।
वन्दे संस्कृतमातरम् ।।



DRAFT

# ସିଲାବସ୍ ଓ ପାଠ୍ୟପୁସ୍ତକ ସମୀକ୍ଷା ପାଇଁ କୋର୍ କମିଟି

| | | |
|---|---|---|
| ୧. | କମିଶନର ତଥା ଶାସନ ସଚିବ, ବିଦ୍ୟାଳୟ ଓ ଗଣଶିକ୍ଷା ବିଭାଗ | ଅଧ୍ୟକ୍ଷ |
| ୨. | ରାଜ୍ୟ ପ୍ରକଳ୍ପ ନିର୍ଦ୍ଦେଶକ, ଓଡ଼ିଶା ବିଦ୍ୟାଳୟ ଶିକ୍ଷା କାର୍ଯ୍ୟକ୍ରମ ପ୍ରାଧିକରଣ | ସଦସ୍ୟ |
| ୩. | ନିର୍ଦ୍ଦେଶକ, ଉଚ୍ଚ ମାଧ୍ୟମିକ ଶିକ୍ଷା | ସଦସ୍ୟ |
| ୪. | ନିର୍ଦ୍ଦେଶକ, ମାଧ୍ୟମିକ ଶିକ୍ଷା | ସଦସ୍ୟ |
| ୫. | ନିର୍ଦ୍ଦେଶକ, ପ୍ରାଥମିକ ଶିକ୍ଷା | ସଦସ୍ୟ |
| ୬. | ସଭାପତି, ମାଧ୍ୟମିକ ଶିକ୍ଷା ପରିଷଦ | ସଦସ୍ୟ |
| ୭. | ଅଧ୍ୟକ୍ଷ, ଉଚ୍ଚ ମାଧ୍ୟମିକ ଶିକ୍ଷା ପରିଷଦ | ସଦସ୍ୟ |
| ୮. | ନିର୍ଦ୍ଦେଶକ, ପାଠ୍ୟ ପୁସ୍ତକ ଉତ୍ପାଦନ ଓ ବିକ୍ରୟ ନିର୍ଦ୍ଦେଶାଳୟ | ସଦସ୍ୟ |
| ୯. | ନିର୍ଦ୍ଦେଶକ, ବୈଷୟିକ ଶିକ୍ଷା ଓ ପ୍ରଶିକ୍ଷଣ ନିର୍ଦ୍ଦେଶାଳୟ | ସଦସ୍ୟ |
| ୧୦. | ନିର୍ଦ୍ଦେଶକ, ଓଡ଼ିଆ ଭାଷା ପ୍ରତିଷ୍ଠାନ | ସଦସ୍ୟ |
| ୧୧. | ନିର୍ଦ୍ଦେଶକ, ସମାଜ କଲ୍ୟାଣ, ମହିଳା ଓ ଶିଶୁ ବିକାଶ ବିଭାଗ, ଓଡ଼ିଶା | ସଦସ୍ୟ |
| ୧୨. | ଏନ୍ ସି ଇ ଆର ଟି ପ୍ରତିନିଧି | ସଦସ୍ୟ |
| ୧୩. | ଅଧ୍ୟକ୍ଷ, ଆଞ୍ଚଳିକ ଶିକ୍ଷା ପ୍ରତିଷ୍ଠାନ, ଭୁବନେଶ୍ୱର | ସଦସ୍ୟ |
| ୧୪. | ପ୍ରଫେସର ନିତ୍ୟାନନ୍ଦ ପ୍ରଧାନ, ଅବସରପ୍ରାପ୍ତ ଅଧ୍ୟକ୍ଷ, ଆଞ୍ଚଳିକ ଶିକ୍ଷା ପ୍ରତିଷ୍ଠାନ, ଭୋପାଳ ଏବଂ ଅଧ୍ୟକ୍ଷ, ଓ ସି ଏଫ, ଓଡ଼ିଶା | ସଦସ୍ୟ |
| ୧୫. | ଡକ୍ଟର ଗୋପାଳ ପ୍ରସାଦ ମହାପାତ୍ର, ଅବସରପ୍ରାପ୍ତ ପ୍ରାଧ୍ୟାପକ, ସଂସ୍କୃତ ବିଭାଗ | ସଦସ୍ୟ |
| ୧୬. | ଡକ୍ଟର କିଶୋର ଚନ୍ଦ୍ର ମହାନ୍ତି, ଅବସରପ୍ରାପ୍ତ ଶିକ୍ଷାବିତ୍ (ବିଜ୍ଞାନ) | ସଦସ୍ୟ |
| ୧୭. | ଡକ୍ଟର ବିନୟ ପଟ୍ଟନାୟକ, ମୁଖ୍ୟ ପରାମର୍ଶଦାତା, ଏନ ଏସ୍ ଟି ସି କାର୍ଯ୍ୟକ୍ରମ, ଏନ୍ ସି ଇ ଆର ଟି | ସଦସ୍ୟ |
| ୧୮. | ଡକ୍ଟର ସୁଶାନ୍ତ କୁମାର ଦାସ, ପୂର୍ବତନ ସଭାପତି, ମାଧ୍ୟମିକ ଶିକ୍ଷା ପରିଷଦ, ଓଡ଼ିଶା | ସଦସ୍ୟ |
| ୧୯. | ଡକ୍ଟର ଲଳିତ କୁମାର ଲେଙ୍କା, ଅବସରପ୍ରାପ୍ତ ପ୍ରାଧ୍ୟାପକ, ଓଡ଼ିଆ ବିଭାଗ, ଏକାମ୍ର କଲେଜ, ଭୁବନେଶ୍ୱର | ସଦସ୍ୟ |
| ୨୦. | ଡକ୍ଟର ସରୋଜଲକ୍ଷ୍ମୀ ସିଂ, ଅଧ୍ୟକ୍ଷ, ରମାଦେବୀ ଉଚ୍ଚ ମାଧ୍ୟମିକ ବିଦ୍ୟାଳୟ, ଭୁବନେଶ୍ୱର | ସଦସ୍ୟ |
| ୨୧. | ଡକ୍ଟର ଖଗେଶ୍ୱର ଦାସ, ଇଂରାଜୀ ବିଶେଷଜ୍ଞ, ଅଧ୍ୟକ୍ଷ, ପଦ୍ମପୁର କଲେଜ, ବରଗଡ଼ | ସଦସ୍ୟ |
| ୨୨. | ଡକ୍ଟର ବଳରାମ ସାହୁ, ପ୍ରଫେସର ମାଇକ୍ରୋବାୟୋଲୋଜି, ସୋଆ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ଓଡ଼ିଶା କୃଷି ଓ ବୈଷୟିକ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ଭୁବନେଶ୍ୱର | ସଦସ୍ୟ |
| ୨୩. | ଡକ୍ଟର ଗୌରାଙ୍ଗ ମହାନ୍ତି, ପଦାର୍ଥ ବିଜ୍ଞାନ ବିଶେଷଜ୍ଞ, ଅବସରପ୍ରାପ୍ତ ଅଧ୍ୟକ୍ଷ, ଖଲ୍ଲିକୋଟ ସ୍ୱୟଂଶାସିତ ମହାବିଦ୍ୟାଳୟ, ବ୍ରହ୍ମପୁର, ଗଞ୍ଜାମ | ସଦସ୍ୟ |
| ୨୪. | ନିର୍ଦ୍ଦେଶକ, ଶିକ୍ଷକ ଶିକ୍ଷା ନିର୍ଦ୍ଦେଶାଳୟ ଏବଂ ରାଜ୍ୟ ଶିକ୍ଷା ଗବେଷଣା ଓ ପ୍ରଶିକ୍ଷଣ ପରିଷଦ, ଓଡ଼ିଶା | ସଦସ୍ୟ ସଚିବ |

DRAFT

# राष्ट्र - गीतम्

वन्दे मातरं, वन्दे मातरम् ।
सुजलां सुफलां मलयज - शीतलाम्
शस्य - श्यामलां मातरम्,
वन्दे मातरम् ।।
शुभ्र - ज्योत्स्ना - पुलकित - यामिनीम्
फुल्ल - कुसुमित - द्रुमदल - शोभिनीम्
सुहासिनीं सुमधुर - भाषिणीम्
सुखदां वरदां मातरम्,
वन्दे मातरं, वन्दे मातरम् ।।

'वन्दे मातरम् इति गीतं बङ्किमचन्द्र चट्टोपाध्यायमहोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत - भाषायां गुम्फितम् अस्ति । इदं गीतं स्वातन्त्र्य - संग्रामे भारतवासिनां नितरां प्रेरणाप्रदम् आसीत् । २४. ०१. १९५० इति दिनाङ्के भारतस्य राष्ट्रपतिः डाँ राजेन्द्र प्रसादः संविधान - सभायाम् एवम् उद्घोषितवान् - ''वन्दे मातरम् यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने एकाम् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र- गानेन, 'जन - गण - मन इत्यनेन सह समानरूपेण भविष्यति, समानं च महत्त्वं धारयिष्यति ।''

DRAFT

# सरस्वतीप्रार्थना

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता ।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना । ।।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।। १ ।।

शुक्लां ब्रह्मविचार – सार – परमामाद्यां जगद्व्यापिनीम् ।
वीणा – पुस्तक – धारिणीमभयदां जाड्यान्धकारापहाम् ।।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम् ।
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।। २ ।।

सरस्वति महामाये ! विद्ये ! कमललोचने !
विश्वरूपे ! विशालाक्षि ! विद्यां देहि नमोऽस्तु ते ।। ३ ।।



DRAFT



# पाठानुक्रमणिका


प्रस्तावना

भूमिका

शिक्षकान् प्रति

वन्दे संस्कृतमातरम्


## षाण्मासिकपरीक्षापर्यन्तम्


| | | | | |
|---|---|---|---|---|
| १. | प्रथम: पाठ: | – | भेदभावो न कर्तव्य: | १ |
| २. | द्वितीय पाठ: | – | य: क्रियावान् स: पण्डित: | १० |
| ३. | तृतीय: पाठ: | – | कोऽरुक् ? कोऽरुक् ? कोऽरुक् ? | १६ |
| ४. | चतुर्थ: पाठ: | – | सङ्गच्छध्वं संवदध्वम् (पद्यम्) | २९ |
| ५. | पञ्चम: पाठ: | – | उत्कलमणि: गोपबन्धु: | ३९ |
| ६. | षष्ठ: पाठ: | – | वीराङ्गना शुकदेवी | ५३ |
| ७. | सप्तम पाठ: | – | गीता सुगीता कर्त्तव्या (पद्यम्) | ६० |


## वार्षिकपरीक्षापर्यन्तम्


| | | | | |
|---|---|---|---|---|
| ८. | अष्टम: पाठ: | – | कुष्माण्डभोजनालय: (नाटकम्) | ७३ |
| ९. | नवम: पाठ: | – | डिजि–भारतम् | ८५ |
| १०. | दशम: पाठ: | – | सुभाषितरसा: (पद्यम्) | ९९ |
| | | – | भक्तकवि: जयदेव: | ११४ |
| ११. | एकादश: पाठ: | – | प्रियं मे भारतवर्षम् | ११५ |
| | | | पञ्च आह्वानानि (पद्यम्) | १२३ |
| १२. | द्वादश: पाठ: | – | नववर्ष शुभमस्तु | १२४ |
| १३. | त्रयोदश: पाठ: | – | पितामहस्य पत्रम् | १३५ |
| १४. | चतुर्दश: पाठ: | – | भारतगीतिका (पद्यम्) | १४३ |
| | | – | मम माता देवता | १५२ |
| | | – | राष्ट्र वन्दनम् | १५४ |
| | | – | अङ्क विभागम् | १५५ |
| | | – | आदर्शप्रश्नपत्रम् (षाण्मासिकम्) | १५६ |
| | | – | आदर्शप्रश्नपत्रम् (वार्षिकम्) | १६० |


DRAFT

# नैव क्लिष्टा न च कठिना

सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया ।
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना ।। नैव क्लिष्टा...
कविकोकिलवाल्मीकि विरचिता
रामायण–रमणीय–कथा ।
अतीव सरला मधुर–मञ्जुला
नैव क्लिष्टा न च कठिना ।। सुरस ...
व्यास–विरचिता गणेश–लिखिता
महाभारत–पुण्यकथा ।
कौरव–पाण्डवसङ्गरमथिता
नैव क्लिष्टा न च कठिना ।। सुरस...
कुरुक्षेत्रसमराङ्गणगीता
विश्ववन्दिता भगवद्गीता
अमृतमधुरा–कर्मदीपिका
नैव क्लिष्टा च कठिना ।। सुरस ...
कविकुलगुरुनवरसोन्मेषजा
ऋतु–रघु–कुमारकविता ।
विक्रम–शाकुन्तल–मालविका
नैव क्लिष्टा न च कठिना ।। सुरस ...

हृदयस्य परिचयः कर्मणा लभ्यते न तु वचसा ।

DRAFT

## प्रथमः पाठः
# भेदभावो न कर्तव्यः

पितामही आसन्दे उपविशति । तस्याः पुरतः बालाः आगत्य उक्तवन्तः - पितामहि अद्य भवति कथं मौनेन तिष्ठति ? किमपि कथयतु । येन वयं प्रेरिताः तथा सामाजिककार्येषु लग्नाः भविष्यामः ।

पितामही आसन्दे उद्ग्रीवा सती उक्तवती- कथयामि कथयामि । शृण्वन्तु सर्वे । अस्माकं पुरतः विद्यते- सामाजिकतां, स्वच्छतां, समरसतां, समानतां, परम्परां च अधिकृत्य रमणीयः विषयः ''भेदभावो न कर्तव्यः'' इति ।



समाजे विभिन्नदृष्ट्या भेदभावः लक्ष्यते । मनुष्यः सामाजिकः प्राणी । सर्वे मनुष्याः राष्ट्रे ग्रामे समाजे परिवारे च तिष्ठन्ति । अहमिकया स्वं प्राधान्यं दर्शयन्ति । मानवानां मध्ये एकत्वम् आवश्यकम् । तदर्थं बलरामदासस्य लक्ष्मीपुराणम् उपादेयो ग्रन्थः । उत्कलीयसाहित्ये बलरामदासः योगसिद्धः प्रसिद्धः कविः । पुरीमण्डलस्य गोपसमीपे एरबङ्गग्रामे तस्य निवासः । तत्कालस्य प्रसिद्धाः अन्ये कवयः यथा- जगन्नाथदासः, अच्युतानन्ददासः, यशोवन्तदासः, शिशु-अनन्तदासः च । एतेषु कविषु बलरामदासः समाजसंस्कारकः बहुजनप्रियः ।

बलरामदासरचितं लक्ष्मीपुराणं स्वतन्त्रं स्थानमधिकरोति । ओड़िआभाषायां लिखितं लक्ष्मीपुराणम् उत्कलीयसमाजे पारिवारिकजीवनम् अस्पृश्यतानिवारणं स्वच्छतापालनं नारीसम्मानं शान्तिपूर्णसहावस्थानं समाजसंस्कारं तथा कर्त्तव्याकर्त्तव्यविषयकं तथ्यं प्रकाशयति । लक्ष्मीपुराणवर्णनानुसारं देवी लक्ष्मीः श्रीजगन्नाथस्य पत्नी । सा पुरीस्थिते श्रीमन्दिरे निवसति । श्रीमन्दिरे श्रीजगन्नाथः, तस्य अग्रजः श्रीबलभद्रः, अनुजा श्रीसुभद्रा अन्ये देवाः देव्यश्च पूज्यन्ते । लक्ष्मीः स्वयं सर्वेषां कृते महाप्रसादं पचति इति विश्वासः । लक्ष्मीः मार्गशीर्षमासे प्रतिगुरुवासरं प्रत्यूषकाले नगरभ्रमणार्थं गच्छति । सा प्रतिगृहं भ्रमति । बहूनां जनानां गृहाणि पिहितानि केषाञ्चित् उन्मुक्तानि च दृष्ट्वा लक्ष्मीः दुःखिता भवति । स्पृश्यास्पृश्यवर्णनिर्विशेषं सा प्रत्येकं गृहं याति । यदा परिष्कृतं स्वच्छपरिवेशं सम्मार्जितम् अङ्गनं पश्यति तदा आनन्दिता भवति । कदाचित् लक्ष्मीः तदानीन्तनसमाजे अवहेलितायाः सम्मार्जिकायाः श्रीयायाः गृहमपि गतवती । श्रीया प्रातरुत्थाय स्नानादिनित्यकर्म समापितवती । गृहाङ्गणं गोमयोदकेन लिप्तवती । गृहाङ्गणे मनोहराणि चित्राणि कृतवती । गृहमध्ये सुसज्जितपीठे धान्यैः लक्ष्मीप्रतिमां स्थापितवती । एतत् दृष्ट्वा लक्ष्मीः श्रीयायाः गृहे कञ्चित् कालं यापयति वरं प्रददाति



च । एतत् तथ्यं योगबलेन श्रीबलभद्रः जानाति । सम्मार्जिकायाः गृहं गत्वा लक्ष्मीः अस्पृश्या अपवित्रा भवति, अतः सः कुपितः सन् श्रीमन्दिरे लक्ष्म्याः प्रवेशं वारयति । अस्पृश्यगृहं गत्वा लक्ष्मीः मन्दिरस्य परिवेशं गौरवं च नाशयति इति श्रीजगन्नाथं कथयति । श्रीजगन्नाथः अग्रजस्य श्रीबलभद्रस्य आज्ञया लक्ष्मीं श्रीमन्दिरात् बहिष्करोति ।

वस्तुतः पत्न्याः त्यागः अनुचितः । सम्मार्जिकायाः गृहगमनेन कोऽपि अस्पृश्यः न भवति । लक्ष्मीपुराणे बलरामदासः स्पष्टतया बोधयति यत् लक्ष्म्याः परित्यागः एकः अहङ्कारविषयः । लक्ष्मीस्वरूपिणी पत्नी कदापि न परित्यागयोग्या । अभिमानेन लक्ष्मीः यदा श्रीमन्दिरं परित्यज्य सागरतीरे विश्वकर्मणः साहाय्येन स्ववासभवनं निर्माय निवसति तदारभ्य श्रीमन्दिरं श्रीहीनं जातम् । श्रीजगन्नाथः श्रीबलभद्रः च लक्ष्मीहीनौ अनाहारेण पीडितौ । द्वादशवर्षाणि इतस्ततः भ्रमन्तौ कष्टं स्वीकृतवन्तौ । श्रीमन्दिरे महाप्रसादस्य अभावः अभवत् ।

एकदा बुभुक्षया पीडितौ श्रीजगन्नाथः श्रीबलभद्रश्च सागरतीरे लक्ष्मीभवने उपस्थितौ भोजनं च प्रार्थितवन्तौ । लक्ष्म्याः दासी कथितवती- एतत् अस्पृश्यगृहम् । अत्र भोजनग्रहणेन जातिः नष्टा भविष्यति । ततः तौ स्वयमेव रन्धनं कर्त्तुं भोज्यद्रव्याणि आनयताम् । परन्तु बहुचेष्टया अपि पाकपात्रस्य जलं न तप्तम् । अतः क्रोधेन श्रीबलभद्रः पाकपात्रं त्रोटितवान् । ततःपरं क्षुधातुरौ भ्रातरौ तस्मिन् अस्पृश्यगृहे भोजनं कर्त्तुं प्रस्तुतौ । तत्र भोजनात् परं लक्ष्मीहस्तरन्धनमिति ज्ञातवन्तौ । ततः अहङ्कारं विहाय लक्ष्मीं श्रीमन्दिरम् आनेतुम् उक्तवन्तौ । लक्ष्मीरपि श्रीमन्दिरे स्पृश्यास्पृश्यभेदः मास्तु । सर्वे परस्परं भेदं विस्मृत्य एकत्र महाप्रसादं स्वीकुर्वन्तु, प्रतिगुरुवासरं सा पूर्वमिव नगरभ्रमणं करिष्यतीति प्रतिज्ञां कृतवती । श्रीजगन्नाथः लक्ष्म्याः प्रस्तावम् अनुमोदितवान् । ततः श्रीमन्दिरं लक्ष्मीः आगच्छति । कविः



बलरामदास: लोकप्रियकथामाध्यमेन अस्पृश्यतां दूरीकर्तुम् अचेष्टत । कुत्रचित् भेदभाव: न कर्त्तव्य: । स्वच्छता सर्वत्र आदरणीया।। स्वच्छपरिवेशे सुखं सौभाग्यम् आरोग्यं च लक्ष्मी: स्वयं प्रयच्छति । रथयात्रायां स्पृश्यास्पृश्यभेदं त्यक्त्वा सर्वे रथान् आकर्षन्ति । सत्यमुक्तम्-

संकीर्णभेदभावस्तु नास्ति श्रीक्षेत्रमण्डले ।
राजमार्गे च विश्वस्य मानवा : सोदरा : इव ।।
स्वच्छतारक्षणं शौचं प्रतिस्थानं हिताय च ।
स्वच्छता सुखदा नित्यं स्वच्छात् स्वच्छं प्रशस्यते ।।

DRAFT

## अवधेयम्

**शब्दार्था :-**

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| लक्ष्यते | परिलक्षित: भवति | लखित होता है | perceived | ଲକ୍ଷ୍ୟ କରାଯାଏ |
| अहमिकया | अहंकारेण | अहंकार से | by ego | ଅହଙ୍କାରରେ (ନିଜକୁ ନିଜେ ବଡ଼ ବୋଲି କହିବା) |
| तदर्थम् | तस्मै इदम् | उसके लिए | for that | ସେଥିପାଇଁ |
| लिखितम् | लेखनं जातम् | लिखा गया | written | ଲେଖା ହୋଇଥିବା |
| सहावस्थानम् | एकत्र निवास: | एकत्र रहना | coexistence | ଏକତ୍ର ବାସ |
| अनुजा | कनिष्ठभगिनी | छोटी बहन | younger sister | ସାନ ଭଉଣୀ |
| पचति | रन्धनं करोति | पकाती है | cooking / cooks | ରାନ୍ଧନ୍ତି |
| प्रत्यूषकाले | सूर्योदयात् प्राक् | भोर समय में | in early morning | ଭୋର ସମୟରେ |
| सम्मार्जितम् | परिष्कृतम् | परिस्कृत किया गया | cleaned | ସଫାସୁତୁରା |
| अङ्गनम् | प्राङ्गणम् | प्राङ्गण | ground of the house | ଅଗଣା |

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| सम्मार्जिकाया: | मार्जनकारिण्या: महिलाया: | झाड़ूदार महिला का | of the lady sweeper | ଝାଡୁଦାର ମହିଳାର |
| गोमयोदकेन लिप्तवती | गोमयजलेन लेपनं कृतवती | गोबरका पानी से | by the water of cowdung | ଗୋବର ପାଣିରେ ଲିପିଥିଲା |
| चित्राणि | रङ्गोली: इति भाषायाम् | रङ्गोली | colourful painting | ଚିତ୍ର (ଝୋଟି) |
| पीठे | आस्थाने | पीठ में | on the sitting place | ଖଟୁଲିରେ |
| कश्चित् तथ्यम् | सामान्यम् सत्यसम्बलितं तथ्यम् | सत्याश्रित तथ्य | | କିଛି ଖବର (ସମ୍ବାଦ) |
| कुपित: सन् | क्रोधयुक्त: सन् | क्रोधयुक्त | got angry | ରାଗିଯାଇ |
| अग्रजस्य | ज्येष्ठभ्रातु: | बड़े भाई का | of the elder brother | ବଡ଼ଭାଇଙ୍କର |
| आज्ञया | आदेशेन | आदेश से | by command | ଆଦେଶରେ |
| बोधयति | ज्ञापयति | ज्ञापित करता है | make informed | ବୁଝାଇଛନ୍ତି |
| निर्माय | निर्माणं कृत्वा | निर्माण किया | constructed | ନିର୍ମାଣକରି |
| तदारभ्य | तस्मात् कालात् | उस काल से | since that period/time | ସେହିଦିନଠାରୁ |
| बुभुक्षया | क्षुधया | भूख से | by hunger | ଭୋକରେ |
| भोज्यद्रव्याणि | पाकद्रव्याणि | भोजनका सामान | by cooking materials | ରନ୍ଧନଦ୍ରବ୍ୟ |
| तप्तम् | उत्तप्तम् | उत्तप्त | hot | ତାତିଲା |
| त्रोटितवान् | भङ्गं कृतवान् | भङ्ग किया | broke | ଭାଙ୍ଗିଦେଲେ |
| विहाय | त्यक्त्वा | त्याग करके | by discarding | ଛାଡ଼ି |
| विस्मृत्य | विस्मरणं कृत्वा | विस्मरण करके | forgetting | ଭୁଲି |
| एकत्र | एकस्थाने | एकस्थान पर | at one place | ଗୋଟିଏ ସ୍ଥାନରେ |
| आकर्षन्ति | आकर्षणं कुर्वन्ति | आकर्षित करते हैं | attract | ଟାଣନ୍ତି |
| संकीर्णभेदभाव: | लघुभेदभावना | हीन भेदभाव | inferiority complex | ସଂକୀର୍ଣ୍ଣ ଭେଦଭାବନା |
| सोदरा: | भ्रातर: भगिन्य: च | भाई और बहनें | brothers & sisters | ଭାଇ ଓ ଭଉଣୀମାନେ |
| शौचम् | शुद्धता | शुद्धता | cleanliness | ପବିତ୍ରତା |
| हिताय | हितकराय | हित के लिये | for benefit | ହିତକାରୀ |

DRAFT



### सन्धिविच्छेदः -

| | | |
|---|---|---|
| तदर्थम् | = | तत् + अर्थम् |
| स्थानमधिकरोति | = | स्थानम् + अधिकरोति |
| सहावस्थानम् | = | सह + अवस्थानम् |
| कर्त्तव्याकर्त्तव्य | = | कर्त्तव्य + अकर्त्तव्य |
| वर्णनानुसारम् | = | वर्णना + अनुसारम् |
| देव्यश्च | = | देव्यः + च |
| प्रत्यूषकाले | = | प्रति + ऊषकाले |
| केषाञ्चित् | = | केषाम् + चित् |
| स्पृश्यास्पृश्य | = | स्पृश्य + अस्पृश्य |
| गृहमपि | = | गृहम् + अपि |
| प्रातरुत्थाय | = | प्रातः + उत्थाय |
| गोमयोदकेन | = | गोमय + उदकेन |
| कोऽपि | = | कः + अपि |
| कदापि | = | कदा + अपि |

## प्रश्नावली

DRAFT

१. **एकपदेन उत्तरं लिखत–**

(क) मनुष्यः कीदृशः प्राणी ?

(ख) केषां मध्ये एकत्वम् आवश्यकम् ?

(ग) कः योगसिद्धः कविः ?

(घ) लक्ष्मीः केषां कृते महाप्रसादं पचति ?

(ङ) श्रीया केन गृहाङ्गणं लिप्तवती ?

(च) कुत्र संकीर्णभेदभावः नास्ति ?

२. **कोष्ठकतः शुद्धं पदं चित्वा शून्यस्थानं पूरयत–**

(क) ...........श्रीजगन्नाथस्य पत्नी ।

(ख) ............. लक्ष्मीप्रतिमां स्थापितवती ।

(ग) ............श्रीसुभद्रा ।

(घ) ........... बलरामदास: समाजसंस्कारक: ।

(ङ) ............. सुखदा नित्यम् ।

(च) श्रीजगन्नाथ: ........... प्रस्तावम् अनुमोदितवान् ।

(धान्यै:, कविषु, लक्ष्मी:, लक्ष्म्या:, स्वच्छता, अनुजा)

## ३. मातृभाषया अनुवादं कुरुत–

(क) जनानां गृहाणि पिहितानि दृष्ट्वा लक्ष्मी: दु:खिता भवति ।

(ख) श्रीया प्रातरुत्थाय स्नानादिनित्यकर्म समापितवती ।

(ग) द्वादशवर्षाणि इतस्तत: भ्रमन्तौ कष्टं स्वीकृतवन्तौ ।

(घ) क्रोधेन श्रीबलभद्र: पाकपात्रं त्रोटितवान् ।

(ङ) श्राजगन्नाथ: लक्ष्म्या: प्रस्तावम् अनुमोदितवान् ।

(च) विश्वस्य सर्वे मानवा: सोदरा: ।

## ४. स्तम्भमेलनं कुरुत -

| 'क' स्तम्भ: | 'ख' स्तम्भ: |
|---|---|
| पुरीस्थिते | पिहितानि |
| गृहाणि | दु:खिता |
| मनोहराणि | तिष्ठन्ति |
| बहूनां | जनानाम् |
| लक्ष्मी: | श्रीमन्दिरे |
| सर्वे | चित्राणि |

## ५. संस्कृतेन वाक्यानि रचयत-

(क) निवास: (घ) देवा:

(ख) कविषु (ङ) प्रत्येकम्

(ग) तथा (च) एकत्र

## ६. सन्धिविच्छेदं कुरुत ।

(क) भेदभावस्तु (घ) इतस्तत:

(ख) पूर्वमिव (ङ) मास्तु

(ग) कोऽपि (च) प्रातरुत्थाय

## ७. शुद्धम् उत्तरं चिनुत-

(क) कः सामाजिकः प्राणी ?

(i) महापुरुषः, (ii) मनुष्यः, (iii) विद्वान्, (iv) साधुः

(ख) कः योगसिद्धः प्रसिद्धः कविः ?

(i) अच्युतानन्ददासः, (ii) यशोवन्तदासः, (iii) बलरामदासः, (iv) जगन्नाथदासः

(ग) कः योगवलेन तथ्यं जानाति ?

(i) श्रीबलभद्रः, (ii) श्रीजगन्नाथः, (iii) श्रीसुदर्शनः, (iv) श्रीकृष्णः

(घ) कस्याः त्यागः अनुचितः ?

(i) पत्न्याः, (ii) मातृभूमेः, (iii) जनन्याः, (iv) कन्यकायाः

(ङ) जगन्नाथः श्रीबलभद्रश्च कति वर्षाणि कष्टं स्वीकृतवन्तौ ?

(i) दशवर्षाणि, (ii) नववर्षाणि, (iii) त्रयोदशवर्षाणि, (iv) द्वादशवर्षाणि

(च) कौ अस्पृश्यगृहे भोजनं कर्तुं प्रस्तुतौ ?

(i) भ्रातरौ, (ii) पितरौ, (iii) मातुलौ, (iv) दातारौ

## ८. पूर्णवाक्येन उत्तरं लिखत–

(क) लक्ष्मीः कदा नगरभ्रमणार्थं गच्छति ?

(ख) लक्ष्मीः किं दृष्ट्वा दुःखिता भवति ?

(ग) लक्ष्मीः कदा आनन्दिता भवति ?

(घ) योगबलेन श्रीबलभद्रः किं जानाति ?

(ङ) कः केन माध्यमेन अस्पृश्यतां दूरीकर्तुम् अचेष्टत ?

## ९. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।

लक्ष्म्याः कोपेन श्रीजगन्नाथः श्रीबलभद्रश्च कथं कष्टं प्राप्तवन्तौ ?



## वयं जानीम:

१. लक्ष्मीपुराणम् ओड़िआभाषया लिखितं लोकप्रियं साहित्यम् । कवि: बलरामदास: लक्ष्मीपुराणस्य रचयिता । तस्य काल: प्राय: ख्रीष्टाब्द 1472- त: 1556 पर्यन्तम् । गजपते: श्रीप्रतापरुद्रदेवस्य मन्त्रिण: श्रीसोमनाथमहापात्रस्य पुत्र: बलरामदास: । पुरीनिकटे समगरापाट-स्थाने योगसाधक: बलरामदास: साधनां कृतवान् । कुशभद्रानदीतीरे बेगुनिआनिकटे तस्य समाधिमन्दिरं दृश्यते ।

### ପଞ୍ଚସଖାଙ୍କର ବୈଶିଷ୍ଟ୍ୟ

୨. ଅଗମ୍ୟ ଭାବ ଜାଣେ ଯଶୋବନ୍ତ,
ଗାରକଟା ଯନ୍ତ୍ର ଜାଣେ ଅନନ୍ତ ।
ଆଗତ ନାଗତ ଅଚ୍ୟୁତ ଭଣେ,
ବଳରାମ ଦାସ ତତ୍ତ୍ୱ ବଖାଣେ ।
ଭକ୍ତିର ଭାବ ଜାଣେ ଜଗନ୍ନାଥ,
ପଞ୍ଚସଖା ଏ ଓଡ଼ିଶା ମହନ୍ତ ।

### ସନ୍ଥ ଲକ୍ଷଣ (ଅଚ୍ୟୁତାନନ୍ଦ)

୩. ସତ୍ୟ କହିବ ନିତ୍ୟ ତୁଣ୍ଡେ । ଶାନ୍ତିରେ ଥିବ ହୃଦେ ପିଣ୍ଡେ ।।
ଦୟା ଯେ କରିବ ହସ୍ତରେ । କ୍ଷମା କରିବ ଦୋଷୀଠାରେ ।।
ଧର୍ମ କରିବ ଅନ୍ନ ଦେଇ । ଦୁଃଖୀ ଦରିଦ୍ରଙ୍କୁ ଭୁଞ୍ଜାଇ ।।
ଏ ପାଞ୍ଚ ଲକ୍ଷଣ ଯାହାର । ସନ୍ଥ ବୋଲିବା ସେହୁ ନର ।।

४. भेदभावं परित्यज्य जातिधर्मादिहेतुकम् ।
सहावस्थानमेकत्र कर्तव्यं शान्तिकामिभि: ।।
ଜାତି ଧର୍ମ ସମ୍ବନ୍ଧୀୟ ଭେଦଭାବକୁ ତ୍ୟାଗକରି ଶାନ୍ତିକାମୀମାନେ ଏକାଠି ମିଳିମିଶି ରହିବା ଉଚିତ ।

५. कुचेलिनं दन्तमलोपधारिणं बह्वाशिनं निष्ठुरभाषिणं च ।
सूर्योदये चास्तमिते शयानं विमुञ्चति श्रीरपि चक्रपाणिम् ।।
ଯେଉଁ ବ୍ୟକ୍ତି ମଇଳା ଲୁଗା ପିନ୍ଧେ, ଦାନ୍ତ ଘଷେ ନାହିଁ, ବହୁତ ପରିମାଣରେ ଲୋଭରେ ଖାଏ, କର୍କଶ କଥା କହେ, ସୂର୍ଯ୍ୟ ଉଦୟ ସମୟରେ ଓ ଅସ୍ତ ସମୟରେ ଶୋଇରହେ, ସେହି ବ୍ୟକ୍ତି ସ୍ୱୟଂ ଚକ୍ରପାଣି ଭଗବାନ୍ ହୋଇଥିଲେ ମଧ୍ୟ ଲକ୍ଷ୍ମୀ ତାଙ୍କୁ ପରିତ୍ୟାଗ କରନ୍ତି ।

DRAFT

# द्वितीय: पाठ:
# य: क्रियावान् स पण्डित:

(पुष्करिणीकूले उपविश्य ग्रामजनौ मिथ: आलापं कुरुत:)




**माधव:–** अद्य पद्मश्री रघुनाथ पाणिग्राही महोदयस्य जन्मदिनपालनम् अभवत् । तत्र विशालं भित्तिपत्रं लम्बितमासीत् । तत्र लिखितमासीन् 'पण्डित रघुनाथ पाणिग्राही महोदयस्य पुण्य जन्मतिथिरिति ।

**राघव:-** अहमपि तत्र अपश्यम् । किन्तु मम सन्देह: जात: किं रघुनाथ: संस्कृताध्यापक: आसीत् ? अहं तु जानामि यत् स: सर्वान् विषयान् यद्यपि जानाति स्म, परन्तु संस्कृतस्य शिक्षक: नास्ति । कथं स: पण्डित: इति भवति ?

**माधव:-** अहं स्मरामि केवलं संस्कृतं न हि, अपि तु य: यस्मिन् विषये दक्ष: कर्मवीरश्च, तस्मिन् विषये स: पण्डित: उच्यते । एतत् आश्रित्य गौतमबुद्धस्य जीवनचरिते एका रमणीया कथा अस्ति । कथयामि, शृणु–

इन्दुपुरनामक: कश्चन अतिलघुग्राम: आसीत् । तस्य ग्रामस्य निर्धनकृषक: देवीदयाल: बुद्धस्य महान् भक्त: आसीत् । गौतमबुद्ध: ग्रामेग्रामे भ्रमन् उपदिशति स्म । एकदा बुद्धस्य उपदेशं श्रोतुं

देवीदयालः समीपस्थं ग्रामम् अगच्छत् । सः गौतमबुद्धाय स्वग्रामे उपदेशार्थं न्यवेदयत् । गौतमबुद्धः आगामिदिवसे प्रभाते आगन्तुम् अकथयत् ।

देवीदयालः प्रसन्नो भूत्वा स्वग्रामम् आगत्य प्रतिगृहं बुद्धस्य आगमनस्य सूचनाम् अददात् । ग्रामजनाः अपि प्रसन्नाः जाताः । सम्पूर्णग्रामं भ्रमित्वा सः स्वगृहं प्राप्नोत् । सः अपश्यत् यत् तस्य एकः बलीवर्दः अत्यधिकं ज्वरपीड़ितः आसीत् । देवीदयालस्य गृहे तु गृहसदस्यरूपेण केवलं तस्य अतिप्रियौ द्वौ बलीवर्दौ एव आस्ताम् । अतः सः सहसा तं बलीवर्दं नगरपशुचिकित्सालयम् अनयत् । सम्पूर्णायां रात्रौ देवीदयालः बलीवर्दस्य सेवाम् अकरोत् । तस्य ग्रामे प्रातः काले गौतमबुद्धः उपदेशार्थम् आगतः । एकस्य वृक्षस्य अधः उपविश्य स उपादिशत् । सर्वेऽपि ग्रामजनाः देवीदयालस्य निन्दां कृतवन्तः यत् महात्मानं बुद्धम् आहूय देवीदयालः स्वयमेव अदृश्यः अस्ति, तस्य बुद्धवचने आस्था नास्ति, सः निरर्थकं श्रद्धां प्रदर्शयति ।

यदा बुद्धस्य उपदेशः समाप्तः तदा सर्वे दृष्टवन्तः यत् दूरात् देवीदयालः बलीवर्देन सह आगच्छन् अस्ति । देवीदयालः धावन् आगत्य बुद्धस्य चरणौ अस्पृशत् । तस्य अश्रूणि पतन्ति स्म । सः सर्वामपि वार्ताम् अश्रावयत् । तदा प्रसन्नेन बुद्धेन उक्तं यत् सर्वेभ्यः प्राणिभ्यः मनसि दयाभावः भवेत्, कर्मणः प्राधान्यं भवेत् न तु केवलं उपदेशश्रवणे श्रद्धा भवेत् । अपितु तस्य परिपालने इच्छाशक्तिः भवेत् । वस्तुतः भवन्तः सर्वे तु मम वचनानि केवलम् अशृण्वन् किन्तु देवीदयालस्तु तानि अपालयत् । अतः मम एकं वचनं शृण्वन्तु यत् यथा देवीदयालः मम वचनानां क्रियान्वयनम् अकरोत् तथैव भवन्तः सर्वेऽपि कुर्वन्तु इति । अस्माकं ग्रन्थेषु उक्तमपि वर्तते यत्–

''पठकाः पाठकाश्चैव ये चान्ये शास्त्राचिन्तकाः ।
सर्वे व्यसनिनो मूर्खाः यः क्रियावान् स पण्डितः ।''

## अवधेयम्

### शब्दार्था :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| कश्चन | कश्चित् | कोई | some one | କେହି ଜଣେ |
| बलीवर्द: | गौ: (पुं) | बैल | ox | ବଳଦ |
| भ्रमित्वा | भ्रमणं कृत्वा | भ्रमण करके | by travelling | ଭ୍ରମଣକରି |
| अत: | एतदर्थम् | इसलिए | for this | ଏଣୁ |
| आहूय | आह्वानं कृत्वा | आह्वान करके | by invitory | ଆହ୍ୱାନ କରି / ଡାକି |
| निरर्थकम् | अर्थरहितम् | अर्थ रहित | meaningless | ଅର୍ଥହୀନ |
| श्रोतुम् | श्रवणं कर्त्तुम् | श्रवण करने के लिए | for listening | ଶ୍ରବଣ କରିବାକୁ |
| जनेषु | जनानां मध्ये | लोगों के बीच | to among the people | ଲୋକଙ୍କ ମଧ୍ୟରେ |
| पाठका: | विद्यार्थिन: | छात्र | student | ଛାତ୍ରମାନେ |
| धावन् | धावनं कुर्वन् | दौड़कर | by running | ଦୌଡ଼ିଦୌଡ଼ି / ଧାଇଁ ଧାଇଁ |
| क्रियावान् | कर्मनिपुण: | कर्मकुशल | expert | କର୍ମନିପୁଣ |

### सन्धिविच्छेद: -

| | | |
|---|---|---|
| कश्चन | = | क: + चन |
| उपदेशान्ते | = | उपदेश + अन्ते |
| न्यवेदयत् | = | नि + अवेदयत् |
| प्राप्नोत् | = | प्र + आप्नोत् |
| सर्वेऽपि | = | सर्वे + अपि |
| स्वयमेव | = | स्वयम् + एव |
| नास्ति | = | न + अस्ति |
| सर्वामपि | = | सर्वाम् + अपि |
| किन्तु | = | किम् + तु |
| व्यसनिनोमूर्खा: | = | व्यसनिन: + मूर्खा: |
| इतोऽपि | = | इत: + अपि |
| क्रियान्वयनम् | = | क्रिया + अन्वयनम् |
| तथैव | = | तथा + एव |
| उक्तमपि | = | उक्तम् + अपि |
| पाठकाश्चैव | = | पाठका: + च + एव |
| चान्ते | = | च + अन्ते |

DRAFT

## प्रश्नावली

१. **एकपदेन उत्तरं लिखत–**

(क) कः बुद्धस्य भक्तः आसीत् ?

(ख) किं श्रोतुं देवीदयालः अगच्छत् ?

(ग) कः ज्वरपीड़ितः आसीत् ?

(घ) देवीदयालः बलीवर्दं कुत्र अनयत् ?

(ङ) गौतमबुद्धः किमर्थम् आगतः ?

(च) यः क्रियावान् सः कः ?

२. **शून्यस्थानपूरणं कुरुत–**

(क) कश्चन अतिलघुग्रामः .................. । (आसीत्/ आसन्)

(ख) देवीदयालः बलीवर्दस्य ........... अकरोत् । (सेवा / सेवाम्)

(ग) बुद्धस्य उपदेशः ........... । (समाप्तः / समाप्ताः)

(घ) उपदेशश्रवणे ............ भवेत् । (श्रद्धाम् / श्रद्धा)

(ङ) भवन्तः सर्वेऽपि तथैव ............. । (करोतु /कुर्वन्तु)

(च) बुद्धवचने ................ नास्ति । (आस्था / आस्थाम्)

३. **मातृभाषया अनुवादं कुरुत–**

(क) देवीदयालः सूचनाम् अददात् ।

(ख) बलीवर्दः ज्वरपीड़ितः आसीत् ।

(ग) देवीदयालः बुद्धस्य चरणौ अस्पृशत् ।

(घ) तस्य अश्रूणि पतन्ति स्म ।

(ङ) मनसि दयाभावः भवेत् ।

(च) मम एकं वचनं शृण्वन्तु ।

DRAFT

## ४. स्तम्भमेलनं कुरुत -

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| सः | उक्तम् |
| ग्रन्थेषु | सर्वे |
| एकम् | भक्तः |
| भवन्तः | पण्डितः |
| महान् | वचनम् |

## ५. संस्कृतेन वाक्यानि रचयत-

(क) आसीत् (घ) उपदिशति

(ख) सर्वे (ङ) प्रातः

(ग) भवेत् (च) अस्ति

## ६. सन्धिविच्छेदं कुरुत ।

(क) कश्चन (घ) नास्ति

(ख) चान्ये (ङ) सर्वेऽपि

(ग) उक्तमपि (च) तथैव

## ७. शुद्धम् उत्तरं चिनुत-

(क) कः पण्डितः ?

(i) यः धनवान् सः, (ii) यः क्रियावान् सः, (iii) यः गतवान् सः, (iv) यः गुणवान् सः

(ख) सर्वे व्यसनिनः के ?

(i) पण्डिताः, (ii) शिक्षकाः, (iii) कृषकाः, (iv) मूर्खाः

(ग) देवीदयालः कस्य महान् भक्तः ?

(i) बुद्धस्य, (ii) महावीरस्य, (iii) श्रीरामस्य, (iv) श्रीजगन्नाथस्य

(घ) गौतमबुद्धः कदा आगन्तुम् अकथयत् ?

(i) मध्याह्ने, (ii) सायम्, (iii) प्रभाते, (iv) रात्रौ

(ङ) कः ग्रामे ग्रामे भ्रमन् उपदिशति स्म ?

(i) श्रीधरः, (ii) श्रीरामः, (iii) देवीदयालः, (iv) गौतमबुद्धः

(च) कस्य अश्रूणि पतन्ति स्म ?

(i) बलीवर्दस्य, (ii) बुद्धस्य, (iii) देवीदयालस्य, (iv) पण्डितस्य

DRAFT

**८. पूर्णवाक्येन उत्तरं लिखत–**

(क) देवीदयाल: कीदृश: आसीत् ?

(ख) देवीदयाल: गौतमबुद्धं किं न्यवेदयत् ?

(ग) देवीदयाल: किम् अपश्यत् ?

(घ) गौतमबुद्ध: कुत्र उपविश्य उपादिशत् ?

(ङ) देवीदयाल: धावन् आगत्य किम् अकरोत् ?

(च) क: पण्डित: ?

**९. प्रायेण पञ्चाशता (५०) पदै: मातृभाषया उत्तरं लिखत ।**

बुद्धदेवस्य मतेन क: कथं पण्डितपदवाच्य: भवति ?



## वयं जानीम:

**पण्डित:–** 'पण्डा' (शास्त्रोज्ज्वला बुद्धि:) अस्य अस्तीति । 'पण्डित:' इति विद्वान्, विपश्चित्, दोषज्ञ:, सुधी:, कोविद:, बुध:, मनीषी, प्राज्ञ: विचक्षण: इति प्रतिशब्दा: भवन्ति ।

**गीतायामस्ति–**

- विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
  शुनि चैव श्वपाके च पण्डिता: समदर्शिन: ।।
- मातृवत् परदारेषु परद्रव्येषु लोष्ठवत् ।
  आत्मवत् सर्वभूतेषु य: पश्यति स: पण्डित: ।।
- धार्मिक: पण्डितो ज्ञेयो: नास्तिको मूर्ख उच्यते ।
  काम: संसारहेतुश्च हृत्तापो मत्सर: स्मृत: ।।
- यस्य सर्वे समारम्भा: कामसंकल्पवर्जिता: ।
  ज्ञानाग्निदग्धकर्माणं तमाहु: पण्डितं बुधा: ।। (भ.गी.–४/१६)

**परियोजनाकार्यम्–**

गौतमबुद्धस्य जन्मान्तरम् आधारीकृत्य विरचितं ''जातकमाला/जातककथा'' पुस्तकं संगृह्य पठनीयम् ।

विविधविषयेषु दक्षतावन्त: समाजे प्रसिद्धिं गता: जना: पण्डिता: उच्यन्ते । तेभ्य: कतिपयानां नामानि संगृह्य खातिकायां लेखनीयम् ।

DRAFT

## तृतीयः पाठः

# कोऽरुक् ? कोऽरुक् ? कोऽरुक् ?



'भारतवर्षे वैद्याः विभिन्नानां व्याधीनां शमनं कथं कुर्वन्ति' इति ज्ञातुं पुरा भगवान् धन्वन्तरिः मनोहरं शुकरूपं धृत्वा प्रतिग्रामम् अभ्रमत् । भ्रमणकाले सः बहूनां प्रख्यातवैद्यानां भवनपार्श्वस्थे वृक्षे उपविश्य **'कोऽरुक्' 'कोऽरुक्' 'कोऽरुक्'** इति ध्वनिम् अकरोत् । किन्तु खगस्य 'कोऽरुक्' इति शब्दं प्रति कस्यापि अवधानं नासीत् ।



अन्ते सः वैद्यस्य वाग्भटस्य कुटीरसमीपं गतवान् । तत्र विशाले प्राङ्गणे स्थितं पुष्पतरुम् आरुह्य सुमधुरस्वरेण **'कोऽरुक्' 'कोरुक्' 'कोऽरुक्'** इति शब्दम् अकरोत् । मधुरां वाणीं श्रुत्वा चिकित्सानिरतः वाग्भटः प्राङ्गणम् आगत्य सर्वासु दिक्षु अपश्यत् । क्षणात् वाग्भटः मनोहरं तं शुकम् अपश्यत् । सार्थकं मानुषध्वनिं कुर्वन्तं शुकं दृष्ट्वा विस्मितः वाग्भटः चिन्तितवान्- ''नायं लौकिकः खगः । एषः निश्चयेन कश्चन देवविशेषः अस्ति'' । सः झटिति तस्मै विहगाय मधुराणि फलानि समर्पितवान् परन्तु सः खगः फलानि न



गृहीत्वा पुनरपि तथैव 'कोऽरुक्' 'कोऽरुक्' 'कोऽरुक्' इति प्रश्नस्वरेण शब्दमकरोत् । अथ वैद्यः वाग्भटः अचिन्तयत् यत् यावत् खगः स्वप्रश्नानाम् उत्तराणि न प्राप्नोति तावत् अयं भोजनं न वाञ्छति इति । ततः सः अचिरादेव सूत्ररूपाणि त्रीणि उत्तराणि प्राददात्- 'हितभुक्' 'मितभुक्' 'ऋतुभुक्' इति । समुचितम् उत्तरं श्रुत्वा अत्यन्तं प्रीतः सः शुकः वाग्भटेन अर्पितानि फलानि खादितवान् ।

ततः शुकरूपः धन्वन्तरिः वाग्भटम् उक्तवान्- 'वत्स ! अहं धन्वन्तरिः अस्मि । उत्तमस्य वैद्यस्य अन्वेषणाय भारतवर्षे सर्वत्र परिभ्रमन् अत्र समागतः । तव उत्कृष्टेन आयुर्वेदज्ञानेन अहम् अतीव सन्तुष्टः अस्मि । त्वम् अवश्यमेव आयुर्वेद-अष्टाङ्गविचार-सारभूतं तन्त्रं विरचये:" एतद् उक्त्वा सः अन्तर्हितः ।

एतत् सर्वं दूरात् पश्यन्तः विस्मिताः शिष्याः आचार्यवाग्भटस्य समीपम् आगत्य अपृच्छन् – "गुरुवर ! शुकः **'कोऽरुक् कोऽरुक् कोऽरुक्'** इति उक्तवान्, तस्य कोऽर्थः ? अपि च भवान् किम् उत्तरं दत्तवान् ?" तदा वाग्भटः छात्राणां जिज्ञासाम् उपशमयन् कथयति "छात्राः, शृणुत ! एषः शुकः वदति यत् कः अरुक् अर्थात् कः स्वस्थः नीरोगः वा वर्तते ? तदा मया उक्तम् –
'यः हितभुक्, मितभुक्, ऋतुभुक् च, सः एव सर्वदा स्वस्थः भवति' ।" छात्राः पुनः जिज्ञासया अपृच्छन्–
"आचार्य ! 'हितभुक्, मितभुक्, ऋतुभुक्' इति – एतेषां कः आशयः ?" वाग्भटः वदति– "शिष्याः ! महर्षेः चरकस्य नाम भवन्तः जानन्ति । सः हितभुक्-विषये कथयति

तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते ।
अजातानां विकाराणामनुत्पत्तिकरं च यत् ।। १ ।।



DRAFT

अर्थात् यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, न जातानाम् अर्थात् अनुत्पन्नानां विकाराणाम् उत्पत्तिः न भवेत्, तादृशः आहारः सेवनीयः ।

मितभुक्-विषये कथयति आचार्यः–

अल्पादाने गुरूणां च लघूनां चातिसेवने ।
मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे ।। २ ।।

अर्थात् गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि चापि अतिमात्रं सेवनेन हानिकराणि जायन्ते । अतः मात्रानुसारम् एव खादितव्यम् ।

एवमेव ऋतुभुक्-विषये उच्यते–

तस्याशिताद्यादाहारात् बलं वर्णश्च वर्धते ।
तस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयम् ।। ३ ।।



अर्थात् ग्रीष्मः, वर्षाः, शरद्, शिशिरः, हेमन्तः, वसन्तः चेति षट् ऋतवः भवन्ति । यः पुरुषः ऋतूनाम् अनुकूलं स्वास्थ्यप्रदम् आहारसेवनं जानाति तदनुसारम् आचरणं च करोति तस्य जनस्य अशितम् अर्थात् भुक्तं पीतं च सर्वमपि बलवर्धकं, वर्णकान्तिजनकं, सुखवर्धकम्, आयुर्वर्धकञ्च भवति । अतः ऋतोः अनुसारं भोक्तव्यम् इति । नियमितरूपेण समयानुसारं सात्विकं भोजनम् आवश्यकमिति ऋतुभुक्-पदेन ज्ञायते ।"

DRAFT

एतत् सर्वं श्रुत्वा कश्चन छात्रः वाग्भटम् अपृच्छत्– ''आचार्य ! हितभुगादिविषये वयं तु ज्ञातवन्तः, किन्तु किं सः शुकः सन्तुष्टः अभवत्" ? तदा वाग्भटः शुकस्य रहस्यम् उक्तवान् – ''प्रियशिष्याः ! अयं विहगः न सामान्यविहगः, अपि तु आयुर्वेदस्य पूज्यः देवः भगवान् धन्वन्तरिः । स एव स्वयं शुकरूपेण अत्र आगच्छत् । अस्माकं कृते संक्षेपेण स्वास्थ्यरक्षणाय सूत्ररूपेण सन्देशं च प्रदत्तवान्, भवन्तः अपि शृण्वन्तु स्मरन्तु च–

**व्यायामः प्रातरुत्थाय, नित्यं दन्तविशोधनम् ।**
**स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम् ।। ४ ।।**

अस्माकम् ऋषयः नित्यं प्रार्थनाम् अपि कुर्वन्ति । वयमपि स्मरामः–

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।। ५ ।।"**

DRAFT

## अवधेयम्



**शब्दार्थाः-**

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| निरामयाः | नीरोगाः | स्वस्थ | Healthy | ସୁସ୍ଥ |
| अरुक् | स्वस्थः | नीरोग | One who is not sick | ନୀରୋଗ |
| झटिति | शीघ्रमेव | शीघ्र | Quickly | ଶୀଘ୍ର |
| हितभुक् | यः हितकरं खादति | हितकारक खाने वाला | One who eats nutritious food | ହିତକର ଖାଦ୍ୟ ଖାଉଥିବା ଲୋକ |
| मितभुक् | यः आवश्यक-मात्रा अनुसारं भोजनं खादति | सीमित मात्रा में भोजन कर ने वाला | One who eats food in limited quantity | ମାତ୍ରାନୁସାରେ ଖାଦ୍ୟ ଖାଉଥିବା ଲୋକ |
| ऋतुभुक् | यः ऋत्वनुकूलं पथ्यं भोजनं करोति | ऋतुके अनुसार उपयुक्त भोजन करने वाला | One who eats food which is appropriate as per season | ଋତୁ ଅନୁକୂଳ ଖାଦ୍ୟ ଖାଉଥିବା ଲୋକ |

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| प्रयुञ्जीत | प्रयोगं कुर्यात् | प्रयोग करे | Should take | ପ୍ରୟୋଗ କରିବା ଉଚିତ |
| अनुवर्तते | अनुसरति | अनुसरण करता है | Follows | ଅନୁସରଣ କରେ |
| अजातानाम् | न उत्पन्नानाम् | जो पैदा नहीं हुए उनको | Of those who are not born | ଜନ୍ମ ହୋଇ ନଥିବା |
| अनुत्पत्तिकरम् | यत् (विकारान्) न उत्पादयति | जो (विकारों) को उत्पन्न न करे | That which may not cause (harm) | ବିକାର ରହିତ |
| लघूनाम् | सुपाच्यानाम् | सुपाच्य खाद्यों का | Of digestible food | ଶୀଘ୍ର ହଜମ ହେଉଥିବା |
| उद्दिष्टम् | उल्लिखितम् | बताया गया है | Which has been instructed | କୁହାଯାଇଛି |
| गरिष्ठम् | यत् कठिनतया पच्यते | जो कठिनता से पचे | Difficult to digest | ଗୁରୁପାଚ୍ୟ |
| अतिमात्रम् | मात्रायाः आधिक्यम् | अत्यधिक मात्रा से | In excessive quantity | ଅତ୍ୟଧିକ ମାତ୍ରାରେ |
| अशिताद्यात् | भुक्तात् | खाए हुए से | From eaten food | ଖିଆଯାଇଥିବା |
| व्यपाश्रयम् | आश्रयस्थानम् | अवलम्ब | Depending | ଆଶ୍ରୟ |
| वर्णकान्तिजनकम् | वर्णस्य सौन्दर्यस्य च उत्पादकम् | रूप रंग निखारने वाला | That which enhances the complexion beauty and | ସୌନ୍ଦର୍ଯ୍ୟ ବର୍ଦ୍ଧକ |
| बुभुक्षायाम् | क्षुधायाम् | भूख लगने पर | On feeling hungry | ଭୋକରେ |

**सन्धिविच्छेदः -**

१. कोऽरुक् = कः + अरुक्
२. अत्युष्णम् = अति + उष्णम्
३. मनोहरम् = मनः + हरम्
४. कस्यापि = कस्य + अपि
५. तथैव = तथा + एव
६. शब्दमकरोत् = शब्दम् + अकरोत्
७. अचिरादेव = अचिरात् + एव
८. अवश्यमेव = अवश्यम् + एव
९. कोऽर्थः = कः + अर्थः

DRAFT

| | | |
|---|---|---|
| १०. तच्च | = | तत्+च |
| ११. येनानुवर्त्तते | = | येन+अनुवर्त्तते |
| १२. विकाराणामनुत्पत्तिकरम् | = | विकाराणाम्+अनुत्पत्तिकरम् |
| १३. मात्राकारणमुद्दिष्टम् | = | मात्राकारणम्+उद्दिष्टम् |
| १४. मात्रानुसारम् | = | मात्रा+अनुसारम् |
| १५. एवमेव | = | एवम्+एव |
| १६. चातिसेवने | = | च+अतिसेवने |
| १७. तस्याशिताद्यादाहारात् | = | तस्य+अशित+आद्यात्+आहारात् |
| १८. वर्णश्च | = | वर्णः+च |
| १९. तस्यर्तुसात्म्यम् | = | तस्य+ऋतु+स+आत्म्यम् |
| २०. हितभुगादिविषये | = | हितभुक्+आदिविषये |
| २१. प्रातरुत्थाय | = | प्रातः+उत्थाय |
| २२. बुभुक्षायाञ्च | = | बुभुक्षायाम्+च |
| २३. दुःखभाग्भवेत् | = | दुःखभाक्+भवेत् |

## प्रश्नावली

१. एकपदेन उत्तरं लिखत –

(क) शुकरूपं कः धृतवान् ?

(ख) धन्वन्तरिः (शुकः) कुत्र उपविश्य ध्वनिम् अकरोत् ?

(ग) अन्ते शुकः कस्य आश्रमस्य समीपं गतवान् ?

(घ) ऋतवः कति सन्ति ?

(ङ) वाग्भटः शुकस्य रहस्यं केभ्यः उक्तवान् ?

(च) कीदृशजलेन स्नानं कर्त्तव्यम् ?

२. कोष्ठकत:शुद्धं पदं चित्वा शून्यस्थानं पूरयत –

(ऋतो:, चरकस्य, कुटीरसमीपं, भारतवर्षे, आयुर्वेदज्ञानेन, अतिमात्रं)

(क) ..................... वैद्या: विभिन्नानां व्याधीनां शमनं कथं कुर्वन्ति ?

(ख) अन्ते स: वैद्यस्य वाग्भटस्य ........................ गतवान् ।

(ग) तव उत्कृष्टेन ........................ अहम् अतीव सन्तुष्ट: अस्मि ।

(घ) महर्षे: ........................ नाम भवन्त: श्रुतवन्त: स्यु: ।

(ङ) लघुद्रव्याणि ........................ सेवनेन हानिकराणि जायन्ते ।

(च) .................. अनुसारं भोक्तव्यम् ।

३. पूर्णवाक्येन उत्तरं लिखत–

(क) मधुरां वाणीं श्रुत्वा चिकित्सानिरत: वाग्भट: किम् अकरोत् ?

(ख) वाग्भट: झटिति किम् अकरोत् ?

(ग) छात्रा: पुन: जिज्ञासया आचार्यं किम् अपृच्छन् ?

(घ) के षट् ऋतव: भवन्ति ?

(ङ) भगवान् धन्वन्तरि: अस्माकं कृते संक्षेपेण किं प्रदत्तवान् ?

(च) ऋषय: नित्यं कां प्रार्थनां कुर्वन्ति ?

४. मातृभाषया अनुवादं कुरुत–

(क) अन्ते स: वैद्यस्य वाग्भटस्य कुटीरसमीपं गतवान् ।

(ख) एष: निश्चयेन कश्चन देवविशेष: अस्ति ।

(ग) वत्स ! अहं धन्वन्तरि: अस्मि ।

(घ) महर्षे: चरकस्य नाम भवन्त: जानन्ति ।

(ङ) स: एव स्वयं शुकरूपेण अत्रागच्छत् ।

(च) मा कश्चित् दु:खभाग्भवेत् ।

DRAFT

## ५. स्तम्भमेलनं कुरुत –

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| विभिन्नानाम् | ऋतवः |
| षट् | फलानि |
| शुकः | व्याधीनाम् |
| मधुराणि | जिज्ञासा |
| छात्राणाम् | धन्वन्तरिः |

## ६. संस्कृतभाषया वाक्यानि रचयत –

(क) इति (घ) चिन्तितवान्

(ख) झटिति (ङ) पुनरपि

(ग) नाम (च) अपि

## ७. सन्धिं कुरुत–

(क) कस्य + अपि (घ) न + आसीत्

(ख) तथा + एव (ङ) कः + अर्थः

(ग) प्रातः + उत्थाय (च) वयम् + अपि

## ८. शुद्धम् उत्तरं चिनुत –

(क) भगवान् धन्वन्तरिः कस्य रूपं धृतवान् ?

(i) बकस्य, (ii) शुकस्य, (iii) काकस्य, (iv) मयूरस्य

(ख) शुकः कीदृशं ध्वनिम् अकरोत् ?

(i) मानुषध्वनिम्, (ii) रासभध्वनिम्, (iii) व्याघ्रध्वनिम्, (iv) पिकध्वनिम्

(ग) वाग्भटः सूत्ररूपाणि कति उत्तराणि अददात् ?

(i) त्रीणि, (ii) चत्वारि, (iii) पञ्च, (iv) षट्

(घ) आयुर्वेदस्य पूज्यः देवः कः ?

(i) कालिदासः, (ii) क्षपणकः, (iii) धन्वन्तरिः, (iv) पाणिनिः

(ङ) कदा व्यायाम: कर्त्तव्य: ?

(i) रात्रिकाले, (ii) भोजनकाले, (iii) मध्याह्ने, (iv) प्रात:उत्थाय

(च) नित्यं किं कर्त्तव्यम् ?

(i) दन्तविशोधनम्, (ii) शयनम्, (iii) रोदनम्, (iv) धावनम्

९. **प्रायेण पञ्चाशता (५०) पदै: मातृभाषया उत्तरं लिखत ।**

वाग्भटस्य मतेन क: अरुक् भवति ?



## वयं जानीमः

**(क) श्लोकानां पदच्छेद: अन्वय: च–**

**तच्च नित्यं प्रयुञ्जीत, स्वास्थ्यं येनानुवर्तते ।**
**अजातानां विकाराणामनुत्पत्तिकरं च यत् ।। १ ।।**

**पदच्छेद:–** तत् च नित्यम् प्रयुञ्जीत स्वास्थ्यम् येन अनुवर्तते, अजातानाम् विकाराणाम् अनुत्पत्तिकरम् च यत् ।

**अन्वय:–** अजातानां विकाराणां च यत् अनुत्पत्तिकरं, येन स्वास्थ्यम् अनुवर्तते च तत् नित्यं प्रयुञ्जीत ।

**भावार्थ:–** अर्थात् यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, न जातानाम् अर्थात् अनुत्पन्नानां विकाराणाम् उत्पत्ति: न भवेत्, तादृश: आहार: सेवनीय: ।

**अल्पादाने गुरूणां च लघूनां चातिसेवने ।**
**मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे ।। २ ।।**

**पदच्छेद:–** अल्पादाने गुरूणाम् च लघूनाम् च अतिसेवने मात्राकारणम् उद्दिष्टम् द्रव्याणाम् गुरुलाघवे ।

**अन्वय:–** गुरूणाम् (द्रव्याणाम्) अल्पादाने (हितं भवति) लघूनां (द्रव्याणां) च अतिसेवने (हानि: भवति)। गुरुलाघवे (भोजनग्रहणे) द्रव्याणां मात्राकारणम् उद्दिष्टम् (अस्ति) ।

**भावार्थ:–** अर्थात् गरिष्ठद्रव्याणि अपि अल्पमात्रं सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि च अतिमात्रं सेवनेन हानिकराणि जायन्ते । अत: मात्रानुसारम् एव खादितव्यम् ।

**तस्याशिताद्यादाहारात् बलं वर्णश्च वर्धते ।**
**तस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयम् ।। ३ ।।**

DRAFT

**पदच्छेदः–** तस्य अशिताद्यात् आहारात् बलम् वर्णः च वर्धते, तस्य ऋतुसात्म्यम् विदितम्, चेष्टा -आहार-व्यपाश्रयम् ।

**अन्वयः–** तस्य (जनस्य) अशिताद्यात् आहारात् बलं वर्णः च वर्धते । तस्य चेष्टाआहारव्यपाश्रयम् ऋतुसात्म्यं विदितम् (भोक्तव्यम्) ।

**भावार्थः–** वसन्तः, ग्रीष्मः, वर्षाः, शरद्, हेमन्तः शिशिरः, चेति षट् ऋतवः भवन्ति । यः पुरुषः ऋतूनाम् अनुकूलं स्वास्थ्यप्रदम् आहारसेवनं जानाति, तदनुसारं च आचरणं करोति, तस्य जनस्य अशितम् अर्थात् भुक्तं पीतं च सर्वमपि बलवर्धकं, वर्णकान्तिजनकं, सुखवर्धकम् आयुर्वर्धकञ्च भवति । अतः ऋतोः अनुसारं भोक्तव्यम् इति । नियमित-भावेन समयानुसारं सात्त्विकं भोजनम् आवश्यकम् इति ऋतुभुक् इति पदस्य भावः ।

**व्यायामः प्रातरुत्थाय, नित्यं दन्तविशोधनम् ।**
**स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम् ।। ४ ।।**

**पदच्छेदः–** व्यायामः प्रातः उत्थाय नित्यम् दन्तविशोधनम् स्वच्छजलेन सुस्नानम् बुभुक्षायाम् च भोजनम् ।

**अन्वयः–** नित्यं प्रातः उत्थाय व्यायामः (करणीयः) दन्तविशोधनं (कर्त्तव्यम्) स्वच्छजलेन सुस्नानं (कार्यम्) बुभुक्षायां (जातायां) भोजनं च (कर्त्तव्यम्) ।

**भावार्थः–** प्रतिदिनं प्रातः एव जागरणं कुर्यात्, ततः परं व्यायामः करणीयः । पुनः सम्यक् दन्तमार्जनं करणीयम् । स्वच्छजलेन उत्तमरीत्या स्नानं कर्त्तव्यम्। यदा उदरे बुभुक्षा भवति तदा एव हितकरं स्वल्पं तथा ऋत्वनुकूलं भोजनं ग्रहणीयम् ।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।। ५ ।।**

**पदच्छेदः–** सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।

**अन्वय :–** सर्वे सुखिनः भवन्तु, सर्वे निरामयाः सन्तु । सर्वे भद्राणि पश्यन्तु, कश्चिद् दुःखभाक् मा भवेत् ।

**भावार्थः–** संसारे सर्वे सुखेन निवसेयुः, ते नीरोगाः च भवेयुः । ते परस्परं समभावेन उत्तमविचारैः च विचारयेयुः । तेषां कल्याणं भवेत् । कश्चिद् अपि जनः कदापि दुःखं न प्राप्नुयात् । वस्तुतः सर्वे नियमित-हितकर-भोजनेन रोगमुक्ताः भवेयुः ।

## (ख) चरकसंहितायाः परिचयः–

**महर्षिः चरकः–** चरकसंहिताग्रन्थं रचितवान् । चरकसंहिता इति आयुर्वेदस्य प्रमुखः ग्रन्थः अस्ति । अस्मिन् ग्रन्थे 'सूत्रस्थानं, निदानस्थानं, विमानस्थानं, शरीरस्थानम्, इन्द्रियस्थानं, चिकित्सास्थानं, कल्पस्थानं, सिद्धिस्थानं' चेति अष्टस्थानानि सन्ति । अत्र न केवलं रोगाणां चिकित्सा एव वर्णिता, अपितु स्वास्थ्यस्य संरक्षणार्थम् आयुषः च संवर्धनार्थम् उपायाः अपि निर्दिष्टाः ।

DRAFT

## (ग) आहारपरिचयः–

सात्त्विक : आहार :
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ।।

(श्रीमद्-भगवद्गीता १७/८)

**भावार्थ:–** खाद्यं विना जीवनधारणम् असम्भवम् । भगवता प्रदत्तं शरीरम् आहारेण पुष्टं भूत्वा कर्मकरणाय समर्थं स्यात् । मानवस्य कृते ये सात्त्विकाहाराः भवन्ति, ते श्लोकेऽस्मिन् प्रदत्ताः । ये आहाराः आयुषः वर्द्धकाः, बुद्धिप्रदायकाः, बलकारकाः, आरोग्यप्रदाः, सुखदाः, प्रीतिगुणयुक्ताः, रसयुक्ताः, स्निग्धगुणपरिपूर्णाः, खाद्यसारपरिपूरिताः च ते आहाराः स्वभावतः सात्त्विकजनानां प्रियाः भवन्ति । अतः आरोग्यार्थं सात्त्विकः आहारः सेवनीयः ।

राजसिक : आहार :
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ।।

(श्रीमद्भगवद्गीता १७/९)

**भावार्थ:–** अतिकटुः, अत्यम्लः, अतिलवणः, अत्युष्णः, अतितीक्ष्णः, अतिरूक्षः, अतिविदाही च आहारः राजसजनानां प्रियः भवति । एतस्य आहारस्य सेवनेन अनेके व्याधयः भवन्ति । एतस्य सेवनेन मनुष्यः दुःखं शोकं च प्राप्नोति । अतः हितम् इच्छन् छात्रः जनः कदापि एतस्य आहारस्य सेवनं न कुर्यात् ।

तामसिक : आहार :
यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ।।

(श्रीमद्भगवद्गीता १७/१०)

**भावार्थ:–** एकप्रहरात् पूर्वं निर्मितं भोजनम्, अर्धसिक्तं खाद्यम्, अग्निदग्धं भोजनम्, आतपशुष्कम् अन्नम्, ऋतौ गते रसहीनं फलं, पलाण्डु-लशुनादीनि दुर्गन्धपूर्णानि भोजनानि, पूर्वदिवसस्य अवशिष्टं खाद्यम्, उच्छिष्टं खाद्यं, मांस-अण्डकादीनि अमेध्यभोजनानि तथा च तामस-गुण-युक्तानि द्रव्याणि तामसपुरुषाणां प्रियतराणि भवन्ति । एतैः भोज्यद्रव्यैः ते प्रीताः आनन्दिताः च भवन्ति । तामसिक-भोजनेन निद्रा तन्द्रा, आलस्यं च वर्धन्ते । अतः विद्यार्थिभिः एतानि त्यक्तव्यानि ।

DRAFT

## (घ) काश्चन आहारविषयकसूक्तयः–

- भोजनं परमेशस्य, भक्तये जीवनाय च ।
  त्वं तु मूर्ख विजानासि भोजनार्थं हि जीवनम् ।। (सुमनोवाटिका)
- अनारोग्यमनायुष्यमस्वर्ग्यं चाति भोजनम् ।
  अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ।। (मनुस्मृतिः २/५७)
- मिताहारो नरः सोढुं शक्तः कष्ट-शतं सुखम् ।
  अनभ्यस्तो हि कष्टानामध्यशनो विपद्यते ।। (सुमनोवाटिका)
- अशीतेनाम्भसा स्नानं कवोष्णदुग्धसेवनम् ।
  एतद् वो मानुषाः ! पथ्यं स्निग्धमुष्णं च भोजनम् ।। (भोजप्रबन्धः)

## परियोजनाकार्यम्

१. विद्यालयस्य परिसरे विद्यमानानां पञ्चवृक्षाणां नामानि तेषाम् औषधीयं प्रयोगं च लिखत ।

२. स्वास्थ्येन सम्बद्धानां पञ्चश्लोकानां संग्रहणं कुरुत ।

३. पाठे आगतान् श्लोकान् कण्ठस्थीकृत्य कक्षायां श्रावयत ।

DRAFT

# चतुर्थः पाठः
# संगच्छध्वं संवदध्वम्



प्राचीन-भारतीय ज्ञान-परम्परायां 'वेदः साक्षात् ब्रह्ममुखनिःसृता पवित्रतमा दैवी वाक्' इति मन्यते । वेदाः चत्वारः सन्ति– ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः चेति । इमे वेदाः अद्य विश्वस्य प्राचीनतम-साहित्य-रूपेण विद्वद्भिः मन्यन्ते । भवन्तः सर्वे स्नात्वा, शुद्धवस्त्राणि परिधाय, पादत्राणं बहिः स्थापयित्वा, अस्यां प्रार्थनासभायां समुपस्थिताः सन्ति । अतः आगच्छन्तु, प्रणामाञ्जलिं कृत्वा, नेत्रे मीलयित्वा, एकाग्रचित्तेन, समवेतस्वरेण च वेदमन्त्राणाम् उच्चारणं कुर्मः– ऋग्वेदः (१०.१९१.२-४)

इमे मन्त्राः एकतायाः मन्त्राः ।



# मन्त्राणां भावार्थं जानीम :

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ।। १ ।।

**पदच्छेदः –** संगच्छध्वम् संवदध्वम् सम् वः मनांसि जानताम् देवाः भागम् यथा पूर्वे संजानानाः उपासते ।

**अन्वयः –** (यूयम्) संगच्छध्वं संवदध्वं वः मनांसि संजानताम् । यथा पूर्वे देवाः भागं संजानानाः उपासते ।

**भावार्थः –** (वेदस्य ऋषिः 'आङ्गिरसः संवननः 'परमश्वेरस्य सन्देशेन मनुष्यान् उपदिशति)

हे मानवाः ! यूयं सर्वे (संगच्छध्वं) स्वस्य परिवारे, गणे, समाजे, राष्ट्रे, विश्वे च मिलित्वा अग्रे गच्छत, संभूय अभ्युदयं साधयत । (संवदध्वं) परस्परं सम्यक् विचारविनिमयं कुर्वन्तः एकस्वरेण वदत । (वः) युष्माकं (मनांसि) परस्परं मनोभावान् (संजानताम्) सम्यक् जानीत । परस्परं मनोभेदः मास्तु ।

(यथा पूर्वे) यथा सृष्टेः प्रारम्भकाले, (देवाः) ब्रह्मणा सृष्टाः अग्नि-वायु-आदित्यादयः ब्रह्माण्डीय-शक्तयः (भागं) सृष्टि-निर्माण-यज्ञस्य साफल्यार्थं स्वं स्वं कर्तव्यं स्वीकृत्य, (संजानानाः) परस्परम् उत्कृष्ट-समन्वय-पूर्वकं (उपासते) स्वं स्वं कर्म निरवहन् ।

तथैव यूयं मनुष्याः अपि स्वस्य कुटुम्बस्य, दलस्य, लोकस्य च प्रगतये नित्यं संभूय स्व-स्व-कर्तव्यस्य सुचारु निर्वाहं कुरुत । इत्थं यूय ं सर्वे वैमनस्यं परित्यज्य ऐक्यभावेन जीवत, तथा सर्वे अभीष्टफलानि च प्राप्नुत ।

**ଭାବାର୍ଥ :** (ବୈଦିକ ଋଷି ଆଙ୍ଗିରସ ସଂବନନ ପରମେଶ୍ୱରଙ୍କ ସନ୍ଦେଶବାହକ ହୋଇ ମନୁଷ୍ୟମାନଙ୍କୁ ଉପଦେଶ ଦେଉଛନ୍ତି । ଏହା ଏକତାର ମନ୍ତ୍ର ।)

ହେ ମନୁଷ୍ୟମାନେ ! ତୁମ୍ଭେମାନେ ସମସ୍ତେ ନିଜ ପରିବାରରେ, ଗୋଷ୍ଠୀରେ, ସମାଜରେ, ରାଷ୍ଟ୍ରରେ ଏବଂ ବିଶ୍ୱରେ ମିଳିତ ହୋଇ ଅଗ୍ରସର ହୁଅ । ମିଳିମିଶି ସାଂସାରିକ ଉନ୍ନତି ସାଧନ କର । ନିଜ ନିଜ ମଧ୍ୟରେ ଉତ୍ତମ ବିଚାର ବିନିମୟ କର । ପରସ୍ପର ମଧ୍ୟରେ ମନୋମାଳିନ୍ୟ ରଖ ନାହିଁ । ଯେପରି ସୃଷ୍ଟିର ପ୍ରାରମ୍ଭିକ କାଳରେ ବ୍ରହ୍ମାଙ୍କଦ୍ୱାରା ସୃଷ୍ଟି ହୋଇଥିବା ଦେବଗଣ ଯଥା ଅଗ୍ନି, ବାୟୁ, ସୂର୍ଯ୍ୟ ପ୍ରଭୃତି ବ୍ରହ୍ମାଣ୍ଡର ଶକ୍ତିସମୂହ ସୃଷ୍ଟି ନିର୍ମାଣ ଯଜ୍ଞର ସାଫଲ୍ୟ ପାଇଁ ନିଜ ନିଜ କର୍ତ୍ତବ୍ୟକୁ ବୁଝି ପରସ୍ପର ଉତ୍କୃଷ୍ଟ ସମନ୍ୱୟ ରକ୍ଷାକରି ନିଜ ନିଜ କର୍ମ ନିର୍ବାହ କରୁଥିଲେ । ସେହିପରି ତୁମେ ମନୁଷ୍ୟମାନେ ମଧ୍ୟ ନିଜ ପରିବାରର, ସମୂହର ଓ ସଂସାରର ପ୍ରଗତି ନିମନ୍ତେ ଏକମନା ହୋଇ ନିଜ ନିଜ କର୍ତ୍ତବ୍ୟର ସୁଚାରୁ ଭାବରେ ନିର୍ବାହ କର । ଏହିପରି ତୁମେ ସମସ୍ତେ ମନୋମାଳିନ୍ୟ ତ୍ୟାଗକରି ଐକ୍ୟଭାବନାରେ ଜୀବନ ଧାରଣ କର, ତଥା ଅଭୀଷ୍ଟ ଫଳ ଲାଭ କର ।

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।**
**समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ।। २ ।।**

**पदच्छेदः –** समानः मन्त्रः समितिः समानी समानम् मनः सह चित्तम् एषाम् समानम् मन्त्रम् अभिमन्त्रये वः समानेन वः हविषा जुहोमि ।

**अन्वयः –** एषां मन्त्रः समानः, समितिः समानी, मनः समानं, चित्तं सह (अस्तु) । वः समानं मन्त्रम् अभिमन्त्रये वः समानेन हविषा जुहोमि ।

**भावार्थः –** (एषां) एकस्मिन् कर्मणि सह-प्रवृत्तानाम् एषां (मन्त्रः) चिन्तनं (समानः) परस्परं सौहार्दपूर्णं भवतु, एषां च (समितिः) लक्ष्यसिद्धिः (समानी) समाना भवतु , (मनः) मनः च (समानं) सौमनस्यपूर्णम् अस्तु, तथा च (चित्तं) बुद्धिजन्यं ज्ञानम् अपि (सह) एकीभूतम् अस्तु ।

गृहे, समाजे, लोके च परस्परं द्वेषं विना सर्वे सुखेन सौहार्दपूर्णं जीवनं यापयेयुः ।

हे मनुजाः ! (वः) युष्माकम् (समानं मन्त्रम्) अन्योन्य-मन्त्रणं, संघटित-संकल्पं च (अभिमन्त्रये) अहम् संस्करोमि– दिव्यभावेन योजयित्वा प्रकटयामि । तथा च (वः) संघटितानां युष्माकं (समानेन) सामूहिक्या (हविषा) प्रार्थनया (जुहोमि) अहं ज्ञानयज्ञं सम्पादयामि ।

इत्थम् ऋषयः महात्मानः च सर्वदा समानतापूर्णं सङ्कल्पं चिन्तनं च दिव्यभावेन योजयित्वा समाजे प्रचारयन्ति, तस्य साफल्यार्थं च परमेश्वरं प्रार्थयन्ते ।

**ଭାବାର୍ଥ :** ଏକ ପ୍ରକାର କାର୍ଯ୍ୟରେ ପ୍ରବୃତ୍ତ ଲୋକଙ୍କର ଚିନ୍ତନ ମନନ ଏକ ପ୍ରକାର ହେଉ । ପରସ୍ପର ଭାବନା ସୌହାର୍ଦ୍ଦ୍ୟପୂର୍ଣ୍ଣ ହେଉ । ସେମାନଙ୍କର ଲକ୍ଷ୍ୟସିଦ୍ଧି ସମାନ ହେଉ । ମାନସିକ ବିଚାରଧାରା ଏକପ୍ରକାର ହେଉ । ସେହିପରି ହୃଦୟ ଏବଂ ବୁଦ୍ଧି ବିବେକ ଜ୍ଞାନ ମଧ୍ୟ ଏକ ପ୍ରକାର ହେଉ । ଘରେ, ଗୋଷ୍ଠୀରେ ଓ ସଂସାରରେ ପରସ୍ପର ଶତ୍ରୁତା ବିନା ସମସ୍ତେ ସୁଖରେ ସୌହାର୍ଦ୍ଦ୍ୟପୂର୍ଣ୍ଣ ଜୀବନ ଯାପନ କରନ୍ତୁ । ହେ ମନୁଷ୍ୟମାନେ ! ତୁମମାନଙ୍କର ପରସ୍ପର ଆଲୋଚନା ଓ ସାମୂହିକ ନିଷ୍ପତ୍ତିକୁ ମୁଁ ସଂସ୍କାର କରି ଦିବ୍ୟଭାବରେ ସଂଯୋଜିତ କରୁଛି । ସେହିପରି ତୁମମାନଙ୍କର ସମନ୍ୱିତ ଓ ସାମୂହିକ ପ୍ରାର୍ଥନା ଦ୍ୱାରା ମୁଁ ଜ୍ଞାନ ଯଜ୍ଞ ସମ୍ପାଦନ କରୁଛି । ଏହିପରି ଋଷି ଓ ମହାତ୍ମାମାନେ ସବୁବେଳେ ସମାନ ମନରେ ଲକ୍ଷ୍ୟ ସିଦ୍ଧି ପାଇଁ ଚିନ୍ତାଧାରାକୁ ଦିବ୍ୟ ଭାବରେ ସଂଯୁକ୍ତ କରି ସମାଜରେ ପ୍ରଚାର କରନ୍ତି ଏବଂ ତା'ର ସଫଳତା ପାଇଁ ପରମେଶ୍ୱରଙ୍କୁ ପ୍ରାର୍ଥନା କରନ୍ତି ।

**समानी व आकूतिः समाना हृदयानि वः ।**
**समानमस्तु वो मनो यथा वः सुसहासति ।। ३ ।।**

**पदच्छेदः –** समानी वः आकूतिः समाना हृदयानि वः समानम् अस्तु वः मनः यथा वः सु सह असति ।

**अन्वयः –** (हे मानवाः !) वः आकूतिः समानी (अस्तु) । वः हृदयानि समाना (सन्तु) । यथा वः सह सु असति, (तथा) वः मनः समानम् अस्तु ।

DRAFT

**भावार्थ : –** हे मानवा: ! (व:) युष्माकं (आकूति:) सङ्कल्प: (समानी) समान: अस्तु । (व: हृदयानि ) युष्माकं हृदयानि (समाना) समभावपूर्णानि सन्तु ।

(यथा) येन (व:) युष्माकं (सह) संघटनं (सु) शोभनम् उत्कृष्टं च (असति) भवति, तथा (व: मन:) युष्माकं मन: (समानम्) सामञ्जस्ययुतम् एकरूपं च (अस्तु) अस्तु ।

अनेन एव परिवारे, गणे, समाजे, राष्ट्रे, विश्वे च सुखं, शान्ति:, मैत्रीभाव: च विराजते । एतै: मन्त्रै: संघटितरूपेण सहजीवनस्य कृते प्रेरणा लभ्यते । एतेन स्वजीवने लोके च प्रसन्नता, सौमनस्यम्, उत्साह:, आयु:, आरोग्यं, विजय:, समृद्धि:, धर्म:, ज्ञानप्राप्ति:, आत्मतृप्ति: च भवति ।

**ଭାବାର୍ଥ :** ହେ ମାନବମାନେ ! ତୁମ୍ଭମାନଙ୍କର ସଙ୍କଳ୍ପ ସମାନ ହେଉ । ତୁମ୍ଭମାନଙ୍କର ହୃଦୟ ସମାନ ହେଉ । ତୁମ୍ଭମାନଙ୍କର ମନ ସମାନ ହେଉ, ଯେପରି ତାହା ସର୍ବଦା ତୁମ୍ଭମାନଙ୍କର ସହଚର ହୋଇ ରହିବ । ଯେପରି ତୁମ୍ଭମାନଙ୍କର ସଂଗଠନ ସୁନ୍ଦର ଉତ୍କୃଷ୍ଟ ହେଉଛି ସେହିପରି ତୁମ୍ଭମାନଙ୍କର ମନ ସମାନ ଓ ଏକରୂପ ହେଉ । ଯାହାଫଳରେ ତୁମ୍ଭମାନଙ୍କର ଏକତ୍ର ଅବସ୍ଥାନ (ସମୂହ-ସାହିତ୍ୟ) ସମାନ ହେଉ ।

ଏହାଦ୍ୱାରା ପରିବାରରେ, ଗୋଷ୍ଠୀରେ, ସମାଜରେ, ରାଷ୍ଟ୍ରରେ ଓ ବିଶ୍ୱରେ ସୁଖ, ଶାନ୍ତି ଏବଂ ମୈତ୍ରୀଭାବ ପ୍ରକାଶିତ ହେଉଛି । ଏହି ମନ୍ତ୍ର ବା ସନ୍ଦେଶଗୁଡ଼ିକ ଦ୍ୱାରା ସଂଗଠିତ ରୂପେ ମିଳିମିଶି ଚଳିବା ପାଇଁ ପ୍ରେରଣା ମିଳୁଛି । ଏହାଦ୍ୱାରା ନିଜ ଜୀବନରେ ସଂସାରରେ ପ୍ରସନ୍ନତା, ଉତ୍ତମ ମାନସିକ ଭାବନା, ଉତ୍ସାହ, ଆୟୁଃ, ଆରୋଗ୍ୟ, ବିଜୟ, ସମୃଦ୍ଧି, ଧର୍ମ, ଜ୍ଞାନପ୍ରାପ୍ତି ଓ ଆତ୍ମତୃପ୍ତି ହେଉଛି ।

# अवधेयम्

**शब्दार्थाः-**

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| संगच्छध्वम् | मिलित्वा गच्छत | मिलकर चलो | May you walk together | ମିଳିମିଶି ଚାଲ |
| संवदध्वम् | एकस्वरेण वदल | सहमतिपूर्वक बोलें | May you speak in one voice | ସହମତିପୂର୍ବକ କୁହ |
| मनांसि | चित्तानि | मनों को | Minds | ମନଗୁଡ଼ିକ |
| जानताम् | जानन्तु | जानें | May you know | ଜାଣନ୍ତୁ |
| देवाः | ब्रह्माण्डीय-शक्तयः /वैश्विक-शक्तयः | सृष्टि की मूलभूत शक्तियाँ | Cosmic forces & celestial phenomena | ଦେବତାମାନେ |
| संजानानाः | एकमनसः भूत्वा | एक विचार वाले होकर | Being amicable | ଏକମନା ହୋଇ |
| उपासते | सेवन्ते | श्रद्धापूर्वक कर्तव्य निर्वहण | Devotedly performing | ନିଷ୍ଠା ସହ ସେବା କରନ୍ତି |
| अभ्युदयम् | अभिवृद्धिम् | लौकिक उन्नति | Elevation and prosperity | ଉନ୍ନତି |
| मन्त्रः | विचारः | चिन्तन | Contemplation | ମନ୍ତ୍ର |
| समितिः | समाना प्राप्तिः | समान सिद्धि | Common resolutions | ଲକ୍ଷ୍ୟସିଦ୍ଧି |
| वः | युष्मभ्यम् | तुम्हारे | For you | ତୁମମାନଙ୍କ ପାଇଁ |
| अभिमन्त्रये | संस्कृत्य प्रचारयामि | अभिमन्त्रित करके प्रचारित करता हूँ | (I) Consecrate and propagate | ପ୍ରଚାର କରୁଛି |
| हविषा | प्रार्थनापूर्वक समर्पणेन | प्रार्थना पूर्वक यज्ञाहुति द्वारा | By oblatory | ପ୍ରାର୍ଥନାଦ୍ୱାରା |
| जुहोमि | ज्ञानकर्ममयं यज्ञं साधयामि | दिव्य यज्ञ कर्म को साधता/ती हूँ | Performing Yajna & divine offerings | ସାଧନ କରୁଛି |
| आकूतिः | सङ्कल्पः | संकल्प | Resolution | ପ୍ରତିଜ୍ଞା/ସଙ୍କଳ୍ପ |
| सु सह असति | सुसंघटितः भवेत् | सुसंघटित हो | May you be united | ସୁସଙ୍ଗଠିତ |
| संहिता | मूलमन्त्रपाठः | मूल वैदिक मन्त्र पाठ | Original Vedic text | ମୂଳମନ୍ତ୍ର ପାଠ |
| ब्रह्मणा | सृष्टिकर्त्रा / परमेश्वरेण | सृष्टि के निर्माता परमात्मा के द्वारा | By the creator of the universe | ସୃଷ୍ଟିକର୍ତ୍ତା ବ୍ରହ୍ମାଙ୍କ ଦ୍ୱାରା |
| निरवहन् | निर्वाहम् अकुर्वन् | निर्वाह किया | Took responsibility | ନିର୍ବାହ କରିଥିଲେ |

**सन्धिविच्छेदः -**

| | | |
|---|---|---|
| नमस्ते | = | नमः + ते |
| क्रीड़ोत्सवे | = | क्रीड़ा + उत्सवे |
| परस्परम् | = | परः + परम् |
| सूक्तयः | = | सु + उक्तयः |
| इत्यपि | = | इति + अपि |
| मनोभेदः | = | मनः + भेदः |
| उच्चारणम् | = | उद् + चारणम् |
| समानोमन्त्रः | = | समानः + मन्त्रः |
| चित्तमेषाम् | = | चित्तम् + एषाम् |
| मन्त्रमभिमन्त्रये | = | मन्त्रम् + अभिमन्त्रये |
| वो हविषा | = | वः + हविषा |
| समानमस्तु | = | समानम् + अस्तु |
| मनोयथा | = | मनः + यथा |
| सुसहासति | = | सुसह + असति |

## प्रश्नावली

१. एकपदेन उत्तरं लिखत –

(क) कः मनुष्यान् उपदिशति ?

(ख) सर्वे वैमनस्यं परित्यज्य केन भावेन जीवन्तु ?

(ग) लक्ष्यसिद्धिः कीदृशी भवतु ?

(घ) अहं किं सम्पादयामि ?

(ङ) एतैः मन्त्रैः कस्य कृते प्रेरणा लभ्यते ?

(च) युष्माकं हृदयानि कीदृशानि सन्तु ?

DRAFT

## २. पूर्णवाक्येन उत्तरं लिखत–

(क) सर्वेषां मनः कीदृशं भवेत् ?

(ख) 'संगच्छध्वम्' इत्यस्य कः अर्थः ?

(ग) सर्वे किं परित्यज्य ऐक्यभावेन जीवेयुः ?

(घ) संगच्छध्वम् इति पाठे का प्रेरणा अस्ति ?

(ङ) ऋषिः आङ्गिरसः कान् उपदिशति ?

(च) 'संवदध्वम्' इत्यस्य कः अर्थः ?

## ३. पट्टिकातः शब्दान् चित्वा अधोलिखितेषु मन्त्रेषु रिक्तस्थानानि पूरयत –

(संवदध्वं, समितिः, आकूतिः, भागं, मनः, हृदयानि , जानाना, समानं, मनो, हविषा, सुसहासति, मनांसि)

(क) सङ्गच्छध्वं .................................... सं वो .................................... जानताम् ।

देवा .................................... यथा पूर्वे सं .................................... उपासते ।

(ख) समानो मन्त्रः ........................ समानी समानं ........................ सह चित्तमेषाम् ।

........................ मन्त्रमभिमन्त्रये वः समानेन वो ........................ जुहोमि ।

(ग) समानी व .................................... समाना .................................... वः ।

समानमस्तु वो .................................... यथा वः .................................... ।

## ४. पाठे प्रयुक्तान् शब्दान् भावानुसारं परस्परं योजयत –

| | |
|---|---|
| (क) संगछध्वम् | सेवन्ते |
| (ख) संवदध्वम् | मिलित्वा चलत |
| (ग) उपासते | सङ्कल्पः |
| (घ) विश्वानि | समस्तानि |
| (ङ) आकूतिः | एकस्वरेण वदत |

## ५. सन्धिं कुरुत –

(क) मनः + यथा (क) चित्तम् + एषाम्

(ग) इति + अपि (घ) क्रीडा + उत्सवः

(ङ) समानः + मन्त्रः (च) परः + परम्

## ६. शुद्धम् उत्तरं चिनुत–

(क) कति वेदाः सन्ति ?

(i) त्रयः, (ii) चत्वारः, (iii) पञ्च, (iv) षट्

(ख) संज्ञानसूक्तं कस्मिन् वेदे अस्ति ?

(i) ऋग्वेदे, (ii) यजुर्वेदे, (iii) सामवेदे, (iv) अथर्ववेदे

(ग) संज्ञानसूक्तस्य ऋषिः कः ?

(i) वसिष्ठः, (ii) विश्वामित्रः, (iii) आङ्गिरसः, (iv) व्यासः

(घ) सङ्गच्छध्वम् इति पदस्य कः अर्थः ?

(i) सङ्गं कुरुत, (ii) शनैः गच्छत, (iii) मिलित्वा गच्छत, (iv) समानं गच्छत

(ङ) ऋषिः केन जुहोति ?

(i) मनसा, (ii) हविषा, (iii) वचसा, (iv) पयसा

(च) 'आकूतिः' इति पदस्य कः अर्थः ?

(i) आकारः, (ii) आकृतिः, (iii) सम्प्रीतिः, (iv) सङ्कल्पः

## ७. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।

ऋषिः केषां समानत्वम् इच्छति ?

## ८. मातृभाषया अनुवादं कुरुत–

(क) अभिनन्दनं भवताम् ।

(ख) ते सहयोगं न कृतवन्तः ।

(ग) आम्, जानामि आचार्य ।

(घ) सत्यमेव उक्तम् ।

(ङ) कः अस्य अभिप्रायः ?

(च) एतत् संहतिसूक्तमिति प्रख्यातम् ।

## ८. मातृभाषया अनुवादं कुरुत–

(क) नमस्ते (ख) अपि

(ग) कथम् (घ) आम्

(ङ) एषः (च) यदि-तर्हि



DRAFT

## वयं जानीमः

१. **वेदाः** - ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः ।

२. **ब्राह्मणानि** - ऐतरेयम्, शतपथम्, सामविधानम्, गोपथम्, इत्यादीनि ।

३. **उपनिषदः** (प्रसिद्धाः) - ईश केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-ऐतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यकोपनिषदः इत्यादयः ।

४. **उपवेदाः** - आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थवेदः/स्थापत्यवेदः ।

५. **वेदाङ्गानि** - शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्योतिषम्, कल्पः ।

६. **वेदोपाङ्गानि/षड्-दर्शनानि** - न्यायः, वैशेषिकम्, साङ्ख्यम्, योगः, पूर्व-मीमांसा, उत्तर-मीमांसा (वेदान्तः) ।

ऋग्वेदः–

ऋग्वेदे मन्त्राणां सङ्ख्या – दश सहस्राणि, पञ्च शतानि , द्विपञ्चाशत् च (१०,५५२) मन्त्राः सन्ति ।

अस्य ग्रन्थस्य विभाजनक्रमः द्विधा भवति –

१. **मण्डलक्रमः** – (१० मण्डलानि, ८५ अनुवाकाः, १,०२८ सूक्तानि)

२. **अष्टकक्रमः** – (८ अष्टकाः, प्रत्यष्टकम् ८ अध्यायाः, आहत्य ६४ अध्यायाः)

**अस्य पाठस्य आधारः – ऋग्वेदस्य अन्तिमस्य दशम-मण्डलस्य, एकशताधिक- एकनवतितमं (१९१) सूक्तम् अस्ति, यत् 'संज्ञान-सूक्तम्' इति प्रसिद्धम् अस्ति ।**

**परियोजनाकार्यम्**

१. अस्य सूक्तस्य भावार्थं मित्रैः सह मातृभाषया चर्चयत ।

२. संज्ञानसूक्तम् इव ऋग्वेदस्य पञ्चानां सूक्तानां नामानि लिखत ।

३. संज्ञानसूक्तस्य आधारेण भवत्सु एकतां स्थापयितुं विविधान् उपायान् शिक्षकैः सह आलोचयत ।

# पञ्चमः पाठः
# उत्कलमणिः गोपबन्धुः

(एकदा वन्यापीड़ितानां साहाय्यार्थं शिक्षकाः छात्राश्च सभागारे चर्चां कुर्वन्ति ।)







सत्यम्, अशोक ! ते सर्वे अतिदुःखेन जीवन्ति ।
अस्माभिः एतादृशानां दुःखितानां सहायता करणीया । यथा उत्कलमणिः
गोपबन्धुः वन्यापीडितानाम् अकुण्ठं सेवां कृत्वा अद्यापि जनमानसेषु
समादृतोऽस्ति ।
महोदय ! एषः गोपबन्धुः कः ?


भवन्तः सर्वे एतत् चित्रं पश्यन्तु ।
एषः अस्ति दीनबन्धुः गोपबन्धुः । सम्प्रति वयं
तस्य विषये जानीमः ।



एकदा आचार्यहरिहरदासः सत्यवादी-वनविद्यालयस्य सर्वान् अध्यापकान् भोजनाय आमन्त्रितवान् । आमन्त्रिताः सर्वे अतिथयः हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः । बहूनि सुस्वादूनि व्यञ्जनानि कदलीपत्रेषु परिवेषितानि । हसन् गोपबन्धुरवदत् – अरे !

भोजनस्यातिदौर्लभ्यं जीवनाय सुखप्रदम् ।
तदर्थं भोजनं कुर्याः मा शरीरे दयां कुरु ।।

एतच्छ्रुत्वा सर्वे उच्चैः हसितवन्तः । तदानीमेव बहिः कश्चन करुणध्वनिः गोपबन्धोः कर्णयोः अगुञ्जत् –

''मातः, मातः ! बुभुक्षितोऽस्मि, कृपया किञ्चित् भोजनं देहि । दिनत्रयं किमपि न भुक्तवान् । भोजनं देहि मातः ! भोजनं देहि । आँ आँ . . .'' इति क्रन्दनध्वनिं श्रुत्वैव दयाविगलितहृदयः गोपबन्धुः अश्रुपूर्णनयनोऽभवत् । किमपि अविचिन्त्य झटिति स्वपत्रे परिवेषितं भोजनं हस्ते गृहीत्वा बहिरागतवान् । भिक्षुकाय च दत्तवान् ।



असौ महान् समाजसेवकः आसीत् गोपबन्धुदासः । असौ सत्यवादीवनविद्यालयस्य शिक्षकः, प्रसिद्धेषु पञ्चमित्रेषु अन्यतमः स्वाधीनतासंग्रामी चासीत् । ओडिशाराज्यस्य पुरीजनपदस्य साक्षीगोपालसमीपे सुआण्डो-ग्रामे जन्म लब्धवान् ।

अध्ययनकालादेव स दरिद्राणां रोगिणां च सेवामकरोत् । सत्यवादी वनविद्यालये स छात्रान् निःशुल्कम् अपाठयत् । निरक्षरतादूरीकरणाय सः सततं यतते स्म । कार्पासवस्त्रनिर्माणाय सः स्वयमेव सूत्रप्रस्तुतिमकरोत् । जन्मभूमेः दुर्दशामवलोक्य स सर्वदा चिन्ताकुलो भवति स्म । महात्मगान्धेः प्रेरणया भारतीयस्वाधीनतान्दोलने गोपबन्धुः अंशग्रहणं कृतवान् । सः वर्षद्वयं यावत् कारावासं प्राप्तवान् ।

कारागारे निवसन् सः 'बन्दीर आत्मकथा', 'कारा-कविता', 'धर्मपद', 'गो-माहात्म्य', 'नचिकेता-उपाख्यान' इत्यादीनि बहुप्रेरणादायीनि पुस्तकानि ओडिआभाषया विरचितवान् । सर्वदा स्वदेशस्यैव वस्त्राणां वस्तूनां च उपयोगं कृतवान् । मरणासन्नं स्वपुत्रमपि विहाय भारतमातुः सहस्रशः पुत्रान् उद्धर्तुं गृहात् बहिः निर्गतः समाजमसेवत च । देशसेवातत्परस्य गोपबन्धोः प्रसिद्धं प्रेरणादायकं वचनमधुनापि जनमानसेषु राष्ट्रभक्तिं जागरयति ।





**स्वदेशभूमौ मम लीयतां तनु:,**
**स्वदेशलोकास्तदनु प्रयान्तु नु ।**
**स्वराज्यमार्गे यदि गर्तमालिका,**
**ममास्थिमांसै: परिपूरितास्तु सा ।।**




**भावार्थ: –**

स्वदेशस्य भूमिभागे मम शरीरं विलीनं भवतु ।
देशवासिन: मम अनुसरणं कुर्वन्तु ।
देशस्य स्वतन्त्रतानिमित्तं यत्र यत्र प्रतिबन्धका: गर्ता: सन्ति,
ते सर्वे गर्ता: मम अस्थिभि: मांसैश्च परिपूर्णा: भवन्तु ।

असौ सत्यवादी वनविद्यालयस्य, दरिद्रनारायणसेवा-सङ्घस्य, सत्यवादीमुद्रणालयस्य, समाज: इति वार्तापत्रस्य च प्रतिष्ठाता आसीत् । समाज: इति दिनपत्रिका शताधिकवर्षेभ्य: अधुनापि प्रतिदिनं प्रकाश्यते । समाजसेवायै देशसेवायै च तस्य असीमं त्यागमनुभवन् वैज्ञानिक: आचार्य: प्रफुल्लचन्द्रराय: गोपबन्धुम् उत्कलमणि: इति उपाधिना सम्मानितवान् ।

**उत्कलमणिनामायं प्रसिद्धो लोकसेवक: ।**
**प्रणम्यो देशभक्तश्च गोपबन्धुर्महामना: ।।**

# अवधेयम्

**शब्दार्था :-**

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| वन्यापीडितानाम् | नद्यां बहुजलप्रवाहेण धनजीवनक्षति–ग्रस्तानाम् | बाढ़ पीड़ितों का | Of flood victims | ବନ୍ୟା ପୀଡ଼ିତ ଲୋକମାନଙ୍କର |
| नष्टानि | क्षतिग्रस्तानि | नष्ट हुए | Destroyed | ନଷ୍ଟ ହୋଇଥିଲା |
| अनाहारेण | आहारेण विना | भोजन न करने से | By abstaining from food | ଉପବାସରେ |
| नदीस्रोतसा | नदीजलप्रवाहेण | नदी के प्रवाह से | By River currents | ନଦୀସ୍ରୋତରେ |
| अकुण्ठम् | कुण्ठां विना/साग्रहम् | आग्रहपूर्वक | Generously | ଦ୍ୱିଧାହୀନ ଭାବରେ |
| समादृत: | आदरप्राप्त: | सम्मानित | Honoured | ସମ୍ମାନିତ |
| सुस्वादूनि | रुचिकराणि | स्वादिष्ट भोजन | Delicious food | |
| व्यञ्जनानि | सूपशाकादीनि | | | ସୁସ୍ୱାଦୁ ତରକାରୀଗୁଡ଼ିକ |
| दौर्लभ्यम् | कष्टेन लभ्यम् | कष्ट से प्राप्त किया गया | Difficulty in being obtained | ଦୁର୍ଲଭତା / ସହଜରେ ଯାହା ମିଳେନାହିଁ |
| नि:शुल्कम् | धनं विना | नि:शुल्क | Without any fees | ବିନା ପାରିଶ୍ରମିକରେ |
| करुणध्वनि: | विकलस्वर: | करुणा युक्त ध्वनि | Weeping words | ବିକଳ ସ୍ୱର |
| अगुञ्जत् | गुंञ्जनम् अकरोत् | गूँजा | Echoes | ଧ୍ୱନିତ ହେଲା |
| बुभुक्षित: | क्षुधातुर: | भूखा | Hungry | ଭୋକିଲା ଲୋକ |
| दयाविगलित-हृदय: | करुणार्द्रहृदय: | दयापूर्ण हृदय वाला / दयालु | Compassionate heart | ଦୟାରେ ହୃଦୟ ତରଳି ଯାଇଥିବା |
| अश्रुपूर्णनयन: | अश्रुयुक्ते नेत्रे यस्य स: | आँसू से भरी हुई आँखों वाला | Eyes filled with tears | ଯାହାର ଆଖିରେ ଲୁହ ଭରିଯାଇଛି |
| परिवेषितम् | भोजनार्थं प्रदत्तम् (अन्नम्) | परोसा गया | Served | ପରସା ଯାଇଥିବା |
| पञ्चमित्रेषु | पञ्चसंख्याकेषु मित्रेषु | पाँच मित्रों में | Among five friends | ପାଞ୍ଚଜଣ ମିତ୍ରଙ୍କ ମଧ୍ୟରେ |
| स्वाधीनता-संग्रामी | स्वतन्त्रता-सेनानी: | स्वतन्त्रता सेनानी | Freedom fighter | ସ୍ୱାଧୀନତା ସଂଗ୍ରାମୀ |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| जन्म लब्धवान् | जन्म प्राप्तवान् | जन्म लिया | Was born | ଜନ୍ମଲାଭ କରିଥିଲେ |
| कारावासम् | कारागृहे बन्धनम् | कारागार में रहना | Living in jail | ବନ୍ଦୀଶାଳାରେ ରହିବା |
| चिन्ताकुल: | चिन्तया व्याकुल: | चिन्ता से व्याकुल | Worried | ଚିନ୍ତାରେ ବ୍ୟାକୁଳ |
| देशसेवा-तत्परस्य | देशसेवां कर्तुं तत्परस्य | देश सेवा हेतु तत्पर का | Of the one who is ready to serve the country | ଦେଶସେବା ପାଇଁ ତତ୍ପର |
| सहस्रश: | सहस्राधिका: | हजारों | In thousands | ହଜାର ହଜାର |
| लीयताम् | विलीनतां यातु | विलीन हो जाएँ | (May it) merge | ଲୀନହୋଇଯାଉ/ ମିଶିଯାଉ |
| प्रयान्तु | गच्छन्तु | चलें | (May they) walk over | ଯା'ନ୍ତୁ |
| गर्तमालिका | गर्तानां शृङ्खला | गड्ढों की शृङ्खला | Series of potholes | ଗାତ଼ଗୁଡ଼ିକ |
| अस्थिमांसै: | अस्थिभि: मांसै: च | हड्डी और मांस से | With the bones and flesh of the body | ହାଡ଼ ମାଂସଗୁଡ଼ିକ ଦ୍ୱାରା |
| वार्तापत्रस्य | समाचारपत्रस्य | दैनिक समाचारपत्र का | Of the newspaper | ସଂବାଦପତ୍ରର/ଖବରକାଗଜର |
| असीमम् | अतुलनीयम् | अपार | Immense /Unparallel | ଅସୀମ/ସୀମାହୀନ |
| उत्कलमणि: | उत्कलस्य मणिसदृश: उपाधिविशेष: | उत्कल की मणि (एक उपाधि ) | Gem of Odisha (A title) | ଉତ୍କଳମଣି ଇତି ଉପାଧି |
| सम्मानितवान् | मानेन प्रशंसितवान् | सम्मानित किया | Honored | ସମ୍ମାନିତ କରିଥିଲେ |
| लोकसेवक: | जनसेवक: | समाज सेवक | Social worker | ଜନସେବକ |
| महामना: | उच्चविचारसम्पन्न: | उच्च विचारवाला | Broad-minded | ଉଚ୍ଚବିଚାର ସମ୍ପନ୍ନ |
| सत्यवादी | सत्यवादी-वनविद्यालय: वनविद्यालय: | सत्यवादी वनविद्यालय | Satyavadi Vanavidyalaya | ସତ୍ୟବାଦୀ ବନବିଦ୍ୟାଳୟ |

**बि.द्र. :** ସଂସ୍କୃତରେ ସମାସ ନିୟମ ଅନୁସାରେ ସତ୍ୟବାଦି-ବନବିଦ୍ୟାଳୟଃ ହେବ । କିନ୍ତୁ ଓଡ଼ିଆରେ ନାମବାଚକପଦରୂପେ 'ସତ୍ୟବାଦୀ ବନବିଦ୍ୟାଳୟ' ଥିବାରୁ ପୁସ୍ତକରେ ତାହା ରଖାଯାଇଛି । ସେହିପରି ସତ୍ୟବାଦୀ ମୁଦ୍ରଣାଳୟ ମଧ୍ୟ ରଖାଯାଇଛି ।

DRAFT

## सन्धिविच्छेदः -

| | | |
|---|---|---|
| नमस्ते | = | नमः + ते |
| छात्राश्च | = | छात्राः + च |
| पशवोऽपि | = | पशवः + अपि |
| मृताश्च | = | मृताः + च |
| अद्यापि | = | अद्य + अपि |
| समादृतोऽस्ति | = | समादृतः + अस्ति |
| गोपबन्धुरवदत् | = | गोपबन्धुः + अवदत् |
| भोजनस्यातिदौर्लभ्यम् | = | भोजनस्य + अतिदौर्लभ्यम् |
| एतच्छ्रुत्वा | = | एतत् + श्रुत्वा |
| तदानीमेव | = | तदानीम् + एव |
| बुभुक्षितोऽस्मि | = | बुभुक्षितः + अस्मि |
| श्रुत्वैव | = | श्रुत्वा + एव |
| अश्रुपूर्णनयनोऽभवत् | = | अश्रुपूर्णनयनः + अभवत् |
| बहिरागतवान् | = | बहिः + आगतवान् |
| कालादेव | = | कालात् + एव |
| सेवामकरोत् | = | सेवाम् + अकरोत् |
| स्वयमेव | = | स्वयम् + एव |
| सूत्रप्रस्तुतिमकरोत् | = | सूत्रप्रस्तुतिम् + अकरोत् |
| दुर्दशामवलोक्य | = | दुर्दशाम् + अवलोक्य |
| चिन्ताकुलोभवति | = | चिन्ताकुलः + भवति |
| स्वाधीनतान्दोलने | = | स्वाधीनता + आन्दोलने |
| इत्यादीनि | = | इति + आदीनि |
| स्वदेशस्यैव | = | स्वदेशस्य + एव |
| मरणासन्नम् | = | मरण + आसन्नम् |
| स्वपुत्रमपि | = | स्वपुत्रम् + अपि |
| स्वदेशलोकास्तदनु | = | स्वदेशलोकाः + तत् + अनु |
| ममास्थिमांसैः | = | मम + अस्थिमांसैः |
| मांसैश्च | = | मांसैः + च |
| त्यागमनुभवन् | = | त्यागम् + अनुभवन् |
| उत्कलमणिनामायम् | = | उत्कलमणिनामा + अयम् |
| प्रसिद्धोलोकसेवकः | = | प्रसिद्धः + लोकसेवकः |
| प्रणम्योदेशभक्तश्च | = | प्रणम्यः + देशभक्तः + च |
| गोपबन्धुर्महामनाः | = | गोपबन्धुः + महामनाः |

DRAFT

## प्रश्नावली

**१. एकपदेन उत्तरं लिखत –**

(क) समाज-दिनपत्रिकायाः प्रतिष्ठाता कः ?

(ख) गोपबन्धुः कस्मै स्वभोजनं दत्तवान् ?

(ग) मरणासन्नः कः आसीत् ?

(घ) गोपबन्धुः केन उपाधिना सम्मानितः अभवत् ?

(ङ) गोपबन्धुः कति वर्षाणि कारावासं प्राप्तवान् ?

**२. शून्यस्थानपूरणं कुरुत–**

(क) मा शरीरे .................... कुरु ।

(ख) ................ मम लीयतां तनुः ।

(ग) उत्कलमणिनामायं प्रसिद्धो ........... ।

(घ) स्वदेशलोकास्तदनु ............................. नु ।

(ङ) स्वराज्यमार्गे यदि ..............................,

(च) .................... परिपूरितास्तु सा ।

(लोकसेवकः, गर्त्तमालिका, दयाम्, स्वदेशभूमौ, प्रयान्तु, ममास्थिमांसैः)

**३. मातृभाषया अनुवादं कुरुत–**

(क) एतच्छ्रुत्वा सर्वे उच्चैः हसितवन्तः ।

(ख) स वर्षद्वयं यावत् कारावासं प्राप्तवान् ।

(ग) असौ महान् जनसेवकः आसीत् गोपबन्धुदासः ।

(घ) ते सर्वे अतिदुःखेन जीवन्ति ।

(ङ) वन्यया तत्र महती हानिः सञ्जाता ।

(च) स्वदेशभूमौ मम लीयतां तनुः ।

४. **स्तम्भमेलनं कुरुत–**

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| भयङ्करी | भोजनम् |
| वासगृहाणि | प्राप्तवान् |
| गृहपालिताः | नष्टानि |
| जीवनाय | वन्या |
| परिवेषितं | सुखप्रदम् |
| कारावासं | पशवः |

५. **संस्कृतेन वाक्यानि रचयत ?**

(क) मनः + यथा (क) चित्तम् + एषाम्

असौ, सेवाम्, सुस्वादूनि, सहायताम्, स्वदेशवस्त्राणि, अन्यतमः

(क) ..........................................................................

(ख) ..........................................................................

(ग) ..........................................................................

(घ) ..........................................................................

(ङ) ..........................................................................

(च) ..........................................................................

६. **सन्धिं कुरुत–**

(क) नमः + नमः

(ख) स्वयम् + एव

(ग) अद्य + अपि

(घ) गोपबन्धुः + अवदत्

(ङ) एतत् + श्रुत्वा

(च) श्रुत्वा + एव

DRAFT

## ७. शुद्धम् उत्तरं चिनुत–

(क) कस्यां नद्यां भयङ्करवन्या सम्भूता ?

(i) वैतरणीनद्याम्, (ii) महानद्याम्, (iii) गङ्गानद्याम्, (iv) ब्राह्मणीनद्याम्

(ख) कः दीनबन्धुः ?

(i) आचार्यहरिहरः, (ii) सन्त बिनोवा, (iii) महात्मा गान्धिः, (iv) गोपबन्धुः

(ग) गोपबन्धुः कान् निःशुल्कम् अपाठयत् ?

(i) छात्रान्, (ii) शिक्षकान्, (iii) दरिद्रान्, (iv) देशभक्तान्

(घ) वनविद्यालयः कुत्र स्थापितः आसीत् ?

(i) केन्द्रापड़ाजनपदे, (ii) कटकनगरे, (iii) सत्यवादी क्षेत्रे, (iv) सम्बलपुरे

(ङ) बुभुक्षितः कति दिनानि न भुक्तवान् ?

(i) दिनपञ्चकम्, (ii) दिनचतुष्टयम्, (iii) दिनद्वयम्, (iv) दिनत्रयम्

(च) ''धर्मपद'' इति पुस्तकं कः रचितवान् ?

(i) गोपबन्धुः, (ii) नीलकण्ठः, (iii) गोदावरीशः, (iv) कृपासिन्धुः

## ८. पूर्णवाक्येन उत्तरं लिखत–

(क) गोपबन्धुः किमर्थम् अश्रुपूर्णनयनः अभवत् ? ........................................

(ख) कीदृशं पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत् ? ........................................

(ग) गोपबन्धोः कृते उत्कलमणिः इति उपाधिः किमर्थं प्रदत्तः ? ........................................

(घ) गोपबन्धुः कुत्र जन्म लब्धवान् ? ........................................

(ङ) गोपबन्धुः कानि पुस्तकानि विरचितवान् ? ........................................

(च) गोपबन्धुः सर्वदा केषाम् उपयोगं कृतवान् ? ........................................

## ९. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।

उत्कलमणिः गोपबन्धुः कीदृशः देशभक्तः आसीत् ?

DRAFT

## वयं जानीमः

**भोजनस्यातिदौर्लभ्यं जीवनाय सुखप्रदम् ।**
**तदर्थं भोजनं कुर्याः मा शरीरे दयां कुरु ।।**

**पदच्छेदः** – भोजनस्य अति दौर्लभ्यम् जीवनाय सुखप्रदम् तदर्थम् भोजनम् कुर्याः मा शरीरे दयाम् कुरु ।

**अन्वयः** – भोजनस्य अति दौर्लभ्यं (विद्यते) । जीवनाय सुखप्रदं भोजनं कुर्याः । तदर्थं शरीरे दयां मा कुरु ।

**भावार्थः** – भोजनम् अतीव दुर्लभं भवति । जीवनम् अग्रे नेतुं सुखप्रदं भोजनं करणीयम् । अतः शरीरस्य कष्टं विचिन्त्य भोजनविषये कदापि सङ्कोचः लज्जा वा न करणीया इति ।

### उत्कलमणि-गोपबन्धुदासस्य जीवनपरिचयः–



उत्कलमणिः गोपबन्धुदासः

जन्म – ०९/१०/१८७७

जन्मस्थानम् – सुआण्डो -ग्रामः, पुरी-जनपदः, ओडिशाराज्यम्

पिता – दैत्यारिदासः

माता – स्वर्णमयी देवी

पत्नी – मोती देवी

एफ्. ए. उत्तीर्णः – १९००, रेभेन्सा महाविद्यालयः, कटकम्, ओडिशा

बी.एल्. उत्तीर्णः – १९०६, कलकत्ता – विश्वविद्यालयः

सत्यवादी-वनविद्यालयस्य प्रतिष्ठा – १९०९

बिहार-ओडिशा व्यवस्थापकसभायाः सदस्यः – १९१७

समाज-साप्ताहिकपत्रिकायाः प्रकाशनम् – १९१९

भारतीय-जातीय-आन्दोलने योगदानम् – १९२०

उत्कलमणिः इति उपाधिना सम्मानितः – १९२४

रचनाः – अवकाशचिन्ता , बन्दीर आत्मकथा, कारा-कविता, धर्मपद, गो-माहात्म्य, नचिकेता-उपाख्यान

स्वर्गारोहणम् (साक्षी-गोपाले) – १७.०६.१९२८

**सत्यवादी -वनविद्यालय: (ସତ୍ୟବାଦୀ ବନବିଦ୍ୟାଳୟ)**

भारतस्य प्रथम: मुक्तविद्यालय: । १९०९ ख्रीष्टाब्दे अगस्तमासस्य १२ दिनाङ्के साक्षीगोपाल-नामके स्थाने प्रतिष्ठापित: । पण्डित: गोपबन्धुदास:, पण्डित: नीलकण्ठदास:, पण्डित: ड. गोदावरीशमिश्र:, पण्डित: कृपासिन्धुमिश्र:, पण्डित: लिङ्गराजमिश्र:, आचार्य: हरिहरदास:, पण्डित: नन्दकिशोरदास: च इत्येषां देशभक्तानां मिलितप्रयासेन अयं नि:शुल्क वनविद्यालय: तदानीम् आभारतं प्रतिष्ठाम् अलभत । पञ्चसखा: मिलित्वा समाजसेवां कुर्वन्त: शिक्षाविकासं च कारयन्त: स्वाधीनतान्दोलनाय जनान् प्रेरयन्ति स्म ।



## परियोजनाकार्यम्

**१. स्वप्रदेशस्य स्वतन्त्रतासंग्रामिणां नामानि संगृह्य तेषु एकस्य सचित्रां संक्षिप्तजीवनीं लिखत ।**

**२. वन्यापीडितानां साहाय्यार्थं स्वकीयाम् एकां कार्ययोजनां लिखत ।**

DRAFT

# षष्ठः पाठः
# वीराङ्गना शुकदेवी

**विषय प्रवेशः**

कुमारः– सुभद्रे ! ह्यः किमर्थं विद्यालयं नागतवती ?

सुभद्रा– ह्यः महिलादिवसः आसीत् । ग्रामे सभा आयोजिता । बहवः महिलाः नेतारः च भाषितवन्तः । अहं तत्र गतवती ।

कुमारः– आनन्दस्य विषयः । सम्प्रति नारीशक्तिविकाशाय विविधा योजना प्रचलति ।

सुभद्रा– प्राचीनकालात् नारीणां महत्त्वं बहुधा वर्णितम् ।

कुमारः– आम्, सत्यम् । अस्माकम् ओडिशाप्रदेशे बाङ्कीराज्यस्य राज्ञी शुकदेवी अतीव वीरा रमणी आसीत् ।

सुभद्रा– राज्ञ्याः शुकदेव्याः विषये सर्वे जानन्तु इति चर्चा अभवत् ।

कुमारः– का चर्चा आसीत् ?

सुभद्रा– अहं सर्वं न स्मरामि, केवलं ‘जयतु राज्ञी शुकदेवी– इति ध्वनिः प्रबलः आसीत् ।

(शिक्षकः प्रविश्य कथयति - युवयोः वार्तालापः मया श्रुतः तद्विषये अहं विस्तरेण वर्णयामि ।)

- - -

प्राचीनकाले उत्कलखण्डे विभिन्नस्थानेषु नरपतीनां शासनमासीत् । तेषु महानदीतीरे बाङ्कीराज्ये धनञ्जयश्रीचन्दनः राजा आसीत् । तस्य कदाचित् राज्ञा गजपतिना गोपीनाथदेवेन सह युद्धमभवत् । युद्धे राज्ञः धनञ्जयश्रीचन्दनस्य मृत्युरभवत् ।

एतत् श्रुत्वा तस्य राज्ञी शुकदेवी(शुकदेई) दुःखेन अधीरा अभवत् । सा शीघ्रं सेनापतिम् आहूतवती । तेन सह परामर्शं कृतवती । सेनापतिः उक्तवान्- देवि ! गजपतेः गोपीनाथदेवस्य सैन्यबलम् अधिकम् । अधुना तेन सह युद्धं न कृत्वा सन्धिस्थापनं समीचीनं भवेत् । राज्ञी उक्तवती- न हि न हि सेनापते ! जन्मभूमेः सुरक्षार्थं वयं युद्धं करिष्यामः । बाङ्कीराज्यस्य अधिष्ठात्री देवी माता चर्च्चिका अस्माकं सहायिका । चिन्तां मा कुरु ।

DRAFT

युद्धभूमिं गत्वा स्वयम् अहं खड्गचालनां करिष्यामि । स्वाधीनतारक्षणार्थं यदि मम मृत्युः भवेत् तर्हि तदेव मे गौरवं स्यात् ।

भयङ्करं युद्धम् अभवत् । गजपतेः केचन सैन्याः मृताः केचन क्षतविक्षताः पलायिताः च । गोपीनाथदेवः वन्दी भूत्वा राज्ञीसम्मुखम् आगतः । युद्धस्थलं नीरवं निष्पन्दम् आसीत् । राज्ञी अवश्यं पतिहत्यायाः प्रतिशोधं नेष्यति इति सर्वे अचिन्तयन् ।

शुकदेवी उक्तवती - गजपते ! अन्याययुद्धेन त्वं मम पतिं निहतवान् । पतिविच्छेदेन अहं दारुणदुःखम् अनुभवामीति सत्यम् । परन्तु अहम् एका नारी । तव पत्नी अपि एका नारी । तव मृत्युदण्डेन तव पत्नी अपि मदनुरूपां विरहयन्त्रणाम् अनुभवेत् । तव पत्न्याः विधवावेशं द्रष्टुं नाहं समर्था । अतः त्वां बन्धनात् मुक्तं करोमि । पत्नी तव आगमनपथं निरीक्षमाणा अश्रुपूर्णनयना प्रतीक्षां करोति । विलम्बं न कुरु । याहि गजपते ! याहि । उच्चैः निनादः अजायत - जयतु मातः चर्च्चिके ! जयतु बाङ्कीराज्यम् ! जयतु वीराङ्गने क्षमामयि शुकदेवि !

एतादृशी क्षमाशीलता अपूर्वा । बाङ्कीराज्यस्य राज्ञ्याः शुकदेव्याः अमरचरितम् अद्यापि विश्वेतिहासे स्वर्णाक्षरेण लिपिबद्धं भवति । मातृशक्तेः महिमानं प्रकटयति च ।



## अवधेयम्

**शब्दार्थाः:-**

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| नरपतीनाम् | राजाम् सम्राजी | राजाओं का रानी | of the kings | ନରପତିମାନଙ୍କର |
| राज्ञी | सम्राजी | रानी | queen | ରାଣୀ |
| वीराङ्गना | वीरा रमणी | वीरा नारी | valorous woman | ବୀର ନାରୀ |
| आहूतवती | आह्वानम् कृतवती | आह्वान किया | called | ଡାକିଲେ |
| उक्तवान् | कथितवान् | बोला | told | କହିଲେ |
| समीचीनम् | युक्तियुक्तम् | यथार्थ | appropriate | ଉଚିତ |
| सुरक्षार्थम् | रक्षानिमित्तम् | सुरक्षा के लिए | for protection | ସୁରକ୍ଷାପାଇଁ |
| अधिष्ठात्री | मुख्या आराध्या | स्थानकी मुख्या अधिकारिणी | governing (deity) | କ୍ଷେତ୍ରର ଅଧୀଶ୍ୱରୀ |
| मा | न | नहीं | not | ନାହିଁ / ନୁହେଁ |
| गत्वा | गमनं कृत्वा | जा कर | approaching | ଯାଇ |
| तर्हि | तस्मात् हेतो: | उसके लिए | for that | ତେବେ |
| केचन | कति | कुछ | some | କେତେକ |
| राज्ञीसम्मुखम् | सम्राज्ञी निकटे | रानी के सम्मुख | before the queen | ରାଣୀଙ୍କ ସମ୍ମୁଖକୁ |
| भूत्वा | भूत्वा | होकर | by becoming | ହୋଇ |
| निष्पन्दम् | निश्चलम् | निश्चल | motionless | ନିଶ୍ଚଳ |
| अचिन्तयन् | चिन्ताम् अकुर्वन् | चिन्तन किया | thought (made plan) | ଚିନ୍ତାକଲେ |
| निहतवान् | हतवान् | वध किया | killed | (ତୁମେ)ମାରିଲ |
| पतिविच्छेदेन | पतिविरहेण | पति के वियोग से | due to the death of the husband | ସ୍ୱାମୀଙ୍କ ବିରହରେ / ବିୟୋଗରେ |
| अनुभवामि | अनुभवं करोमि | अनुभव किया | experienced | ଅନୁଭବ କରୁଛି |
| मदनुरूपम् | मम तुल्याम् | मुझ जैसे | like me | ମୋ ପରି |
| द्रष्टुम् | दर्शनं कर्त्तुम् | देखने के लिए | for perceving | ଦେଖିବାକୁ |
| निरीक्षमाणा | निरीक्षणं कुर्वती | देख देखकर | beholding | ଚାହିଁ ଚାହିଁ |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| प्रतीक्षाम् | प्रतीक्षाम् | प्रतीक्षा / इंतजार | waiting | ଅପେକ୍ଷା |
| अश्रुपूर्णनयना | लोतकपूर्ण नेत्रा | अश्रुपूर्ण नयनों से | eyes filled with tears | ଲୁହଭରା ଆଖିରେ |
| उच्चैः | उच्चस्वरेण | उच्चस्वरसे | by loud voice | ଉଚ୍ଚସ୍ୱରରେ |
| निनादः | उच्चध्वनिः | उच्च ध्वनि | great sound | ଶବ୍ଦ / ଧ୍ୱନି |
| अजायत | अभवत् | उत्पन्न हुआ | produced | ସୃଷ୍ଟି ହେଲା |
| जयतु | सर्वोत्कर्षेण तिष्ठतु | जय हो | be supreme | ଜୟ ହେଉ |
| एतादृशी | एतत्सदृशं | इसकी जैसी | like this | ଏପରି |
| अपूर्वा | यस्याः पूर्वं नास्ति स | पहले से न था | unprecedented | ଯାହା ପୂର୍ବରୁ ଦେଖା ଯାଇନଥିଲା |
| अद्यापि | सम्प्रति | आज, अभी | at present | ଆଜି ମଧ୍ୟ |
| विश्वेतिहासे | विश्वस्य इतिहासे | विश्व इतिहास में | in the world | ବିଶ୍ୱ ଇତିହାସରେ |
| स्वर्णाक्षरेण | सुवर्णाक्षरेण | स्वर्णाक्षर में | by golden letter | ସ୍ୱର୍ଣ୍ଣାକ୍ଷରରେ |
| महिमानम् | महत्त्वम् | महिमा को | greatness | ମହିମାକୁ |
| प्रकटयति | प्रकटनं करोति | प्रकट करता है | expresses | ପ୍ରକାଶ କରୁଛି । |

**ବି.ଦ୍ର. :** ଶୁକଦେବୀ, ଓଡ଼ିଆରେ ଶୁକଦେଈ, ସେ ସୁକନ୍ୟା ଦେବୀ ନାମରେ ମଧ୍ୟ ପରିଚିତ ଥିଲେ ।

**सन्धिविच्छेदः -**

शासनमासीत् = शासनम् + आसीत्
वीराङ्गना = वीरा + अङ्गना
राजासीत् = राजा + आसीत्
युद्धमभवत् = युद्धम् + अभवत्
मृत्युरभवत् = मृत्युः + अभवत्
तदेव = तत् + एव
नीरवम् = निः + रवम्
विच्छेदेन = वि + छेदेन
अनुभवामीति = अनुभवामि + इति
मदनुरूपाम् = मत् + अनुरूपाम्
निरीक्षमाणा = निः + ईक्षमाणा
विश्वेतिहासे = विश्व + इतिहासे
स्वर्णाक्षरेण = स्वर्ण + अक्षरेण

## प्रश्नावली

१. **एकपदेन उत्तरं लिखत –**

(क) का वीराङ्गना ?

(ख) बाङ्कीराज्यं कुत्र आसीत् ?

(ग) बाङ्कीनरपतेः नाम किम् आसीत् ?

(घ) बाङ्कीराज्यस्य अधिष्ठात्री देवी का भवति ?

(ङ) कः वन्दी भूत्वा राज्ञीसम्मुखम् आगतः ?

(च) कस्याः अमरचरितं स्वर्णाक्षरेण लिपिबद्धं भवति ?

२. **शून्यस्थानपूरणं कुरुत–**

(क) राज्ञी शुकदेवी दुःखेन .................... अभवत् ।

(ख) राज्ञी प्रतिशोधं................ ।

(ग) जयतु .................. चर्च्चिके !।

(घ) भयङ्करं युद्धम् .................. ।

(ङ) वयं .................. करिष्यामः ।

(च) केचन .................. ।

(नेष्यति, अभवत्, पलायिताः, युद्धम्, मातः, अधीरा)

३. **मातृभाषया अनुवादं कुरुत–**

(क) गजपतेः केचन सैन्याः मृताः ।

(ख) राज्ञी अवश्यं पतिहत्यायाः प्रतिशोधं नेष्यति ।

(ग) याहि गजपते ! याहि ।

(घ) तव पत्नी अपि एका नारी ।

(ङ) अन्याययुद्धेन त्वं मम पतिं निहतवान् ।

(च) स्वयम् अहं खड्गचालनां करिष्यामि ।

DRAFT

## ४. स्तम्भमेलनं कुरुत–

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| वीराङ्गना | गोपीनाथदेवस्य |
| बाङ्कीराज्यम् | मुक्तम् |
| गजपतेः | नेष्यामि |
| महिमानं | चर्च्चिका |
| बन्धनात् | शुकदेवी |
| प्रतिशोधं | प्रकटयति |

## ५. संस्कृतेन वाक्यानि रचयत –

(क) आसीत् (ख) कदाचित् (ग) उक्तवती

(घ) निहतवान् (ङ) प्रकटयति (च) याहि

## ६. सन्धिं कुरुत –

(क) वीरा + अङ्गना

(ख) मृत्युः + अभवत्

(ग) अनुभवामि + इति

(घ) अद्य + अपि

(ङ) विश्व + इतिहासे

(च) तत् + एव

## ७. शुद्धम् उत्तरं चिनुत–

(क) का वीराङ्गना आसीत् ?

(i) मायादेवी, (ii) शुकदेवी, (iii) सरलादेवी, (iv) रमादेवी

(ख) बाङ्कीराज्यस्य कः राजा आसीत् ?

(i) दिव्यसिंहदेवः, (ii) अनङ्गभीमदेवः, (iii) गोपीनाथदेवः, (iv) धनञ्जयश्रीचन्दनः

(ग) बाङ्कीराज्यस्य का अधिष्ठात्री देवी ?

(i) शारला, (ii) विमला, (iii) चर्च्चिका, (iv) भगवती



DRAFT

(घ) युद्धे क: वन्दी अभवत् ?

(i) गोपीनाथदेव:, (ii) धनञ्जयश्रीचन्दन:, (iii) सेनापति:, (iv) मन्त्री

(ङ) का अपूर्वा ?

(i) दया, (ii) क्षमाशीलता, (iii) प्रीति:, (iv) बन्धुता

(च) प्राचीनकाले केषां शासनम् आसीत् ?

(i) मुख्यमन्त्रिणाम्, (ii) राष्ट्रपतीनाम्, (iii) प्रधानमन्त्रिणाम्, (iv) नरपतीनाम्

८. **पूर्णवाक्येन उत्तरं लिखत–**

(क) युद्धे कस्य मृत्यु: अभवत् ?

(ख) राज्ञी शीघ्रं कम् आहूतवती ?

(ग) माता चर्च्चिका केषां सहायिका ?

(घ) कीदृशं युद्धम् अभवत् ?

(ङ) युद्धस्थलं कीदृशम् अभवत् ?

(च) राज्ञी किं द्रष्टुं न समर्था इति उक्तवती ?

९. **प्रायेण पञ्चाशता (५०) पदै: मातृभाषया उत्तरं लिखत ।**

राज्या: शुकदेव्या: वीरत्वं वर्णयत ।



## वयं जानीम:

(१) **पृथिव्यां भारतं श्रेष्ठं भारते उत्कल: श्रुत: ।**

**उत्कलस्य समो देशो नास्ति कुत्र महीतले ।।**

(२) **यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ।**

**यत्रैतास्तु न पूज्यन्ते सर्वा: तत्राफला: क्रिया: ।।**

(୧) ପୃଥିବ୍ୟାଂ ଭାରତଂ ଶ୍ରେଷ୍ଠଂ ଭାରତେ ଉତ୍କଳଃ ଶ୍ରୁତଃ ।

ଉତ୍କଳସ୍ୟ ସମୋଦେଶୋ ନାସ୍ତି କୁତ୍ର ମହୀତଳେ ।।

(୨) ଯତ୍ର ନାର୍ଯ୍ୟସ୍ତୁ ପୂଜ୍ୟନ୍ତେ ରମନ୍ତେ ତତ୍ର ଦେବତାଃ ।

ଯତ୍ରୈତାସ୍ତୁନ ପୂଜ୍ୟନ୍ତେ ସର୍ବାଃ ତତ୍ରାଫଳାଃ କ୍ରିୟାଃ ।।

DRAFT

## सप्तमः पाठः
# गीता सुगीता कर्तव्या

### विषयप्रवेशः

कुरुक्षेत्रे श्रीगीता-जयन्ती-महोत्सवः आचरितः । तत्र बहवः जनाः अगच्छन् । रमेशः अपि स्वजनकेन सह तत्र गतवान् । कथावाचकः गीतायाः विषये वर्णयति स्म –



**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ।।**

इदं श्रुत्वा रमेशः पितरम् अपृच्छत् ''पितः ! गीता का ? कथं सुगीता कर्तव्या ?"

**पिता –** पुत्र ! बहुभ्यः वर्षेभ्यः पूर्वं कुरुक्षेत्रे कौरवाणां पाण्डवानां च मध्ये संग्रामः अभवत् । तस्मिन् युद्धे स्वबान्धवान् दृष्ट्वा अर्जुनः युद्धं कर्तुं न इच्छति स्म । तदा भगवान् श्रीकृष्णः युद्धपराङ्मुखम्



DRAFT

अर्जुनं कर्तव्यपालनार्थम् उपदिष्टवान् । श्रीकृष्णस्य उपदेश: एव श्रीमद्भगवद्गीता अस्ति । गीतायाम् अमृततुल्या: उपदेशा: सन्ति ।

**रमेश : –** तर्हि सुगीता कर्तव्या इत्यस्य क: आशय: ?

**पिता –** अस्य आशय: अस्ति यत् गीताया: अभ्यास: सम्यक् रूपेण करणीय: । गीता उत्तमभावेन पठितव्या । कार्यक्षेत्रे जीवनक्षेत्रे च गीताया: उपदेशा: अनुपालनीया: । अस्मिन् पाठे वयं श्रीमद्भगवद्गीताया: काँश्चन श्लोकान् पठाम: । वयं श्लोकान् मिलित्वा गायाम: अपि ।

**दु:खेष्वनुद्विग्नमना: सुखेषु विगतस्पृह: ।**
**वीतरागभयक्रोध: स्थितधीर्मुनिरुच्यते ।। १ ।।**

**पदच्छेद :–** दु:खेषु अनुद्विग्नमना: सुखेषु विगतस्पृह: वीत-राग-भय-क्रोध: स्थितधी: मुनि: उच्यते ।

**अन्वय :–** दु:खेषु अनुद्विग्नमना: सुखेषु विगतस्पृह: वीत-राग-भय-क्रोध: मुनि: स्थितधी: (इति) उच्यते ।

**भावार्थ :–** य: मनुष्य: आपत्कालेषु उद्वेगं न अनुभवति । य: सुखप्राप्तये अपि नि:स्पृह: (इच्छारहित:) भवति । इच्छा, आसक्ति:, भयम्, क्रोध:, इत्येतेभ्य: य: मुक्त: भवति । स: मननशीलपुरुष: स्थितप्रज्ञ: भवति ।

**ଭାବାର୍ଥ :** ଯେଉଁ ମଣିଷ ବିପଦ ସମୟରେ ମଧ୍ୟ ବିଚଳିତ ହୁଏ ନାହିଁ । ଯିଏ ସୁଖପ୍ରାପ୍ତି ହେଲେ ମଧ୍ୟ ବିଚଳିତ ହୁଏ ନାହିଁ । ଯିଏ ସୁଖପ୍ରାପ୍ତି ହେଲେ ମଧ୍ୟ ନିଃସ୍ପୃହ(ଇଚ୍ଛାରହିତ) ରହେ । ଯିଏ ଇଚ୍ଛା, ଆସକ୍ତି, ଭୟ, କ୍ରୋଧ ଇତ୍ୟାଦି ଗୁଡ଼ିକରୁ ଦୂରେଇ ରହେ, ସେହି ମନନଶୀଳ ମଣିଷ ହିଁ ପ୍ରକୃତରେ ସ୍ଥିତପ୍ରଜ୍ଞ ଅଟେ ।

**क्रोधाद्भवति सम्मोह: सम्मोहात्स्मृतिविभ्रम: ।**
**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।। २ ।।**

**पदच्छेद :–** क्रोधात् भवति सम्मोह: सम्मोहात् स्मृतिविभ्रम: स्मृतिभ्रंशात् बुद्धिनाश: बुद्धिनाशात् प्रणश्यति ।

**अन्वय : –** क्रोधात् सम्मोह: भवति । सम्मोहात् स्मृतिविभ्रम: (भवति) । स्मृतिभ्रंशात् बुद्धिनाश: (भवति ) । बुद्धिनाशात् (जन:) प्रणश्यति ।

**भावार्थ :–** मानवस्य यदा क्रोध: भवति तदा क्रोधात् अविवेक: उत्पद्यते । स: मानव: अविवेकात् आत्मानं विस्मरति । किं योग्यं किञ्च अयोग्यम् इति अविचिन्त्य क्रोधात् मोहग्रस्त: भवति । यदा अधिक: मोह: भवति तदा मनुष्यस्य स्मृति: निष्क्रिया नष्टा च भवति । स्मृते: नाशात् बुद्धि: नश्यति । बुद्धे: नाशात् स: मनुष्य: विनाशं प्राप्नोति ।

DRAFT

**ଭାବାର୍ଥ :** ମଣିଷର ଯେବେ କ୍ରୋଧ ହୁଏ ତେବେ ସେହି କ୍ରୋଧରୁ ଅବିବେକିତା ଜାତ ହୁଏ । ଅବିବେକ କାରଣରୁ ସେ ନିଜକୁ ଭୁଲିଯାଏ ଏବଂ କ'ଣ ଉଚିତ କ'ଣ ଅନୁଚିତ କିଛି ଚିନ୍ତା କରିପାରେ ନାହିଁ । ଯେତେବେଳେ ମୋହ ଅଧିକ ହୁଏ, ସେତେବେଳେ ତା'ର ସ୍ମୃତିଶକ୍ତି ହ୍ରାସ ହୁଏ । ସ୍ମୃତି ହରାଇଲେ ତା'ର ବୁଦ୍ଧି ନଷ୍ଟ ହୁଏ । ବୁଦ୍ଧି ନଷ୍ଟ ହେଲେ ମଣିଷ ବିନାଶକୁ ପ୍ରାପ୍ତ କରେ ।

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन: ।। ३ ।।**

**पदच्छेद: –** तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिन: तत्त्वदर्शिन: ।

**अन्वय: –** तत्त्वदर्शिन: ज्ञानिन: ते(तुभ्यम्) ज्ञानम् उपदेक्ष्यन्ति ।
तद् (ज्ञानम्) प्रणिपातेन सेवया परिप्रश्नेन(च) विद्धि ।

**भावार्थ: –** भगवान् श्रीकृष्ण: अर्जुनम् उपदिशति– हे अर्जुन ! भवान् गुरो: समीपं गत्वा यथार्थज्ञानं प्राप्तुं प्रयासं करोतु । भवान् विनीत: जिज्ञासु: च भूत्वा गुरो: सेवां करोतु । तत्त्वज्ञानी गुरु: भवते ज्ञानं प्रदास्यति । यत: ये सत्यस्य दर्शनं कृतवन्त: ते एव यथार्थज्ञानिन: भवन्ति ।

**ଭାବାର୍ଥ :** ଭଗବାନ ଶ୍ରୀକୃଷ୍ଣ ଅର୍ଜୁନଙ୍କୁ କହିଲେ- ହେ ଅର୍ଜୁନ ! ତୁମେ ଉଚିତ ଗୁରୁଙ୍କ ଶରଣରେ ଯଥାର୍ଥ ଜ୍ଞାନ ଲାଭ କରିବାକୁ ଚେଷ୍ଟା କର । ତୁମେ ନମ୍ର ଭାବରେ ପ୍ରଶ୍ନ ପଚାର ଓ ଗୁରୁ ସେବା କର । ସତ୍ୟକୁ ଅନୁଭବ କରିଥିବା ସେହି ତତ୍ତ୍ୱଜ୍ଞାନୀ ଗୁରୁମାନେ ତୁମ୍ଭଙ୍କୁ ଜ୍ଞାନ ପ୍ରଦାନ କରିବେ ।

**श्रद्धावाँल्लभते ज्ञानं तत्पर: संयतेन्द्रिय: ।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।। ४ ।।**

**पदच्छेद: –** श्रद्धावान् लभते ज्ञानम् तत्पर: संयतेन्द्रिय: ज्ञानम् लब्ध्वा पराम् शान्तिम् अचिरेण अधिगच्छति ।

**अन्वय: –** संयतेन्द्रिय: तत्पर: श्रद्धावान् (मनुष्य:) ज्ञानं लभते । ज्ञानं लब्ध्वा (स:) अचिरेण परां शान्तिम् अधिगच्छति ।

**भावार्थ: –** य: श्रद्धालु: मनुष्य: दिव्यज्ञानं प्राप्तुं निरन्तरं प्रयासं करोति । तथैव य: मनुष्य:इन्द्रियाणि स्ववशे करोति । स: मनुष्य: दिव्यज्ञानं प्राप्स्यति । तादृशं दिव्यं ज्ञानं प्राप्य स: पुरुष: जीवने अनन्तम् आनन्दं प्राप्नोति ।

**ଭାବାର୍ଥ :** ଯିଏ ଶ୍ରଦ୍ଧା ଭାବନାରେ ନିଜ ଇନ୍ଦ୍ରିୟଗୁଡ଼ିକୁ ନିୟନ୍ତ୍ରିତ କରି ଜ୍ଞାନ ଲାଭ କରିବାକୁ ଚେଷ୍ଟା କରେ ସେ ହିଁ ଦିବ୍ୟଜ୍ଞାନ ଲାଭ କରେ । ସେହି ଦିବ୍ୟଜ୍ଞାନ ଲାଭ କରିବା ପରେ ମନୁଷ୍ୟ ଜୀବନରେ ଅନନ୍ତ ଆନନ୍ଦକୁ ପ୍ରାପ୍ତ କରିଥାଏ ।

**अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च ।**
**निर्ममो निरहङ्कार: समदु:खसुख: क्षमी ।। ५ ।।**

**पदच्छेद: –** अद्वेष्टा सर्वभूतानां मैत्र: करुण: एव च निर्मम: निरहङ्कार: समदु:खसुख: क्षमी ।

**अन्वय: –** (य:) सर्वभूतानाम् अद्वेष्टा मैत्र: च करुण: एव निर्मम: निरहङ्कार: समदु:खसुख: क्षमी (अस्ति, स: एव मम प्रिय: भवति ।)

**भावार्थ: –** हे अर्जुन ! य: कस्यामपि परिस्थितौ विचलित: न भवति । य: ईर्ष्यारहित: समस्तप्राणिनां कृते मित्रभावयुत: दयालु: च भवति । य: ममत्वरहित:, अहङ्कारविहीन:, सुखदु:खेषु समभावयुक्त: क्षमाशील: च भवति तादृश: पुरुष: भगवत: अत्यन्तं प्रिय: भक्त: भवति ।

**ଭାବାର୍ଥ :** ହେ ଅର୍ଜୁନ ! ଯେଉଁ ବ୍ୟକ୍ତି ସମସ୍ତ ପରିସ୍ଥିତିରେ ବିଚଳିତ ହୁଏ ନାହିଁ, ଯିଏ ଈର୍ଷ୍ୟାନ୍ୱିତ ନ ହୋଇ ସମସ୍ତ ପ୍ରାଣୀଙ୍କୁ ମିତ୍ର ଭାବନା ଏବଂ ଦୟା ଭାବରେ ସମଭାବାପନ୍ନ ଏବଂ କ୍ଷମାଶୀଳ ହୋଇଥାଏ, ସେହି ବ୍ୟକ୍ତି ମୋର (ଭଗବାନଙ୍କର) ଅତ୍ୟନ୍ତ ପ୍ରିୟ ।

**सन्तुष्ट: सततं योगी यतात्मा दृढनिश्चय: ।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्त: स मे प्रिय: ।। ६ ।।**

**पदच्छेद: –** सन्तुष्ट: सततम् योगी यतात्मा दृढनिश्चय: मयि अर्पितमनोबुद्धि: य: मद्भक्त: स: मे प्रिय: ।

**अन्वय: –** य: योगी सततं सन्तुष्ट: यतात्मा दृढनिश्चय: मयि (च) अर्पितमनोबुद्धि: (भवति) स: मद्भक्त: मे प्रिय: (भवति) ।

**भावार्थ: –** हे पार्थ ! य: निरन्तरं सन्तुष्ट: भवति । अर्थात् कस्यापि वस्तुन: अभावात् कदापि असन्तुष्ट: न भवति । य: मन: इन्द्रियाणि च विजित्य संयमी भवति । य: स्वबुद्ध्या परमेश्वरस्य स्वरूपं स्थिरीकरोति । यश्च मन: बुद्धिं च ईश्वरे समर्पयति । स: मनुष्य: मम अतीव प्रियतम: भक्त: भवति ।

**ଭାବାର୍ଥ :** ହେ ପାର୍ଥ ! ଯିଏ ନିରନ୍ତର ସନ୍ତୁଷ୍ଟ ରହେ, କେବେ ମଧ୍ୟ ଅସନ୍ତୋଷ ପ୍ରକାଶ କରେ ନାହିଁ, ଯିଏ ମନ ଏବଂ ଇନ୍ଦ୍ରିୟକୁ ଜୟ କରିଥାଏ, ଯିଏ ଯୋଗଯୁକ୍ତ ରହି ପରମେଶ୍ୱରଙ୍କ ସ୍ୱରୂପରେ ସ୍ଥିର ରହେ, ଯିଏ ନିଜର ମନ ଓ ବୁଦ୍ଧିକୁ ଈଶ୍ୱରଙ୍କଠାରେ ସମର୍ପଣ କରିଥାଏ ସେ ହିଁ ମୋର (ଈଶ୍ୱରଙ୍କ) ପ୍ରିୟ ଭକ୍ତ ।

**यस्मान्नोद्विजते लोक: लोकान्नोद्विजते च य: ।**
**हर्षामर्षभयोद्वेगैर्मुक्तो य: स च मे प्रिय: ।। ७ ।।**

**पदच्छेद: –** यस्मात् न उद्विजते लोक: लोकात् न उद्विजते च य: हर्ष-अमर्ष-भय-उद्वेगै: मुक्त: य: स: च मे प्रिय: ।

**अन्वय : –** यस्मात् लोकः न उद्विजते, यः च लोकात् न उद्विजते, यः च हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः सः मे प्रियः (भवति) ।

**भावार्थ : –** हे अर्जुन ! यस्मात् मनुष्यात् कोऽपि मनुष्यः प्राणी वा उद्विग्नः न भवति । यश्च मनुष्यः अन्यस्मात् जनात् प्राणिनः वा उद्विग्नः न भवति । यश्च हर्षेण, ईर्ष्यया, भीत्या, चिन्तया च रहितः भवति । सः मम अतीव प्रियः भक्तः भवति ।

**ଭାବାର୍ଥ :** ହେ ଅର୍ଜୁନ ! ଯେଉଁ ବ୍ୟକ୍ତି ଅନ୍ୟକୁ ବିଚଳିତ କରେ ନାହିଁ ଏବଂ ସେ ଅନ୍ୟଠାରୁ ବିଚଳିତ ହୁଏ ନାହିଁ, ଯିଏ ହର୍ଷ, ଈର୍ଷ୍ୟା, ଭୟ ଓ ଚିନ୍ତାରୁ ମୁକ୍ତ ରହେ, ସେହି ବ୍ୟକ୍ତି ହିଁ ମୋର ଅତ୍ୟନ୍ତ ପ୍ରିୟ ଭକ୍ତ ଅଟେ ।

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।। ८ ।।**

**पदच्छेद : –** अनुद्वेगकरम् वाक्यम् सत्यम् प्रियहितम् च यत् स्वाध्यायाभ्यसनम् च एव वाङ्मयम् तपः उच्यते ।

**अन्वय : –** यद् वाक्यम् अनुद्वेगकरं सत्यं प्रियहितं च (तथा) स्वाध्यायाभ्यसनं च एव वाङ्मयम् तपः उच्यते ।

**भावार्थ : –** यत् अनुद्वेगकरं (भाषणम् उद्वेगं न जनयति), सत्यं, प्रियकरं, हितकरं, च वचनं स्यात्, तत् वाङ्मयम् तपः इति कथ्यते । शास्त्रादीनां स्वाध्यायः, तेषाम् अभ्यासः च वाचिकं तपः कथ्यते । तथा स्वाध्यायः अभ्यासश्चापि यथाविधि वाङ्मयम् तपः इति उच्यते ।अतः विद्यार्थिभिः स्मरणीयं यत् –

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।**
**तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ।।**

**ଭାବାର୍ଥ :** ଉଦ୍‌ବେଗରହିତ ବଚନ କହିବା, ସତ୍ୟ କହିବା, ପ୍ରିୟବଚନ କହିବା, ହିତକର ବାଣୀ କହିବା ଏବଂ ଶାସ୍ତ୍ରମାନଙ୍କର ଅଧ୍ୟୟନ ଓ ଅଭ୍ୟାସ କରିବା ହେଉଛି ବାଙ୍ମୟ ତପସ୍ୟା । ଏଣୁ ବିଦ୍ୟାର୍ଥୀମାନେ ସ୍ମରଣ କରିବା ଉଚିତ – ମଧୁର କଥାରେ ସବୁ ପ୍ରାଣୀ ସନ୍ତୁଷ୍ଟ ହୁଅନ୍ତି । ତେଣୁ ସେହିପରି ମଧୁରକଥା କହିବା ଉଚିତ । ମଧୁର କଥା କହିବାପାଇଁ କୁଣ୍ଠା ପ୍ରକାଶ କରିବା ଉଚିତ ନୁହେଁ ।

DRAFT



## अवधेयम्

**शब्दार्था:-**

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| महोत्सव: | पर्व | त्यौहार | Festival | ଉତ୍ସବ |
| कथावाचक: | कथा प्रवचनकारी | कथा वाचक | The narrator/the proponent | ପ୍ରବଚନ ଦେଉଥିବା ବ୍ୟକ୍ତି |
| सुगीता | गानमयी | अच्छी तरह से गाई जाने वाली | Melodious Song | ସଂଗୀତମୟ |
| युद्धपराङ्मुखम् | युद्ध-विमुखम् | युद्ध विमुख | The war-averse | ଯୁଦ୍ଧ ବିମୁଖ |
| अमृततुल्या: | अमृतेन सदृशा:/ अति महत्त्वपूर्णा: | अमृत के समान | like nectar | ଅମୃତ ସମାନ |
| अनुद्विग्नमना: | यस्य मन: विचलितं न भवति | अविचलि त मन वाला | Person of tranquil mind | ସ୍ଥିରମନା |
| विगतस्पृह: | अनुरागरहित: | आसक्ति रहित | Detached | ଆସକ୍ତି ରହିତ |
| वीत-राग-भय-क्रोध: | वीत: राग: भयं क्रोध: यस्य | वासना, भय और क्रोध से रहित | Free from attachment, fear and anger | ବାସନା, ଭୟ ଏବଂ କ୍ରୋଧମୁକ୍ତ |
| स्थितधी: | स्थिर मतिमान् | स्थिर मन वाला | steady minded | ସ୍ଥିରବୁଦ୍ଧିସମ୍ପନ୍ନ |
| मुनि: | यति: | तपस्वी | The sage | ମନନଶୀଳ |
| सम्मोह: | किंकर्तव्यविमूढता | कर्तव्य अकर्तव्य का अविवेक | Delusion | ମୋହଗ୍ରସ୍ତ |
| स्मृतिविभ्रम: | स्मृतिनाश: | स्मरणशक्ति का नाश होना | Loss/failure of memory | ସ୍ମୃତି ନାଶ |
| श्रद्धावान् | श्रद्धालु: | श्रद्धा से युक्त | Devoted | ଶ୍ରଦ୍ଧାଳୁ |
| संयतेन्द्रिय: | इन्द्रियसंयमी | संयमित इन्द्रियों वाला | One who has controlled his senses | ଇନ୍ଦ୍ରିୟ ସଂଯମୀ |
| प्रणिपातेन | नमस्कारेण | प्रणाम के द्वारा | by bowing down /by salutation | ବିନମ୍ର ଭାବରେ ପ୍ରଣାମ କରି |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| परिप्रश्नेन | पुन: पुन: प्रश्नकरणेन | प्रश्नों के द्वारा | by questioning (with humility) | ବାରମ୍ୱାର ପ୍ରଶ୍ନ ପଚାରି |
| उपदेक्ष्यन्ति | उपदेशं प्रदास्यन्ति | उपदेश देंगे | They will preach | ଉପଦେଶ କରିବେ |
| तत्त्वदर्शिन: | दार्शनिका: | तत्त्वज्ञानी | Those who have realized the Truth | ତତ୍ତ୍ୱଜ୍ଞାନୀମାନେ |
| विद्धि | जानीहि | तुम जानो | (You should) Know | ଜାଣ |
| अद्वेष्टा | द्वेषरहित: | द्वेष न करने वाला | One who never hates | ଦ୍ୱେଷଭାବନା ରହିତ |
| सर्वभूतानां | सर्वेषां प्राणिनाम् | सभी प्राणियों का | of all beings | ସମସ୍ତ ପ୍ରାଣୀଙ୍କର |
| मैत्र: | मैत्रीपूर्ण: | मित्रता के भाववाला | Friendly | ମିତ୍ରତାପୂର୍ଣ୍ଣ |
| करुण: | दयार्द्रचित्त: | करुणावान् | Compassionate | ଦୟାଭାବଯୁକ୍ତ |
| निर्मम: | ममत्व-भावनारहित: | ममत्वकर भावना से विहीन | Free from the sense of 'mine' | ମମତ୍ୱ ରହିତ |
| निरहङ्कार: | गर्व हीन: | अहंकार रहित | Egoless | ଅହଂକାରହୀନ |
| समदु:खसुख: | दु:खेषु सुखेषु च समानभाव-शील: | सुख और दु:ख में समान भाव वाला | Same in pain and pleasure | ଦୁଃଖ ଓ ସୁଖରେ ସମଭାବାପନ୍ନ |
| क्षमी | क्षमावान् | क्षमाशील | Endowed with forbearance | କ୍ଷମାଶୀଳ |
| उद्विजते | उद्वेगं गच्छति | उद्विग्न होता है | agitated | ଉତ୍ତେଜିତ କରେ |
| लोक: | जगत् | संसार | The world | ସଂସାର |
| हर्षामर्षभयोद्वेगै: | आह्लाद-क्रोध-भय-चिन्तादिभि: | हर्ष, क्रोध,भय और चिंताओं से | From joy, impatience, fear and anxiety | ହର୍ଷ କ୍ରୋଧ ଭୟ ଓ ଉଦ୍‌ବେଗରେ |
| यतात्मा | संयमी | यति, जिसने इन्द्रियों को अपने नियन्त्रण में कर लिया है | Self– Restrained | ଆତ୍ମ ନିୟନ୍ତ୍ରିତ |
| दृढनिश्चय: | दृढ: निश्चय: यस्य स: | दृढ़ निश्चय वाला | Firmly resolute/ determined | ଦୃଢ଼ମନା |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| अर्पितमनोबुद्धिः | अर्पितं मनः बुद्धिः च येन सः | मन और बुद्धि को अर्पित करने वाला | One who has offered his mind and intellect | ମନ ଓ ବୁଦ୍ଧିରେ ସମର୍ପିତ |
| अनुद्वेगकरम् | न उद्वेगकरम् | व्याकुलता न करने वाला | Unoffending/ nonagitating | ଉତ୍ତେଜନା |
| अभ्यसनं | अभ्यासः | अभ्यास | Practice | ଅଭ୍ୟାସ |
| वाङ्मयम् | वाचिकम् | वाचिक | Verbal penance | ବାଚିକ |

DRAFT

**सन्धिविच्छेदः -**

१. महोत्सवः = महा + उत्सवः
२. किमन्यैः = किम् + अन्यैः
३. मुखपद्माद्विनिःसृता = मुखपद्मात् + विनिःसृता
४. श्रीमद्भगद्गीता = श्रीमत् + भगवत् + गीता
५. इत्यस्य = इति + अस्य
६. काँश्चन = कान् + चन
७. दुःखेष्वनुद्विग्नमनाः = दुःखेषु + अन् + उद् + विग्नमनाः
८. स्थितधीर्मुनिरुच्यते = स्थितधीः + मुनिः + उच्यते
९. इत्येतेभ्यः = इति + एतेभ्यः
१०. क्रोधाद्भवति = क्रोधात् + भवति
११. सम्मोहात्स्मृतिविभ्रमः = सम्मोहात् + स्मृतिविभ्रमः
१२. बुद्धिनाशात्प्रणश्यति = बुद्धिनाशात् + प्रणश्यति
१३. तद्विद्धि = तत् + विद्धि
१४. ज्ञानिनस्तत्त्वदर्शिनः = ज्ञानिनः + तत्त्वदर्शिनः
१५. श्रद्धावाँल्लभते = श्रद्धावान् + लभते
१६. शान्तिमचिरेणाधिगच्छति = शान्तिम् + अचिरेण + अधिगच्छति
१७. तथैव = तथा + एव
१८. करुण एव = करुणः + एव
१९. निर्ममोनिरहङ्कारः = निर्ममः + निः + अहम् + कारः

२०. कस्यामपि = कस्याम् + अपि
२१. मय्यर्पितमनोबुद्धिर्योमद्भक्तः
= मयि+अर्पितमनः+बुद्धिः+यः+मत्+ भक्तः
२२. कस्यापि = कस्य + अपि
२३. यश्च = यः + च
२४. अतीव = अति + इव
२५. यस्मान्नोद्विजते = यस्मात् + न + उद् + विजते
२६. लोकान्नोद्विजते = लोकात् + न + उद् + विजते
२७. हर्षामर्षभयोद्वेगैर्मुक्तो यः
= हर्ष + अमर्षभय + उद् + वेगैः +मुक्तः +यः
२८. कोऽपि = कः + अपि
२९. स्वाध्यायाभ्यसनम्
= स्व + अध्याय + अभ्यसनम्
३०. चैव = च + एव
३१. तप उच्यते = तपः + उच्यते
३२. वाङ्मयम् = वाक् + मयम्
३३. तदेव = तत् + एव



## प्रश्नावली

१. **एकपदेन उत्तरं लिखत –**

(क) श्रद्धावान् किं लभते ?

(ख) कस्तात् सम्मोहः जायते ?

(ग) सम्मोहात् किं भवति ?

(घ) अर्जुनाय गीतां कः उपदिष्टवान् ?

(ङ) कस्याम् अमृततुल्याः उपदेशाः सन्ति ?

(च) श्रीमद्भगवद्गीता कस्य उपदेशः ?

२. **पूर्णवाक्येन उत्तरं लिखत–**

(क) कीदृशं वाक्यं वाङ्मयं तप: उच्यते ?

(ख) कीदृश: जन: स्थितधी: उच्यते ?

(ग) जन: कथं विनाशं प्राप्नोति ?

(घ) जन: किं लब्ध्वा उत्तमां शान्तिं प्राप्नोति ?

(ङ) उपदेशप्राप्तये त्रय: उपाया: के भवन्ति ?

३. **सन्धिविच्छेदं कुरुत–**

(क) तप उच्यते –

(ख) वाङ्मयम् –

(ग) अतीव –

(घ) काँश्चन –

(ङ) महोत्सव: –

(च) कस्यामपि –

४. **संस्कृतेन वाक्यानि रचयत–**

(क) उच्यते –

(ख) च –

(ग) न –

(घ) लब्ध्वा –

(ङ) भवति –

(च) प्रिय: –

५. **पाठानुसारं समुचितेन पदेन रिक्तस्थानं पूरयत–**

(क) श्रद्धावाँल्लभते ........... ।

(ख) वाङ्मयं .......... उच्यते ।

(ग) .......... दृढ़निश्चय: ।

DRAFT

(घ) ………………… भवति सम्मोहः ।

(ङ) तद्विद्धि …………… परिप्रश्नेन सेवया ।

## ६. स्तम्भमेलनं कुरुत–

| | 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|---|
| (क) | सर्वभूतानाम् | पुनः पुनः प्रश्नकरणेन |
| (ख) | अनुद्विग्नमनाः | स्थिरमतिमान् |
| (ग) | स्थितधीः | इन्द्रियसंयमी |
| (घ) | परिप्रश्नेन | यस्य मनः विचलितं न भवति |
| (ङ) | संयतेन्द्रियः | सर्वेषां प्राणिनाम् |

## ७. मातृभाषया अनुवादं कुरुत –

(क) क्रोधात् सम्मोहः भवति ।

(ख) ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति ।

(ग) योगी सततं सन्तुष्टः भवति ।

(घ) प्रियवाक्यप्रदानेन सर्वे जन्तवः तुष्यन्ति ।

(ङ) सत्यं वाङ्मयं तपः उच्यते ।

## ८. शुद्धमुत्तरं चिनुत –

(क) का सुगीता कर्त्तव्या ?

(i) कविता, (ii) गीता, (iii) कथा, (iv) आख्यायिका

(ख) कौरवाणां पाण्डवानां च मध्ये कुत्र संग्रामः अभवत् ?

(i) कृषिक्षेत्रे, (ii) श्रीक्षेत्रे, (iii) कुरुक्षेत्रे, (iv) तुलसीक्षेत्रे

(ग) सम्मोहात् कः भवति ?

(i) स्मृतिविभ्रमः, (ii) बुद्धिनाशः, (iii) क्रोधः, (iv) विनाशः

(घ) कीदृशाः ज्ञानिनः ज्ञानम् उपदेक्ष्यन्ति ?

(i) विज्ञानिनः, (ii) सहपाठिनः, (iii) आज्ञाकारिणः, (iv) तत्त्वदर्शिनः

(ङ) कः ज्ञानं लभते ?

(i) धनवान्, (ii) श्रद्धावान्, (iii) गुणवान्, (iv) पुण्यवान्

DRAFT

(च) प्रियवाक्यप्रदानेन के तुष्यन्ति ?

(i) जन्तवः, (ii) दयालवः, (iii) साधवः, (iv) गुरवः

९. **प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।**

(क) कः भगवतः प्रियजनः भवति ?

(ख) कः स्थितधीः उच्यते ?

## वयं जानीमः

### श्रीमद्भगवद्गीता

महाभारतयुद्धसमये श्रीकृष्णः अर्जुनम् उपदिष्टवान् । तेषाम् उपदेशानां सङ्कलनात्मकः ग्रन्थः अस्ति श्रीमद्भगवद्गीता । महर्षिः वेदव्यास : महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीतां वर्णितवान् । गीतायाम् अष्टादश अध्यायाः सप्तशतं (७००) श्लोकाः च सन्ति ।

१. अर्जुनविषादयोगः (सैन्य-निरीक्षणम्)
२. साङ्ख्ययोगः (गीतायाः सारः)
३. कर्मयोगः (कर्मणः महत्त्वम्)
४. ज्ञान-कर्म-संन्यास योगः (दिव्यज्ञानम्)
५. कर्मसंन्यासयोगः (कर्म-वैराग्य-योगः)
६. आत्मसंयमयोगः (ध्यान-योगः)
७. ज्ञान-विज्ञानयोगः (भगवद् ज्ञानस्य प्राप्तिः)
८. अक्षर-ब्रह्मयोगः (भगवतः प्राप्तिः)
९. राजविद्या-राजगुह्ययोगः (परमं गुप्तं ज्ञानम्)
१०. विभूतियोगः (भगवतः ऐश्वर्यम्)
११. विश्वरूप-दर्शनयोगः (विश्वरूपस्य दर्शनम्)
१२. भक्तियोगः (भक्तिभावज्ञानम्)
१३. क्षेत्र-क्षेत्रज्ञ-विभागयोगः (प्रकृतेः पुरुषस्य चेतनायाः च ज्ञानम्)
१४. गुणत्रय-विभागयोगः (प्रकृतेः गुणत्रयस्य वर्णनम्)
१५. पुरुषोत्तमयोगः (विश्वस्य केन्द्ररूपेण ब्रह्मणः वर्णनम्)
१६. दैवासुर-सम्पद्विभागयोगः (दैव-आसुर-स्वभावानां वर्णनम्)
१७. श्रद्धात्रय-विभागयोगः (श्रद्धायाः विभागानां वर्णनम्)
१८. मोक्ष-संन्यासयोगः (उपसंहारः, संन्यास-सिद्धि-वर्णनम्)

DRAFT

**सस्वरं गायाम :–**

भगवद्गीता किञ्चिदधीता, गङ्गा-जल-लव-कणिका पीता ।
सकृदपि येन मुरारिसमर्चा, तस्य यम : किं कुरुते चर्चाम् ।।
कर्तव्यदीक्षां च समत्वशिक्षां, ज्ञानस्य भिक्षां शरणागतिञ्च ।।
ददाति गीता करुणार्द्रभूता, कृष्णेन दत्ता जगतां हिताय ।।

## परियोजनाकार्यम्

१. कक्षायां श्रीमद्भगवद्गीतानुगुणं 'स्थितधी:' इति विषयम् अधिकृत्य 'मम जीवनलक्ष्यम्' इत्यस्मिन् विषये परिचर्चां स्थापयतु ।

२. विविध-धर्माणां धर्मग्रन्थानां नामानि विलिख्य कस्यचित् एकस्य धर्मग्रन्थस्य विवरणं लिखत ।

❑

DRAFT

# अष्टमः पाठः
# कुष्माण्डभोजनालयः

(नाटकम्)

## पात्राणि –

| | | | |
|---|---|---|---|
| १. | कुष्माण्डः | – | सेवकः |
| २. | स्वामी | – | भोजनालयस्य स्वामी |
| ३. | विद्यापतिः | – | चतुरपथिकः |
| ४. | धनपतिः | – | विद्यापतेः मित्रम् |

### प्रथमं दृश्यम्

(भोजनालयस्य दृश्यम्, सेवकः कुष्माण्डः उपविश्य निद्राति)



**स्वामी –** (आगत्य भोजनालयं दृष्ट्वा घटीयन्त्रं पश्यति) अरे ! अष्टवादनं जातम्, अधुनापर्यन्तं भोजनालयः न उद्घाटितः । कुष्माण्ड ! अरे कुष्माण्ड ! एषः कुष्माण्डः सर्वदा अलसः भवति । भोजनालयः कथं चलिष्यति ? कुष्माण्ड ! हे कुष्माण्ड !

DRAFT

कुष्माण्ड: – आम् श्रीमन् । गच्छामि, गच्छामि । सर्वं करिष्यामि ।

स्वामी – अरे ! शीघ्रम् आगच्छ (कुष्माण्डस्य समीपं गत्वा) अरे ! वैशाखनन्दन ! कदा उद्घाटयिष्यति ?

कुष्माण्ड: – गच्छामि । उद्घाटयामि ।

स्वामी – अद्य अहं नगरं प्रति गच्छामि । रात्रौ आगमिष्यामि । अत: भोजनालयस्य सर्वम् अपि दायित्वं त्वयि न्यस्तम् अस्ति ।

कुष्माण्ड: – भवान् चिन्तित: न भवतु । अहम् अस्मि । दायित्वे त्रुटि: न भविष्यति ।

स्वामी – तर्हि अहं गच्छामि ।

कुष्माण्ड: – आम्..... आम्...... । गच्छतु । विलम्बं न करोतु ।

स्वामी – (किञ्चित् दूरं गत्वा) अरे कुष्माण्ड ! शृणु शृणु ।

कुष्माण्ड: – (मनसि) पुन: किं जातम् ? (प्रकाश्य) वदतु श्रीमन् ।

स्वामी – विना मूल्यं कस्यापि कृते भोजनं न दास्यसि । गच्छामि ।

## द्वितीयं दृश्यम्

**(राजमार्गे मित्रद्वयं परस्परम् आलपति)**

स्वामी – (आगत्य भोजनालयं दृष्ट्वा घटीयन्त्रं पश्यति) अरे ! अष्टवादनं जातम्, अधुनापर्यन्तं भोजनालय: न उद्घाटित: । कुष्माण्ड ! अरे कुष्माण्ड ! एष: कुष्माण्ड: सर्वदा अलस: भवति । भोजनालय: कथं चलिष्यति ? कुष्माण्ड ! हे कुष्माण्ड !

विद्यापति: – अरे धनपते ! कुत्र धावसि रे ! क्षणं तिष्ठ ।

धनपति: – हरि:ओँ विद्यापते ! किं जातं भो: !

विद्यापति: – किं जातम् ? मम उदरे मूषका: क्रीड़न्ति । पृच्छति- किं जातम् इति ।

धनपति: – ममापि उदरे प्रबला ज्वाला भवति, किन्तु किं करिष्यामि ? मम समीपं तु धनं नास्ति । केवलं नाममात्रं धनपति: अस्मि । तव समीपे अस्ति खलु ?

विद्यापति: – मम समीपे ? (अन्विष्यति) एकं रूप्यकमात्रम् अस्ति । एतेन किं भविष्यति ?

धनपति: – तर्हि किं करणीयम् ? क्षुधा तु वर्धते । प्राणा: अस्थिरा: भवन्ति । शक्ति: क्षीणा भवति । चलितुम् अपि न पारयामि । कमपि उपायं चिन्तय ।

विद्यापति: – (चिन्तयन्) आम्......... । एक: उपाय: अस्ति ।

धनपति: – क: उपाय: ? (साग्रहं वदति)

विद्यापति: – शृणु.... । समीपम् आगच्छ । (धनपते: कर्णे वदति ।)

धनपति: – आम्, आम्, सुन्दर: उपाय: । चल चल शीघ्रं चल । अलं विलम्बेन ।

○

## तृतीयं दृश्यम्

**(कुष्माण्डभोजनालय: इति लिखित: अस्ति अग्रे । अत: कुष्माण्ड: कार्यं करोति ।)**

धनपति: – अरे विद्यापते ! तत्र पश्य किं लिखितम् अस्ति ?

विद्यापति: - किं लिखितम् अस्ति ? अस्तु पठामि ।

धनपति: - शीघ्रं पठ । प्रायेण एष: भोजनालय: ।

विद्यापति: - आम्, तव अनुमानं समीचीनम् । कु.... ष्मा......ण्ड..... भो......ज......ना.....ल....य: इति लिखितं भो: । चल चल शीघ्रं चल ।

कुष्माण्ड: - (भोजनालयस्य अन्त:) आम्, आगच्छन्तु आगच्छन्तु । उपविशन्तु । (द्वौ आगतौ उपविष्टौ च) किं किम् आवश्यकम् ?

धनपति: - अरे । प्रथमं जलम् आनय ।

कुष्माण्ड: - अस्तु, अधुना एव ददामि । (जलम् आनीय ददाति)

विद्यापति: - किं किम् अस्ति भोजने ।

कुष्माण्ड: - रोटिका, ओदनं, सूप:, गोभिकाव्यञ्जनं, पटोलभर्जं, चाइनीजभोजनं, दक्षिणभारतीयव्यञ्जनं च सर्वविधानि खाद्यानि सन्ति । किं किं दास्यामि ।

धनपति: - रोटिकां, सूपं, व्यञ्जनम्, भर्जं च आनय ।

कुष्माण्ड: - अधुनैव ददामि । (आनीय ददाति)

DRAFT

विद्यापतिः - अरे ! पर्पटम् आनय ।

कुष्माण्डः - किञ्चित् अवलेहम् आनय ।

धनपतिः - रसगोलकम् अपि आनय ।

कुष्माण्डः - (दूरतः) आम्, श्रीमन् ! आनयामि । (आनीय ददाति)

धनपतिः - जलं ददातु ।

(भोजनान्ते हस्तमुखं प्रक्षाल्य)

विद्यापतिः - आः शान्तिः । हाँ, कति रूप्यकाणि देयानि ?

कुष्माण्डः - (आकलनं कृत्वा) आम्, पञ्चषष्टिः रूप्यकाणि ।

विद्यापतिः - एँ, (आश्चर्येण) पञ्चषष्टिः !

धनपतिः - चिन्ता मास्तु । अहं दास्यामि ।

विद्यापतिः - नैव, नैव, अहं दास्यामि ।

धनपतिः - अहं धनिकः । अतः अहं दास्यामि ।

विद्यापतिः - अरे । अहं ज्येष्ठः अस्मि । अहं दास्यामि ।

धनपतिः - न हि, न हि, अहं दास्यामि ।

कुष्माण्डः - अरे, किम् एतत् धनदानार्थं विवादः । शीघ्रं शीघ्रं ददातु कोऽपि ।

धनपतिः - अस्य विवादस्य एकमेव समाधानम् अस्ति ।

कुष्माण्डः - किं तत् ?

धनपतिः - आवां तव चक्षुर्बन्धनं करिष्यावः । त्वं यस्य स्पर्शं करिष्यसि सः एव धनं दास्यति ।

कुष्माण्डः - (किञ्चित् विचिन्त्य) हुँ, उपायस्तु सुन्दरः । तथैव भवतु ।

उभौ - आम्, शोभनम् । इदानीं समाधानं भविष्यति । (द्वौ कुष्माण्डस्य चक्षुर्बन्धनं कृत्वा) अधुना स्पर्शं कुरु । (इत्युक्त्वा सावधानं ततः पलायितौ)

तदनु स्वामी प्रविष्टः

कुष्माण्डः - (हस्तं चालयन् स्वामिनं धृत्वा) आम् भवान् धनं ददातु ।

स्वामी - अरे किं धनम् ?

कुष्माण्डः - नैव, भवान् एव धनं दास्यति ।

स्वामी - कुष्माण्ड ! (चपेटिकां ददाति) किं भवति एतत्प्रहसनम् ?

कुष्माण्डः - (सहसा चक्षुर्बन्धनम् उद्घाट्य, सम्मुखे स्वामिनं दृष्ट्वा भवन् । एँ भवन् ! तौ कुत्र गतौ ?)

स्वामी - अरे, तौ कौ ?

कुष्माण्डः - द्वौ जनौ आगतौ ।

स्वामी - ततः किं जातम् ।

कुष्माण्डः - भोजनं कृतवन्तौ ।

स्वामी - धनं......... ।

कुष्माण्डः - न दत्तवन्तौ । (भयेन कम्पते)

स्वामी - आँ, न दत्तवन्तौ ? सर्वनाशः । हे भगवन् ! किं करिष्यामि ? एषः मूढः मम सर्वस्वं लुण्ठयिष्यति । (पुनः पुनः ताड़यति ।)

कुष्माण्डः - (स्वामिनः पादतले) क्षम्यताम् ।

स्वामी - मूर्ख ! दूरमपसर ! तव मुखं द्रष्टुं न इच्छामि । मम नाशं कृत्वा वदति .....क्ष...म्य... ताम् । गच्छ ..... इतः गच्छ । (क्रन्दन् प्रस्थितः कुष्माण्डः)

इतः परं भोजनालयस्य नाम कुष्माण्डभोजनालयः न भविष्यति । भोजनालयस्य नाम सुष्माण्ड-भोजनालयः भविष्यति । (क्रोधेन वदति स्वामी)

# अवधेयम्

शब्दार्था :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| उद्घाटित: | उद्घाटनं कृतम् | खुला | opened | ଖୋଲିଲା |
| सर्वदा | सर्वस्मिन् काले | सर्वकाल में | at all times | ସବୁବେଳେ |
| वैशाखनन्दन: | रासर्भ:/गर्दभ: | गधा | ass | ଗଧ |
| उद्घाटयिष्यामि | उद्घाटनं करोमि | लोकार्पित करुंगा | shall open | ଖୋଲିବି |
| उद्घाटयामि | उद्घाटनं करोमि | खोलता हूँ | opening | ମୁଁ ଖୋଲୁଛି |
| रात्रौ | रात्रिकाले | रात को | at night | ରାତିରେ |
| श्रीमन् | महाशय ! | महोदय | O honourable | ମହାଶୟ |
| राजमार्गे | मुख्यमार्गे | राजमार्ग में | on the grand road | ମୁଖ୍ୟ ରାସ୍ତାରେ |
| आलपन्ति | आलापं कुर्वन्ति | बात चित करते हैं | making conversion | କଥାବାର୍ତ୍ତା କରୁଛନ୍ତି |
| धावसि | धावनं करोषि | दौड़ते हे | running | ଧାଉଁଛ |
| उदरे | उदरमध्ये | पेट में | in the stomach | ପେଟରେ |
| समीपे | निकटे | पास | near | ପାଖରେ |
| नाममात्रम् | नाम एव | बसनाम का | for name sake | ନାଁକୁ ମାତ୍ର |
| खलु | निश्चयेन | निश्चित रूप से | definitely | ନିଶ୍ଚିତ |
| तर्हि | तत: | उसके लिए | for that | ତା'ହେଲେ |
| वर्द्धते | वृद्धि: भवति | बढ़ता है | grows | ବଢୁଛି |
| प्राणा: | जीवनम् | प्राण | life | ପ୍ରାଣ |
| चलितुम् | चलनं कर्त्तुम् | चलते के लिए | for moving | ଚାଲିବାକୁ |
| चिन्तय | चिन्तनं कुरु | शोचो | make plan / think | ଚିନ୍ତାକର |
| आम् | ओम् | हाँ | yes | ହଁ |
| विलम्बेन | चिरेण | देर से | delaying | ଡେରିରେ |
| इति | नाम | इसी तरह | this | ବୋଲି |
| तत्र | तस्मिन् स्थाने | वहाँ | at that place | ସେଠାରେ |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| समीचीनम् | उचितम् | यथार्थ | apppriate | ଉଚିତ |
| अन्त: | मध्ये | के भीतर | in | ଭିତରେ |
| उपविष्टौ | उपवेशनं कृतवन्तौ | दोनो बैठे | took seets | ଦୁଇଜଣ ବସିଲେ |
| उपविशन्तु | उपवेशनं कुर्वन्तु | बैठिए | please be seated | ବସନ୍ତୁ |
| आनीय | आनयनं कृत्वा | लाकर | brought | ଆଣି |
| सूप: | द्विदलम् | सूप/दाल | dal/soup | ଡାଲି |
| ओदनम् | अन्नम्/भक्तम् | भात | rice | ଭାତ |
| गोभिकाव्यञ्जनम् | गोभिकाया: व्यञ्जनम् | गोभी की सब्जी | cabbage fried curry | କୋବି ତରକାରି |
| भर्जम् | भर्जितव्यञ्जनम् | भाजी | curry | ଭଜା |
| पर्पट: | पर्पटखाद्यम् | पापड़ | papad | ପାମଡ଼ |
| अवलेह: | आम्लम् | अचार | pickle | ଆଚାର |
| प्रक्षाल्य | प्रक्षालनं कृत्वा | धोकर | washed | ଧୋଇ |
| रूप्यकाणि | धनानि | रूपए | money | ଟଙ୍କା |
| आकलनम् | गणनम् | गिनना | counting/calculating | ଗଣିବା |
| विवादस्य | कलहस्य | कलहका | of dispute | କଳହର |
| आवाम् | अहं च त्वं च | हम दोनों | I and you | ଆମେ ଦୁହେଁ |
| विचिन्त्य | चिन्तनं कृत्वा | चिंतन कर | made plan | ଚିନ୍ତନ କରି |
| शोभनम् | सम्यक् | अच्छा | accurate | ଭଲ |
| इदानीम् | अधुना | अब | at present | ବର୍ତ୍ତମାନ |
| तत: | तस्मात् स्थानात् | वहाँ से | from that place | ସେଠାରୁ |
| चालयन् | चालनं कुर्वतु | चला कर | by moving | ଚଳାଇ |
| धृत्वा | धारणं कृत्वा | धारण करके | by holding | ଧରି |
| एव | निश्चयेन | निश्चयसे | definitely | ହିଁ |
| चपेटिका | ताड़नाविशेष: | थप्पड़ | slap | ଚାପୁଡ଼ା |
| उद्घाट्य | उद्घाटनं कृत्वा | खोल कर | inaugurating / opening | ଖୋଲି |

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| सर्वस्वम् | सकलसम्पत् | सबकुछ | all property | ସବୁକିଛି |
| क्षम्यताम् | क्षमां क्रियताम् | क्षमा करें | excuse | କ୍ଷମାକରନ୍ତୁ |
| अपसर | प्रतिगच्छ | हटो | get back | ହଟିଯାଅ |
| द्रष्टुम् | दर्शनं कर्तुम् | देखने के लिए | for seeing | ଦେଖିବାକୁ |
| प्रस्थित: | प्रस्थानं कृतवान् | प्रस्थान किया | returned | ପ୍ରସ୍ଥାନ କଲା |

**सन्धिविच्छेद: -**

१. महोत्सव: = महा + उत्सव:
२. किमन्यै: = किम् + अन्यै:
३. मुखपद्माद्विनि:सृता = मुखपद्मात् + विनि:सृता
४. श्रीमद्भगद्गीता = श्रीमत् + भगवत् + गीता
५. इत्यस्य = इति + अस्य
६. काँश्चन = कान् + चन
७. दु:खेष्वनुद्विग्नमना: = दु:खेषु + अन् + उद् + विग्नमना:
८. स्थितधीर्मुनिरुच्यते = स्थितधी: + मुनि: + उच्यते
९. इत्येतेभ्य: = इति + एतेभ्य:
१०. क्रोधाद्भवति = क्रोधात् + भवति
११. सम्मोहात्स्मृतिविभ्रम: = सम्मोहात् + स्मृतिविभ्रम:
१२. बुद्धिनाशात्प्रणश्यति = बुद्धिनाशात् + प्रणश्यति
१३. तद्विद्धि = तत् + विद्धि
१४. ज्ञानिनस्तत्त्वदर्शिन: = ज्ञानिन: + तत्त्वदर्शिन:
१५. श्रद्धावाँल्लभते = श्रद्धावान् + लभते
१६. शान्तिमचिरेणाधिगच्छति
= शान्तिम् + अचिरेण + अधिगच्छति
१७. तथैव = तथा + एव
१८. करुण एव = करुण: + एव
१९. निर्ममोनिरहङ्कार: = निर्मम: + नि: + अहम् + कार:
२०. कस्यामपि = कस्याम् + अपि
२१. मय्यर्पितमनोबुद्धिर्योमद्भक्त:
= मयि + अर्पितमन: + बुद्धि: + य: + मत् + भक्त:
२२. कस्यापि = कस्य + अपि
२३. यश्च = य: + च
२४. अतीव = अति + इव
२५. यस्मान्नोद्विजते = यस्मात् + न + उद् + विजते
२६. लोकान्नोद्विजते = लोकात् + न + उद् + विजते
२७. हर्षामर्षभयोद्वेगैर्मुक्तोय:
= हर्ष + अमर्षभय + उद् + वेगै: + भुक्तय:
१८. कोऽपि = क: + अपि
२९. स्वाध्यायाभ्यसनम्
= स्व + अध्याय + अभ्यसनम्
३०. चैव = च + एव
३१. तप उच्यते = तप: + उच्यते
३२. वाङ्मयम् = वाक् + मयम्
३३. तदेव = तत् + एव



## प्रश्नावली

१. **एकेन पदेन उत्तरं लिखत ।**

(क) क : सर्वदा अलस: भवति ?

(ख) 'वैशाखनन्दन' इति कुष्माण्डं क: सम्बोधयति ?

(ग) मित्रद्वयं कुत्र आलपति ?

(घ) प्रबला ज्वाला कुत्र भवति ?

(ङ) का: अस्थिरा: भवन्ति ?

(च) कुष्माण्ड: किं कृत्वा 'पञ्चषष्टि:' रूप्यकाणि इति वदति ?

२. **काष्ठकत: शुद्धं पदं चित्वा शून्यस्थानानि पूरयत–**

(क) तव ............... द्रष्टुं न इच्छामि ।

(ख) गच्छ ............... गच्छ ।

(ग) द्वौ जनौ ................. ।

(घ) इदानीं ............. भविष्यति ।

(ङ) अष्टवादनं .................... ।

(च) अहं ............. प्रति गच्छामि ।

(इत:, मुखं, जातम्, आगतौ, नगरं, समाधानं)

३. **मातृभाषया अनुवादं कुरुत–**

(क) भोजनालय: कथं चलिष्यति ?

(ख) भोजनालयस्य दायित्वं तव उपरि अस्ति ।

(ग) किन्तु, किं करिष्यामि ?

(घ) चल, चल, शीघ्रं चल ।

(ङ) रोटिकां सूपं व्यञ्जनं भर्जं च आनय ।

(च) चिन्ता मास्तु, अहं दास्यामि ।

DRAFT

## ४. स्तम्भमेलनं कुरुत–

| 'क' स्तम्भ: | 'ख' स्तम्भ: |
|---|---|
| शीघ्रं | दास्यामि |
| अहं | आनय |
| किम् | चालयन् |
| रसगोलकम् | ददातु |
| हस्तं | एतत् |

## ५. संस्कृतेन वाक्यानि रचयत–

(क) ददातु (ख) तत:

(ग) किम् (घ) इदानीम्

(ङ) आनय (च) कति

## ६. सन्धिं कुरुत –

(क) कम्+अपि (ख) न+अस्ति

(ग) किम्+चित् (घ) तत्+अनु

(ङ) दूरम्+अपसर (च) भोजन+आलय:

## ७. पूर्णवाक्येन उत्तरं लिखत।

(क) मित्रद्वयस्य नाम किम् ?

..........................................................................................

(ख) उदरे के क्रीडन्ति ?

..........................................................................................

(ग) शक्ति: कीदृशी भवति ?

..........................................................................................

(घ) स्वामी कस्य उपरि भोजनालयस्य दायित्वम् अददात् ?

..........................................................................................

(ङ) अवलेहं क: इच्छति ?

..........................................................................................

DRAFT

(च) 'अहं ज्येष्ठः अस्मि' इति कः वदति ?

..........................................................................................................

## ८. शुद्धम् उत्तरं चिनुत –

(क) कः कुष्माण्डं पुनः पुनः ताडयति ?

(i) विद्यापतिः, (ii) धनपतिः, (iii) स्वामी, (iv) भूपतिः

(ख) कः क्रन्दन् प्रस्थितः ?

(i) स्वामी, (ii) कुष्माण्डः, (iii) धनपतिः, (iv) विद्यापतिः

(ग) कुष्माण्डः कं धृत्वा 'भवान् धनं ददातु' इति वदति ?

(i) स्वामिनं, (ii) विद्यापतिं, (iii) धनपतिं, (iv) आत्मानं

(घ) आकलनं कृत्वा कुष्माण्डः कति रूप्यकाणि देयानि ? इति वदति ।

(i) पञ्चषष्टिः, (ii) षष्टिः, (iii) नवषष्टिः, (iv) द्विषष्टिः

(ङ) भोजनालयं प्रति आगच्छन्तु इति कः वदति ?

(i) धनपतिः, (ii) स्वामी, (iii) विद्यापतिः, (iv) कुष्माण्डः

(च) विद्यापतिः कस्य कर्णे वदति ?

(i) भूपतेः, (ii) गृहपतेः, (iii) ग्रामपतेः, (iv) धनपतेः

## ९. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।

मित्रद्वयं केन रूपेण कुष्माण्डं प्रतारितवत् ?



## वयं जानीमः

**भोजनसम्बन्धाः शब्दाः –**

| | | | | | |
|---|---|---|---|---|---|
| १. | पाकशाला - | ରୋଷେଇ ଘର | २. | स्थालिका - | ଥାଳି |
| ३. | चषकः - | ଗ୍ଲାସ୍ | ४. | चमसः - | ଚାମଚ |
| ५. | दर्वी - | ଡଙ୍କି / କରଚୁଲି | ६. | परिवेषणम् - | ବାଢ଼ିବା |
| ७. | शाकानि - | ପରିବା | ८. | आलुकम् - | ଆଳୁ |
| ९. | वार्ताकी - | ବାଇଗଣ | १०. | सुवार्ताकी - | ବିଲାତି ବାଇଗଣ (ଟମାଟୋ) |
| ११. | कारवेल्लम् - | କଲରା | १२. | कुष्माण्डः - | ପାଣିକଖାରୁ |

DRAFT

१३. मरीचिका - ଲଙ୍କାମରିଚ                १४. भोजनम् - ଖାଦ୍ୟ

१५. लवणम् - ଲୁଣ

**भोजनस्य सम्भाषणार्थं वाक्यानि –**

- किम् आवश्यकम् ?
- मम बुभुक्षा/क्षुधा भवति ।
- स्थालिकाम् आनयतु ।
- जलं कुत्र अस्ति ?
- जलं चषके अस्ति ।
- उष्णं जलम् अस्ति वा ?
- आम्, उष्णजलम् अस्ति ।
- हस्तं मुखं च क्षालयतु ।
- भोजनं स्वादिष्ठम् अस्ति ।
- महान् सन्तोषः ।
- व्यञ्जने लवणम् अल्पम् अस्ति ।
- अहं हस्तेन खादामि । चमसेन न ।
- फलानि कर्तयित्वा ददातु ।

।। भोजनमन्त्रः ।।

**ब्रह्मार्पणं ब्रह्म हविः, ब्रह्माग्नौ ब्रह्मणा हुतम् ।**
**ब्रह्मैव तेन गन्तव्यं, ब्रह्मकर्मसमाधिना । (गीता ४/२४)**

**सह नाववतु सह नौ भुनक्तु**
**सह वीर्यं करवावहै तेजस्विनावधीतमस्तु**
**मा विद्विषावहै । शान्तिः शान्तिः शान्तिः (कृष्ण यजुर्वेदः)**

# नवमः पाठः
# डिजिभारतम्

अस्माकं देशः भारतं न केवलं सांस्कृतिकक्षेत्रे समृद्धम्, अपि तु नित्यम् आविष्कारैः कीर्त्तिं लभते । अद्य सम्पूर्णविश्वे 'डिजिटल्-भारतम्' इत्यस्य चर्चा भवति । एकस्यैव पिञ्जस्य नोदनेन सर्वं नागरिक-सौविध्यं लभ्यते । अनेन भारतीयानां जीवनम् अधिकं सरलं जायमानम् अस्ति । डिजिटल्-पटले सम्पूर्णा वसुधा कुटुम्बवत् अस्ति । अधुना वयं भारतस्य डिजिटल्-प्रगतेः विषये पठामः ।

डिजिटल्-भारतम्
सशक्तीकरणार्थं शक्तिः

(नवदेहलीस्थः प्रधानमन्त्रिसंग्रहालयः । अत्र विविधाः डिजिटल्-प्रयुक्तिविद्याः प्रदर्शिताः सन्ति । सर्वे उत्सुकतया संग्रहालये प्रदर्शितानि वस्तूनि पश्यन्ति ।)



DRAFT

**शिक्षकः** – बालाः ! प्रधानमन्त्रिसंग्रहालये युष्माकं सर्वेषां स्वागतम् । अत्र विविधाः डिजिटल्-प्रयुक्तिविद्याः प्रदर्शिताः सन्ति । सानन्दं सावधानं च पश्यन्तु । अनन्तरं एतस्योपरि चर्चां करिष्यामः ।

(सर्वे बालाः प्रदर्शितानि विविधानि वस्तूनि उत्साहेन पश्यन्ति, अनुभवन्ति, परस्परं चर्चाम् अपि कुर्वन्ति ।)

**सर्वे छात्राः** – अद्भुतं महोदय ! अत्र हॉलोग्राम्-द्वारा प्रधानमन्त्रिणः भाषणं श्रूयते दृश्यते च । प्रत्यक्षमेव प्रधानमन्त्री अत्र उपविष्टः इति भासते ।

**सुनन्दा** – सत्यम्, अहम् अपि हॉलोग्रामं दृष्टवती । अनेन दिवङ्गताः नेतारः अपि सजीवाः इव दृश्यन्ते।

**माधवः** – अत्र 'वर्धिता-वास्तविकता' (AR) 'आभासीया-वास्तविकता (ARVR) च इत्याभ्यां सम्बद्धानि उपकरणानि अपि सन्ति, अनेन ऐतिहासिकवृत्तानि प्रत्यक्षम् इव अनुभूयन्ते । 'भारतीय-स्वतन्त्रता-संग्रामं' दृष्ट्वा अस्माकं पूर्वजानां संघर्षः कियान् विशालः आसीत् इति ज्ञायते ।

**तपनः** – अहम् अत्र कृत्रिमबुद्धि-आधारितं संवादयन्त्रं दृष्टवान् । एतत् यन्त्रम् अस्माकं सर्वविधप्रश्नानाम् उत्तराणि ददाति ।

**वेदिका** – अहो ! 'डिजिटल्-प्रक्षेपण-चलच्चित्रं' दृष्ट्वा अहं विस्मिता अभवम् । अत्र सम्पूर्णस्य भारतस्य विकास-यात्रा प्रदर्शिता अस्ति ।

**वर्षा** – एषः कश्चन अपूर्वः अनुभवः अस्ति । यश्च चिरकालपर्यन्तं स्मरणीयः भविष्यति ।

**सर्वे छात्राः** – मान्यवर ! वयं सर्वे एतस्मिन् सन्दर्भे चर्चां कर्तुम् इच्छामः । किं कक्षां प्रति चलामः ?

**शिक्षकः** – उत्तमः विचारः । चलामः तावत् ।

(सर्वे मिलित्वा गच्छन्ति ।)

(सर्वे कक्षायाम् उपविष्टाः )

**सर्वे छात्राः** – अहो ! संग्रहालयस्य अद्भुतः अनुभवः प्राप्तः ।

**शिक्षकः** – बालाः ! अस्मिन् संग्रहालये उपस्थापितं ज्ञानम् अद्भुतम् एव । 'डिजिटल्' योजनायाः प्रभावः दैनन्दिने जीवनेऽपि दृश्यते ।

DRAFT



**सर्वे छात्राः** – आम्, मान्यवर ! वयम् इमं प्रभावं ज्ञातुम् इच्छामः ।

**शिक्षकः** – उत्तमम् । अस्माकं दैनिकं जीवनं 'डिजिटल्' इत्यनेन परिवर्तितं प्रभावितं च भवति । अस्य क्षेत्रं व्यापकम् अस्ति । यथा 'डिजिटल्-शासनं, स्वास्थ्यसेवा, शिक्षणं, वित्तीयं समावेशनम्' इत्यादीनि क्षेत्राणि ।

**सुनन्दा** – अहं स्वयं 'डिजि-लॉकर' इत्यस्य उपयोगं करोमि । मम आधारपत्रं विद्यालयीयं प्रमाणपत्रं च इति द्वयं तत्र सुरक्षितम् अस्ति ।

**माधवः** – मम पिता 'फाष्टटयाग' इत्यस्य उपयोगं करोति । अनेन राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य संग्रहणं शीघ्रं भवति ।

**तपनः** – अहम् 'एकीकृत-धनदेयप्रत्यर्पण-अन्तरफलकस्य' (यूपीआई) उपयोगं करोमि । अनेन मम पितरौ अपि त्वरया मह्यं धनं प्रेषयितुं पारयतः ।

**शिक्षकः** – उत्तमम् ! वित्तीयसमावेशनस्य क्षेत्रे 'यूपीआई, रूपे-कार्ड्, जनधनयोजना' इत्यादीनि बहूनि साधनानि सन्ति । अधुना आपणेषु वस्तुक्रयणार्थं साक्षात् मुद्रायाः आवश्यकता नास्ति । मुद्रारहित-विनिमयसन्दर्भे विश्वे भारतस्य अग्रगण्यं स्थानम् अस्ति ।

DRAFT

सुरेश: – डिजिटल्-योजना भारतस्य काचित् महत्त्वाकाङ्क्षिणी योजना अस्ति ।

शिक्षक: – आम् सुरेश: ! एषा भारतसर्वकारस्य विशिष्टा महत्त्वाकाङ्क्षिणी योजना अस्ति । राष्ट्रं डिजिटल्-रूपेण सुशक्तं भवेत् इत्येव अस्या: योजनाया: लक्ष्यम् । डिजिटल्-शक्ति: सर्वजनान् सुशक्तान् कुर्यात् इति अस्माकं ध्येयम् ।

वर्षा – महोदय ! अस्य स्वरूपं किञ्चित् स्पष्टीकरोतु ।



शिक्षक: – अवश्यम् ! पश्य, डिजिटल्-शासन-सेवाया: अन्तर्गतं 'डिजी-लॉकर्' (आधार-पॅन्-कार्ड् इत्यादीनां डिजिटल्-संग्रहणम्), 'ई-शासन-पटलम्' यथा 'उमङ्ग्' (UMANG), 'माय्-गव्' (My-Gov), 'जेम्' (GeM) इत्यादय: । ऑन्-लैन्–टीकाकरण-पञ्जीकरणार्थं 'कोविन्-पटलम्' (COWIN) अस्ति ।

सुनन्दा – किन्तु यदि ग्राम्य-क्षेत्रे अन्तर्जालस्य समस्या अस्ति तर्हि तत्र कथम् एतासां सेवानाम् उपयोग: भविष्यति ?

वर्षा – मान्यवर ! अहं श्रुतवती यत् सर्वकार: अन्तर्जालस्य उत्तरोत्तरं विस्ताराय कार्यं करोति । अनेन ग्राम्य-क्षेत्रे अपि उच्चगते: जालस्य उपलब्धि: भविष्यति ।

**तपन:** – बहु समीचीनम् । एतासां सेवानाम् उपयोगः शिक्षायाः माध्यमेन अधिकाधिकं प्रचारणीयः ।

**शिक्षक:** – सत्यम् ! शिक्षायाः क्षेत्रे 'दीक्षा (DIKSHA), 'स्वयम्' (SWAYAM), 'स्वयं-प्रभा' (SWAYAM PRABHA), 'ई-पाठशाला' (ePathashala), 'भारतीय-राष्ट्रिय-डिजिटल्-पुस्तकालयः', 'निष्ठा' (NISTHA), 'पीएम्-ई-विद्या' (PM e-VIDYA), निःशुल्क-डिजिटल्-शैक्षिकमञ्चः इत्यादीनाम् उपयोगः करणीयः ।

**माधव:** – आचार्य ! किं कृषिक्षेत्रे अपि डिजिटल्-भारतस्य योगदानम् अस्ति ?

**शिक्षक:** – आम् ! 'ई-नाम्' (e-NAM) 'पीएम्-किसान्-अनुप्रयोगः' (PM-KISAN), ड्रोन्-प्रौद्योगिकी इत्यादीनि पटलानि सन्ति ।

**सुनन्दा** – बहु सम्यक् । किन्तु 'डिजिटल्' इत्यस्य वाणिज्ये कीदृशः प्रभावः अस्ति ?

**शिक्षक:** – आभासीय-पटलम् अनुप्रयोगः च इत्येतयोः माध्यमेन आभासीयं (ऑन्-लैन्) विक्रयणं भवति । 'आशु-प्रतिक्रिया-कूटः' (QR Code) इत्याधारितः विनिमयश्च भवति ।

**सर्वे** – वयं धन्याः मान्यवर ! अस्मिन् सन्दर्भे वयं भवद्भिः पाठिताः । वयम् अपि भारतं डिजिटल्-भारतं कर्तुं प्रयत्नं करिष्यामः ।

**शिक्षक:** – उत्तमम् । किन्तु अस्माभिः 'साङ्गणिक-सुरक्षा'–विषये अपि चिन्तनीयम् । अनेकविधाः साङ्गणिक-अपराधाः भवन्ति । जनाः प्रायशः लोभात् भयात् वा साङ्गणिक-अपराधेन पीडिताः भवन्ति ।

**तपन:** – एतस्मिन् विषये जनाः जागृताः भवेयुः तदर्थम् अपि उपायाः चिन्तनीयाः ।

**शिक्षक:** – सत्यं कथितम् ! अनेन प्रकारेण डिजिटल्-क्रान्तौ भारतम् अग्रगण्यं राष्ट्रं भविष्यति ।

**सर्वे** – कृतज्ञाः वयं गुरुवर ! वयं डिजिटल्-भारतं समृद्धं कर्तुं योगदानं करिष्यामः ।

(सर्वे मिलित्वा गायन्ति)

**सर्वं विकसितं भाति डिजिटल्-भारतेऽधुना ।**
**जीवनस्य च सौकर्यं सहसा लभते जनः ।।**

# अवधेयम्



## शब्दार्थाः :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| संग्रहालयः | वस्तुसंग्रहगृहम् | संग्रहालय | Museum | ସଂଗ୍ରହାଳୟ |
| ह्लॉलोग्राम् | त्रिवैम-प्रतिमूर्तिः | ह्लोलोग्राम | Hologram | ହୋଲୋଗ୍ରାମ୍ |
| वर्धिता वास्तविकता | संवर्धिता वास्तविकता | संवर्धित वास्तविकता | Augmented Reality(AR) | ବାସ୍ତବିକତା ବୃଦ୍ଧି ହେଲା |
| आभासीया वास्तविकता | आभासीया वास्तविकता | आभासी वास्तविकता | Virtual Reality(VR) | ଆଭାସୀୟ ବାସ୍ତବିକତା |
| कृत्रिमबुद्धिः | यान्त्रिकी बुद्धिः | कृत्रिम-बुद्धिमत्ता | Artificial Intelligence (AI) | କୃତ୍ରିମ ବୁଦ୍ଧି |
| डिजिटल्-प्रक्षेपणम् | सङ्गणक-चित्रप्रदर्शनम् | डिजिटल प्रक्षेपण | Digital Projection | ଡିଜିଟାଲ୍ ପ୍ରକ୍ଷେପକ |
| संवादः | वार्तालापः | संवाद | Conversation | ସଂବାଦ |
| प्रयुक्तिविद्याः | तन्त्रज्ञानम् | प्रौद्योगिकी | Technology | ପ୍ରଯୁକ୍ତିବିଦ୍ୟା |
| उत्सुकता | जिज्ञासा | उत्सुकता | Curiosity | ଉତ୍କଣ୍ଠା |
| भाषणम् | प्रवचनम् | भाषण | Speech | ଭାଷଣ |
| उपकरणानि | यन्त्राणि | उपकरण | Devices | ସାମଗ୍ରୀ / ଉପକରଣ |
| अन्तर्जालम् | अन्तर्जालम् | संचार | Internet | ଅନ୍ତର୍ଜାଳ |
| योगदानम् | सहयोगः | योगदान | Contribution | ଯୋଗଦାନ/ଅବଦାନ |
| आशुप्रतिक्रियाकूटः | झटिति प्रतिक्रियायाः कूटः | आशु प्रतिक्रिया कोड | Quick Response Code | ଶୀଘ୍ର ପ୍ରତିକ୍ରିୟା କୋଡ୍ |
| विस्तृतम् | विस्तारपूर्वकम् | विस्तृत | Detailed | ବିସ୍ତୃତ |
| उपलब्धिः | सिद्धिः | उपलब्धि | Achievement | ଉପଲବ୍ଧି |
| दैनन्दिनजीवनम् | दैनिक-जीवनम् | दैनिक जीवन | Daily Life | ନିତିଦିନିଆ ଜୀବନ |
| शासनम् | प्रशासनम् | शासन | Governance | ଶାସନ |
| शिक्षणम् | विद्याप्रदानम् | शिक्षण | Teaching | ଶିକ୍ଷଣ |
| वित्तीयसमावेशनम् | धनविषयकः समावेशः | वित्तीय समावेशन | Financial Inclusion | ଆର୍ଥିକ ସମାବେଶ |
| आधारपत्रम् | आधारः (परिचयपत्रम्) | आधार–पत्र | Aadhar Card | ଆଧାର କାର୍ଡ୍ |

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| प्रमाणपत्रम् | साक्ष्यपत्रम् | प्रमाण–पत्र | Certificate | ପ୍ରମାଣ ପତ୍ର |
| शुल्कम् | कर: | शुल्क | Fee | ଶୁଳ୍କ |
| त्वरया | शीघ्रम् | जल्दी | Quickly | ଶୀଘ୍ର |
| जनधनयोजना | एका वित्तीय-समावेशनयोजना | जनधन योजना | Jandhan Financial Scheme | ପ୍ରଧାନମନ୍ତ୍ରୀଙ୍କ ଜନଧନ ଯୋଜନା |
| अनुदानम् | दानम् | अनुदान | Grant | ଅନୁଦାନ |
| शिक्षाया: माध्यमेन | शिक्षणोपायेन | शिक्षाके माध्यम से | Through Education | ଶିକ୍ଷାଦ୍ୱାରା |
| प्रचारणीय: | प्रचारयोग्य: | प्रचार–योग्य | Worth propagating | ପ୍ରଚାର କରିବା ଉଚିତ |
| कृषि: | कृषि-कार्यम् | खेती | Agriculture | ଚାଷ |
| वाणिज्यम् | व्यापार: | व्यापार | Trade | ବ୍ୟବସାୟ/ବାଣିଜ୍ୟ |
| आजीविका | व्यवसाय:/वृत्ति: | व्यवसाय | Employment/ Occupation | ଜୀବିକା |
| साङ्गणिक-सुरक्षा | जालसुरक्षा | साइबर सुरक्षा | Cyber security | ସାଇବର ସୁରକ୍ଷା |
| डिजिटल्-बन्धनम् | डिजिटल्-बन्धनम् | डिजिटल्-बन्धन | Digital Arrest | ଡିଜିଟାଲ ବନ୍ଧନ |
| डिजिटल्-साक्षरता | डिजिटल्-शिक्षा | डिजिटल्-साक्षरता | Digital Literacy | ଡିଜିଟାଲ ସାକ୍ଷରତା |
| युष्माकम् | भवताम् | डिजिटल्-साक्षरता | Digital Literacy | ତୁମମାନଙ୍କର |

DRAFT

## सन्धिविच्छेद:

एकस्यैव = एकस्य + एव
एतस्योपरि = एतस्य + उपरि
परस्परम् = पर: + परम्
प्रत्यक्षमेव = प्रत्यक्षम् + एव
इत्याभ्याम् = इति + आभ्याम्
कश्चन = क: + चन
यश्च = य: + च
जीवनेऽपि = जीवने + अपि
इत्यनेन = इति + अनेन
इत्यादीनि = इति + आदीनि
इत्यस्य = इति + अस्य
नास्ति = न + अस्ति
इत्येव = इति + एव
किञ्चित् = किम् + चित्
अन्तर्जालस्य = अन्त: + जालस्य
इत्येतयो: = इति + एतयो:
इत्याधारित: = इति + आधारित:
विनिमयश्च = विनिमय: + च
भारतेऽधुना = भारते + अधुना

## प्रश्नावली

१. एकपदेन उत्तरं लिखत ।

(क) प्रधानमन्त्रिसंग्रहालये **कीदृशी** प्रौद्योगिकी प्रयुक्ता अस्ति ? ..............................

(ख) हॉलोग्राम्-द्वारा **कस्य** भाषणं दृश्यते ? ..............................

(ग) अस्माकं जीवनं **केन** प्रभावितं भवति ? ..............................

(घ) भारत-सर्वकारस्य महत्त्वाकाङ्क्षिणी योजना **का** अस्ति ? ..............................

(ङ) 'फास्टटयाग' इत्यस्य उपयोगेन **कस्य** संग्रहणं भवति ? ..............................

(च) डिजिटल-क्रान्तौ **किम्** अग्रगण्यं राष्ट्रम् अस्ति ? ..............................

२. उत्तराणि पूर्णवाक्येन लिखत –

(क) प्रधानमन्त्रिसंग्रहालये काः डिजिटल्-प्रौद्योगिक्यः प्रदर्शिताः सन्ति ?

..............................................................................................

(ख) जनाः किमर्थं साङ्गणिक-अपराधेन पीडिताः भवन्ति ?

..............................................................................................

(ग) सुनन्दा 'डिजि-लॉकर्' इत्यस्य उपयोगं कथं करोति ?

..............................................................................................

(घ) डिजिटल्-भारतस्य वित्तीयसमावेशने काः योजनाः सन्ति ?

..............................................................................................

(ङ) डिजिटल्-भारते शिक्षायाः क्षेत्रे केषां पटलानाम् उपयोगः करणीयः ?

..............................................................................................

(च) ग्राम्य-क्षेत्रेषु डिजिटल्-सेवानां समस्या कथं निराकर्तुं शक्यते ?

..............................................................................................

DRAFT

## ३. स्तम्भमेलनं कुरुत–



| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| हॉलोग्राम् | आभासीया-वास्तविकता |
| यूपीआई (UPI) | कृत्रिम-बुद्धिः (AI) |
| डिजि-लॉकर् | शीघ्रं, सुरक्षितं, सुगमं च डिजिटल्-धनदेय-प्रत्यर्पणम् |
| फाष्ट्‌ट्याग् (FASTTag) | डिजिटल्-प्रमाणपत्रम् |
| वीआर (VR) | राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणम् |



## ४. कोष्ठकात् शुद्धं पदं चित्वा शून्यस्थानं पूरयत–

(यूपीआई, दीक्षा, प्रधानमन्त्रिणः भाषणं, ई-नाम्, समृद्धं, जीवन)

(क) प्रधानमन्त्रिसंग्रहालये हॉलोग्राम्-द्वारा .................................... दृश्यते ।

(ख) डिजिटल्-भारतस्य आर्थिकसमावेशनं सुगमं कर्तुं ...................... प्रणाली अस्ति ।

(ग) कृषिक्षेत्रे ................................ पटलस्य उपयोगः भवति ।

(घ) डिजिटल्-भारतस्य शिक्षाक्षेत्रे .................. नाम डिजिटल्-शैक्षिकमञ्चः अस्ति ।

(ङ) भारतस्य डिजिटल्-परिवर्तनं सर्वाणि ........................... क्षेत्राणि स्पृशति ।

(च) वयं डिजिटल्-भारतं ................. कर्तुं योगदानं करिष्यामः ।

## ५. शुद्धम् उत्तरं चिनुत –

(क) प्रधानमन्त्रिसंग्रहालयः कुत्र अस्ति ?

(i) भुवनेश्वरे, (ii) देहल्याम्, (iii) कोलकातायाम्, (iv) अयोध्यायाम्

DRAFT

(ख) केन प्रधानमन्त्रिण: भाषणं श्रूयते दृश्यते च ?

(i) दूरदर्शनेन, (ii) आकाशवाण्या, (iii) ह्लालोग्रामयन्त्रेण, (iv) मुखेन

(ग) मार्गशुल्कस्य संग्रहाय कस्य उपयोग: भवति ?

(i) ईपाठशालाया:, (ii) फाष्ट ट्याग् इत्यस्य, (iii) उमङ्ग इत्यस्य, (iv) डिजिलॉकर इत्यस्य

(घ) एकीकृत-धनदेयप्रत्यर्पण-अन्तरफलकम् इत्युक्ते किम् ?

(i) UPI, (ii) UMANG, (iii) e-NAM, (iv) Facebook

(ङ) पठन-पाठनक्षेत्रे अस्य उपयोग: भवति–

(i) PMKISAN, (ii) COWIN, (iii) DISKHA, (iv) GeM

(च) 'डिजि-लॉकर' मध्ये किं स्थापयितुं शक्यते ?

(i) आधारपत्रम्, (ii) जलम्, (iii) धनम्, (iv) चलच्चित्रम्

## ६. संस्कृतभाषया वाक्यानि रचयत–

(क) लभते (ख) सर्वे

(ग) पठाम: (घ) इव

(ङ) तावत् (च) आम्

## ७. मातृभाषया अनुवादं कुरुत–

(क) अद्यतने विज्ञानयुगे सर्वे मनुष्या: डिजिटल्-प्रौद्योगिक्या: प्रयोगं कुर्वन्ति ।

(ख) जना: अन्तर्जालस्य, सचलदूरवाण्या:, सङ्गणकस्य च साहाय्येन शीघ्रं कार्याणि सम्पादयन्ति ।

(ग) विद्यार्थिन: अपि ई-अधिगम-प्रणालीं स्वीकृत्य ज्ञानं वर्धयन्ति ।

(घ) डिजिटल-योजना भारतस्य महत्त्वाकाङ्क्षिणी योजना अस्ति ।

(ङ) जनाः लोभात् सांगणिक-अपराधे पीड़िताः भवन्ति ।

(च) वयं डिजिटल-भारतं समृद्धं कर्तुं योगदानं करिष्यामः ।

८. सन्धिविच्छेदं कुरुत–

(क) परस्परम् =

(ख) इत्याभ्याम् =

(ग) अन्तर्जालस्य =

(घ) भारतेऽधुना =

(ङ) कश्चन =

(च) एकस्यैव =

९. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।

शिक्षाक्षेत्रे, कृषिक्षेत्रे, वाणिज्ये च 'डिजिटल्' इत्यस्य कथं प्रसारणे उपयोगः भवति ?

DRAFT



## वयं जानिमः

डिजिटल्-भारतम्

### क्षेत्रानुसारं भारते डिजिटल्-प्रगति :

**१. शिक्षाक्षेत्रम्**

- दीक्षामञ्चः = ज्ञान-विनिमयाय डिजिटल् – अवसंरचना (DIKSHA – Digital Infrastructure for Knowledge Sharing)
- राष्ट्रिय-अॅकेॅडमिक्-निक्षेपगृहः (National Academic Depository)
- ई-पाठशाला (एन्.सी.ई.आर्.टी.-सामग्रीभिः युक्ता) (ePathshala)
- सर्वेभ्यः कृत्रिम-बुद्धि-अभियानम् (AI for All)

**२. वित्तं विनिमयः च**

- एकीकृत-विनिमिय-पटलम् (UPI) (Unified Payments Interface)
- भीम-अनुप्रयोगः इत्यस्य माध्यमेन सचलदूरवाण्याः माध्यमेन वा सरलविनिमयः (BHIM App)
- आधार-सक्षम-वित्तीय-पद्धतिः (AEPS)
- रूपे-कार्ड्-स्वदेशी कार्ड्-प्रणाली (RuPay)
- ई-रूपी-डिजिटल्-वौचर्-प्रणाली (e-RUPI)
- जनधन-आधार-दूरवाणी-त्रयी (JAM Trinity)

**३. आरोग्यम्**

- आयुष्मान्-भारत-डिजिटल्-अभियान-स्वास्थ्य-परिचयपत्रम् (ABDM)
- कोविन्-कोविड्-टीकाकरण-पञ्जीकरणम् (CoWIN)
- ई-संजीवनी-दूरस्वास्थ्य-सेवा (eSanjeevani)

**४. शासनम्**

- डिजि-लॉकर्-सुरक्षित-प्रलेख-संग्रहः(Digi-Locker)
- मम शासनम् (जन-संवादाय) (MyGov)
- ई-जनपदसेवा-स्थानिकं शासनम् (eDistrict)
- केन्द्रीकृत-प्रतिवेदन-निस्तारण-पर्यवेक्षण-प्रणाली (CPGRAMS)

**५. कृषिक्षेत्रम्**

- ई-राष्ट्रिय-कृषि-आपणः (eNAM)
- प्रधानमन्त्री-किसान्- सम्माननिधिः (PM-KISAN)
- चल-किसान्-सन्देश-सेवा (mKisan)
- कृषक-सुविधा-सेवा (Kisan Suvidha)

**६. आजीविका-निपुणता**

- राष्ट्रिय-आजीविका-सेवा (National Career Service)
- निपुण-भारत-डिजिटल् (Skill India Digital)
- कौशल-मानचित्रण-पटलम् (ASEEM Portal)
- ई-निपुण-भारत-मञ्चः (eSkill India)

DRAFT

| ७. न्यायव्यवस्था | ८. परिचयः सुरक्षा च |
|---|---|
| ◆ ई-न्यायालयः (eCourts)<br>◆ राष्ट्रिय-न्याय-सांख्यिकी-दत्तांश-गुच्छः (NJDG) | ◆ अपराध-अपराधि-प्रत्यक्षाभिज्ञान-जाल-प्रणाली (CCTNS) |
| **९. कर-प्रणाली व्यवसायः च**<br>◆ वस्तु-सेवा-कर-पटलम् (GST Portal)<br>◆ सर्वकारस्य-विपणि-पटलम् (GeM Portal)<br>◆ उद्यम-पञ्जीकरण-पटलम् (Udyam Portal) | **१०. संप्रेषणं तन्त्रज्ञानम् च**<br>◆ डिजिटल्-भारताभियानम् (आधुनिकस्य राष्ट्रस्य सञ्जीवनी) (Digital India) |

## भारतीयज्ञानपरम्परा

- **छन्दःशास्त्रम् (पिङ्गलाचार्यः)** – पिङ्गलस्य छन्दःशास्त्रे द्विक-सङ्ख्या-व्यवस्था (Binary Number System) निरूपिता अस्ति ।
- **आर्यभटीयम् (आर्यभटः)** – आर्यभटेन प्रतिपादितः दशमलव-सङ्ख्या-विधिः (Decimal System) एवञ्च स्थानिमूलक-गणना-विधिः (Place-Value Notation) आधुनिक-सङ्गणकगणनायाः मूलाधारौ स्तः ।

अधिकसूचनार्थम् अधः प्रदत्तस्य क्यूआर्-कूटस्य उपयोगं कुर्वन्तु–

DRAFT



## परियोजनाकार्यम्

**(1) अधः प्रदत्तसम्पर्कचिह्नेन (लिङ्कइत्यनेन) 'आशुप्रतिक्रिया कूट'–माध्यमेन (क्यूआर्-कोड्) च प्रधानमन्त्रिसंग्रहालयस्य आभासीयं भ्रमणं कृत्वा भारतस्य डिजिटल्-विकासं वर्णयत– सम्पर्कचिह्नम् (लिङ्क) : https://www.pmsangrahalaya.gov.in./virtual-tour आशुप्रतिक्रिया कूटः**

# वयं क्रीडामः

**अत्र वामतः दक्षिणम् उपरितः अधः च आधारं कृत्वा उदाहरणानुसारं शब्दान् रेखाङ्कितान् कुरुत–**



| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| मा | रा | डि | जी | लॉ | क | र् | सं | पी | सै |
| य् | ज | जि | आ | व | हॉ | त | वा | ए | ब |
| ग | मा | ट | भा | र्धि | लो | ब्लॉ | द | म् | र् |
| व् | र्गः | ल् | सी | ता | ग्रा | क् | य | कि | क्रै |
| यू | पी | आ | ई | ना | म् | चे | न्त्र | सा | म् |
| वा | म | जे | शा | वि | ज्ञा | न् | म् | न् | ना |
| णि | ज | म | स | नि | अ | र्थ | व्य | व | स्था |
| ज्य | को | वे | न् | म | कृ | त्रि | म | बु | द्धिः |
| म् | ज | क | स्व | य | म् | प्र | भा | शि | नि |
| प्रौ | द्यो | गि | की | फ़ा | स्टॅ | ग् | छ | क्षा | ष्ठा |



DRAFT

**अधोलिखितान् शब्दान् वर्गद्वये विभजत – सङ्गणकसम्बद्धाः, असङ्गणकसम्बद्धाः च –**

(शब्दाः – अन्तर्जालम्, शिक्षिका, सङ्गणकः, विद्यालयः, ई-पत्रम्, पाठ्यपुस्तकम्, डिजिटल्, लेखनी)

| सङ्गणकसम्बद्धाः | असङ्गणकसम्बद्धाः |
|---|---|
| | |
| | |
| | |
| | |

# दशमः पाठः

# सुभाषितरसाः



**गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे ।**
**स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ।। १ ।।**

**पदच्छेदः-** गायन्ति देवाः किल गीतकानि धन्याः तु ते भारतभूमिभागे स्वर्गापवर्गास्पद-मार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ।

**अन्वयः-** भारतभूमिभागे (ये) भवन्ति ते धन्याः इति देवाः गीतकानि गायन्ति किल । स्वर्गापवर्गास्पद-मार्गभूते (भारतभूमिभागे) तु (देवाः) सुरत्वात् भूयः पुरुषाः (भवन्ति) ।

**भावार्थः-** ये मानवाः अस्यां भारतभूमौ जन्म प्राप्नुवन्ति ते धन्याः इति भारतभूमेः गुणगानं देवाः कुर्वन्ति । अतः वयं सर्वे भारतीयाः भाग्यशालिनः स्मः । धर्म-अर्थ-काम-मोक्षादि प्राप्तये मार्गभूते अस्मिन् भूखण्डे देवाः अपि देवत्वं विहाय मनुष्यरूपेण जन्मग्रहणार्थम् इच्छां कुर्वन्ति ।

**ଭାବାର୍ଥ -** ଯେଉଁ ଲୋକମାନେ ଏହି ଭାରତଭୂମିରେ ଜନ୍ମଗ୍ରହଣ କରନ୍ତି ସେମାନେ ଧନ୍ୟ ବୋଲି ଦେବତାମାନେ ମଧ୍ୟ ଗୁଣଗାନ କରନ୍ତି । ଏଣୁ ଆମେ ସମସ୍ତ ଭାରତବାସୀ ଭାଗ୍ୟଶାଳୀ । ଧର୍ମ- ଅର୍ଥ-କାମ-ମୋକ୍ଷ- ଏହି ଚତୁର୍ବର୍ଗ ଫଳ ପ୍ରାପ୍ତି ପାଇଁ ଏଠାରେ ମାର୍ଗ ପ୍ରଶସ୍ତ ହୋଇଥାଏ । ଏହି ଭୂଖଣ୍ଡରେ ଦେବତାମାନେ ମଧ୍ୟ ଦେବତ୍ୱ ପରିତ୍ୟାଗ କରି ମନୁଷ୍ୟ ରୂପରେ ଜନ୍ମଗ୍ରହଣ କରିବାକୁ ଇଚ୍ଛା କରନ୍ତି ।

**गुणी गुणं वेत्ति न वेत्ति निर्गुणः बली बलं वेत्ति न वेत्ति निर्बलः ।**
**पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः ।। २ ।।**



**पदच्छेदः -** गुणी गुणम् वेत्ति न वेत्ति निर्गुणः बली बलम् वेत्ति न वेत्ति निर्बलः पिकः वसन्तस्य गुणम् न वायसः करी च सिंहस्य बलम् न मूषकः ।

**अन्वयः-** गुणी गुणं वेत्ति । निर्गुणः (गुणं) न वेत्ति । बली बलं वेत्ति, निर्बलः (बलं) न वेत्ति । पिकः वसन्तस्य गुणं (वेत्ति) वायसः (वसन्तस्य गुणं) न (वेत्ति ) । करी च सिंहस्य बलं (वेत्ति) । मूषकः (सिंहस्य बलं) न वेत्ति ।

DRAFT

**भावार्थः -** गुणवान् जनः अन्येषां सद्गुणान् ज्ञातुं शक्नोति । परन्तु गुणहीनः जनः अपरेषां सुगुणान् अवगन्तुं समर्थः न भवति। बलवान् जनः यथा अन्येषां बलं ज्ञातुं पारयति तथा बलरहितः जनः अन्येषां बलं ज्ञातुं न पारयति । वसन्तकाले आगते पिकः वसन्तस्य गणुानुरुपं कुहुतानं करोति । परन्तु काकः मधुरं गातुं न पारयति ।

गजः पशुराजसिंहस्य बलं जानाति किन्तु मूषकः तस्य बलं ज्ञातुं न पारयति । अतः योग्यः जनः एव महत्त्वं ज्ञातुं समर्थः भवति, न अयोग्यः ।

**ଭାବାର୍ଥ -** ଗୁଣବାନ୍ ବ୍ୟକ୍ତି ହିଁ ଅନ୍ୟର ଗୁଣ ବୁଝିପାରେ କିନ୍ତୁ ଗୁଣହୀନ ଅନ୍ୟର ସୁଗୁଣକୁ ବୁଝିପାରେ ନାହିଁ । ବଳବାନ୍ ବ୍ୟକ୍ତି ଅନ୍ୟର ବଳକୁ ବୁଝିପାରେ ମାତ୍ର ବଳହୀନ ବ୍ୟକ୍ତି ଅନ୍ୟମାନଙ୍କର ବଳ ଜାଣିବାରେ ଅସମର୍ଥ ହୁଏ । ବସନ୍ତ ସମୟ ଆସିଲେ କୋଇଲି ବସନ୍ତର ଗୁଣାନୁରୂପ କୁହୁତାନ କରେ । କିନ୍ତୁ କାଉ ମଧୁର ଗାନ କରିପାରେ ନାହିଁ । ହାତୀ ପଶୁରାଜ ସିଂହର ବଳ ଜାଣିପାରେ କିନ୍ତୁ ମୂଷା ସିଂହର ବଳ ଜାଣିପାରେ ନାହିଁ । ଏଣୁ ଯୋଗ୍ୟ ଲୋକ ହିଁ ଅନ୍ୟର ମହତ୍ତ୍ୱ ଜାଣିପାରେ ଅଯୋଗ୍ୟ ନୁହେଁ ।

**भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्दूरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ।। ३ ।।**

**पदच्छेदः -** भवन्ति नम्राः तरवः फलोद्गमैः नवाम्बुभिः दूरविलम्बिनः घनाः
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभावः एव एषः परोपकारिणाम् ।



**अन्वयः -** तरवः फलोद्गमैः नम्राः भवन्ति । घनाः नवाम्बुभि : दूरविलम्बिनः (भवन्ति) ।

सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति) । परोपकारिणाम् एष एव स्वभावः (भवति ) ।

**भावार्थः -** समयानुसारं वृक्षेषु फलानि फलन्ति । फलभारेण ते वृक्षाः नम्राः भवन्ति । तथैव नवजलैः परिपूर्णाः मेघाः अवनताः भवन्ति, भूमिं प्रति आयान्ति, वृष्टिं च कुर्वन्ति ।

अस्मिन् संसारे बहवः परोपकारिणः जनाः सन्ति । स्वसमृद्धिकाले ते उद्धतभावं न प्रकटयन्ति । ते सहृदयाः विनम्राः च सन्तः सदैव परोपकाराय यत्नशीलाः भवन्ति । ते परोपकारं व्रतरूपेण धारयन्ति । व्यासमहर्षिः कथितवान् यत् - परोपकारः पुण्याय पापाय परपीडनम् ।

**ଭାବାର୍ଥ -** ସମୟାନୁସାରେ ଗଛମାନଙ୍କରେ ଫଳ ଫଳନ୍ତି । ଫଳ ଭାରରେ ସେହି ଗଛଗୁଡ଼ିକ ନଇଁ ପଡ଼ନ୍ତି । ସେହିପରି ନୂତନ ଜଳରେ ପରିପୂର୍ଣ୍ଣ ମେଘ ଅବନତ ହୋଇଥାନ୍ତି । ଭୂମି ଉପରକୁ ଝୁଲି ଆସି ବୃଷ୍ଟି କରନ୍ତି । ସଂସାରରେ ବହୁତ ପରୋପକାରୀ ଲୋକ ଅଛନ୍ତି । ନିଜର ସମୃଦ୍ଧି ସମୟରେ ସେମାନେ ଔଦ୍ଧତ୍ୟ ପ୍ରକଟ କରନ୍ତି ନାହିଁ । ସେମାନେ ସହୃଦୟ ଓ ବିନମ୍ର ହୋଇ ସଦା ସର୍ବଦା ପରୋପକାରକୁ ବ୍ରତ ରୂପେ ଧାରଣ କରନ୍ତି । ମହର୍ଷି ବ୍ୟାସ କହିଛନ୍ତି- ''ପରୋପକାରଃ ପୁଣ୍ୟାୟ ପାପାୟ ପରପୀଡ଼ନମ୍'' ।



**यथा चतुर्भि: कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनै: ।**
**तथा चतुर्भि: पुरुष: परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा ।। ४ ।।**

**पदच्छेद :-** यथा चतुर्भि: कनकम् परीक्ष्यते निघर्षण-छेदन-ताप-ताडनै: तथा चतुर्भि: पुरुष: परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा ।

**अन्वय :-** यथा निघर्षण-छेदन-ताप-ताडनै: चतुर्भि: (उपायै:) कनकं परीक्ष्यते । तथा कुलेन शीलेन गुणेन कर्मणा (च) चतुर्भि: पुरुष: परीक्ष्यते ।

**भावार्थ : -** स्वर्णकार: सुवर्णस्य शुद्धताम् आकलयितुम् आदौ निकषप्रस्तरे निघर्षणं करोति , तदनन्तरं तस्य सुवर्णस्य कर्तनं करोति, तत: अग्निना दहति, अन्ते सुवर्णखण्डे प्रहारं करोति । एभि: चतुर्भि: प्रकारै: परीक्ष्य सुवर्णस्य पूर्णशूद्धतां ज्ञातुं शक्नोति । तथैव पुरुष: अपि चतुर्भि: उपायै: परीक्षणीय: । यथा- कस्मिन् परिवारे अयं जन: जन्म अलभत ? तस्य स्वभाव: कीदृश: अस्ति ? स: कीदृशै: गुणै: युक्त: अस्ति ? पुन: स: कीदृशं कर्म करोति ? इति एषु निकषेषु परीक्ष्य एव तस्य स्वभाव: ज्ञातुं शक्यते ।

**ଭାବାର୍ଥ -** ସ୍ୱର୍ଣ୍ଣକାର ସୁନାର ଶୁଦ୍ଧତା ଆକଳନ କରିବାକୁ ପ୍ରଥମେ ତାକୁ କଷଟି ପଥରରେ ଘର୍ଷଣ କରେ, ତା'ପରେ ସେହି ସୁବର୍ଣ୍ଣକୁ ଛେଦନ କରେ, ପରେ ଅଗ୍ନିରେ ଦାହ କରେ ଓ ଶେଷରେ ସୁବର୍ଣ୍ଣକୁ ପ୍ରହାର କରେ ।



ଏହି ଚାରି ପ୍ରକାର ପରୀକ୍ଷା କରି ସୁବର୍ଣ୍ଣର ପୂର୍ଣ୍ଣ ଶୁଦ୍ଧତା ଜାଣିପାରେ । ଠିକ୍ ସେହିପରି ମନୁଷ୍ୟର ସ୍ୱଭାବ ଚାରି ପ୍ରକାରର ପରୀକ୍ଷାରେ ଜାଣିହୁଏ । ଯଥା- ସେ କେଉଁ ବଂଶରେ ଜନ୍ମଗ୍ରହଣ କରିଛି, ତା'ର ଚରିତ୍ର କିପରି, ସେ କେଉଁ ଗୁଣଯୁକ୍ତ ଓ ସେ କ'ଣ କାମ କରେ ।

**अष्टौ गुणा: पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दम: श्रुतं च ।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ।। ५ ।।**

**पदच्छेद: -** अष्टौ गुणा: पुरुषम् दीपयन्ति प्रज्ञा च कौल्यम् च दम: श्रुतम् च । पराक्रम: च अबहुभाषिता च दानम् यथाशक्ति कृतज्ञता च ।

**अन्वय: -** प्रज्ञा कौल्यं दम: श्रुतं पराक्रम:, अबहुभाषिता च यथाशक्ति दानं कृतज्ञता च (इत्येते) अष्टौ गुणा: पुरुषं दीपयन्ति ।

**भावार्थ: -** अष्टभि: गुणै: युक्त: मानव: सर्वदा समाजे सम्मानं प्राप्नोति । विशेषज्ञानं, कुलीनता, संयम:, वेदादीनां शास्त्राणां ज्ञानं, पराक्रम:, अल्पभाषिता, सामर्थ्यानुसारं दानशीलता, कृतज्ञता च इति एते अष्टौ गुणा: सन्ति । मानव: उत्तमगुणान् आश्रित्य सम्मानित: भवति । अत: उक्तम् - **गुणवान् पूज्यते नर:** ।

**ଭାବାର୍ଥ -** ଆଠଟି ଗୁଣରେ ଯୁକ୍ତ ମନୁଷ୍ୟ ସମାଜରେ ସଦା ସର୍ବଦା ସମ୍ମାନ ଲାଭ କରିଥାଏ । ସେହି ଆଠଟି ଗୁଣ ହେଲେ ଯଥା- ପ୍ରଜ୍ଞା, କୁଳୀନତା, ସଂଯମ, ବେଦ ଇତ୍ୟାଦି ଶାସ୍ତ୍ର ବିଷୟରେ ଜ୍ଞାନ, ପରାକ୍ରମ, ଅଳ୍ପଭାଷିତା, ସାମର୍ଥ୍ୟ ଅନୁସାରେ ଦାନଶୀଳତା ଏବଂ କୃତଜ୍ଞତା । ଏଣୁ ମନୁଷ୍ୟ ଉତ୍ତମ ଗୁଣ ଅର୍ଜନରେ ଯତ୍ନଶୀଳ ହେବା ଉଚିତ । ତେଣୁ କଥାରେ ଅଛି ''ଗୁଣବାନ୍ ପୂଜ୍ୟତେ ନରଃ'' ।

**न सा सभा यत्र न सन्ति वृद्धा: वृद्धा न ते ये न वदन्ति धर्मम् ।**
**धर्म: स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छलमभ्युपैति ।। ६ ।।**

**पदच्छेद: -** न सा सभा यत्र न सन्ति वृद्धा: वृद्धा: न ते ये न वदन्ति धर्मम् धर्म: स: नो यत्र न सत्यम् अस्ति सत्यम् न तद् यद् छलम् अभ्युपैति ।

**अन्वय: -** सा सभा न (अस्ति ), यत्र वृद्धा: न सन्ति । ते वृद्धा: न (सन्ति), ये धर्मं न वदन्ति । स: धर्म: नो (अस्ति), यत्र सत्यं न अस्ति ? । तत् सत्यं न (अस्ति), यत् छलम् अभ्युपैति ।

**भावार्थ :-** अस्मिन् संसारे विविधाः सभाः भवन्ति। सभासु जनसमागमः भवति । बहुभाषणं प्रचलति । तेन साफल्यं न भवति । वस्तुतः सा एव सभा सफला भवति यत्र वयोवृद्धाः ज्ञानवृद्धाः च जनाः सन्ति ।



ते ज्ञानवृद्धाःसन्ति ये धर्मविषये कथयन्ति । यत्र सत्यं नास्ति अपि च छलना अस्ति सः धर्मः न । अतः यत्र ज्ञानवृद्धाः सत्यं छलनारहितम् उपदेशं कुर्वन्ति सा उत्तमा सभा कथ्यते ।

**ଭାବାର୍ଥ -** ଏହି ସଂସାରରେ ବିଭିନ୍ନ ସଭା ହୋଇଥାଏ । ସଭାମାନଙ୍କରେ ଜନସମାଗମ ହୁଏ । କିନ୍ତୁ ଯେଉଁଠି ବୟୋବୃଦ୍ଧ ଓ ଜ୍ଞାନବୃଦ୍ଧ ଉପସ୍ଥିତ ଥାଆନ୍ତି ସେହି ସଭା ହିଁ ପ୍ରକୃତରେ ସଭା ଅଟେ ।

**दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।**
**उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ।।७।।**



**पदच्छेद :-** दुर्जनेन समम् सख्यम् प्रीतिम् च अपि न कारयेत् उष्णः दहति च अङ्गारः शीतः कृष्णा यते करम् ।

**अन्वय :-** दुर्जनेन समं सख्यं प्रीतिं च अपि न कारयेत् । उष्णः अङ्गारः दहति शीतः च करं कृष्णायते ।

**भावार्थ :-** दुर्जनेन सह मैत्री न करणीया । यतो हि दुर्जनः विश्वासयोग्यः न भवति। दुर्जनेन सह बन्धुता प्रीतिः न करणीया ।



यत: तस्य दुर्जनस्य मुखे माधुर्यं परं हृदये कपटता भवति । अङ्गार: उष्ण: भवति चेत् तापेन करं ज्वालयति ? । पुन: यदि स: अङ्गार: शीतल: अस्ति तदापि हस्तं मलिनं करोति । तथैव दुर्जन: सर्वदा एव अनिष्टं करोति कारयति च ।

**ଭାବାର୍ଥ -** ଦୁର୍ଜନ ସହିତ ବନ୍ଧୁତା ଅନୁଚିତ । ଯେହେତୁ ଦୁର୍ଜନ ବିଶ୍ୱାସଯୋଗ୍ୟ ହୋଇନଥାଏ । ଦୁର୍ଜନ ସହିତ ପ୍ରୀତି କରିବା ଅନୁଚିତ । ଯେଣୁ ଦୁର୍ଜନର ମୁଖରେ ମାଧୁର୍ଯ୍ୟ ଥାଏ । ତା'ର କିନ୍ତୁ ତା'ର ହୃଦୟରେ କପଟତା ଭରି ରହିଥାଏ । ଯେପରି ଅଙ୍ଗାର ଉତ୍ତପ୍ତ ହେଲେ ହାତକୁ ଜାଳିଦିଏ, ଶୀତଳ ହେଲେ ମଧ୍ୟ ହାତକୁ କଳା ରଙ୍ଗରେ ମଳିନ କରିଥାଏ । ଦୁର୍ଜନ ବ୍ୟକ୍ତି ସର୍ବଦା ଅନିଷ୍ଟ ହିଁ କରେ ।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।**
**एवं पुरुषकारेण विना दैवं न सिध्यति ।।८।।**



**पदच्छेद :-** यथा हि एकेन चक्रेण न रथस्य गति : भवेत् एवम् पुरुषकारेण विना दैवम् न सिध्यति ।

**अन्वय :-** यथा हि एकेन चक्रेण रथस्य गति: न भवेत् एवं पुरुषकारेण विना दैवं न सिध्यति ।

**भावार्थ :-** रथस्य गति: चक्रद्वयेन एव सम्यक् भवति । एकेन चक्रेण रथस्य गमनं न सम्भवति । रथस्य गति: स्थगिता भवति ।

पुरुषार्थेन विना फलं न सिध्यति । भाग्ये स्थितेऽपि उद्यमेन एव फलं लभ्यते । अत्र अनुभूयते यत् प्रयत्न: भाग्यं च मानवरथस्य द्वे चक्रे स्त: । उक्तम् अपि - उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथै: ।



**ଭାବାର୍ଥ -** ଦୁଇଟି ଚକରେ ରଥ ଗତି କରିଥାଏ । ଗୋଟିଏ ଚକରେ ରଥ ଗତି କରିପାରେ ନାହିଁ । ରଥ ଅଟକିଯାଏ । ସେପରି ପୁରୁଷାର୍ଥ ବିନା ଭାଗ୍ୟ ଫଳପ୍ରଦ ହୁଏ ନାହିଁ । ଭାଗ୍ୟରେ ଥିଲେ ମଧ୍ୟ ଉଦ୍ୟମ ନକଲେ ସଫଳତା ପ୍ରାପ୍ତ ହୁଏ ନାହିଁ । ଏଠାରେ କୁହାଯାଇଛି ଯେ ଭାଗ୍ୟ ଏବଂ ପରିଶ୍ରମ ମଣିଷର ସଫଳତା ରୂପକ ରଥର ଦୁଇଟି ଚକ । ତେଣୁ କୁହାଯାଇଛି– ''ଉଦ୍ୟମେନ ହି ସିଧ୍ୟନ୍ତି କାର୍ଯ୍ୟାଣି ନ ମନୋରଥୈଃ'' ।

# अवधेयम्

## शब्दार्था :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| शृङ्खलितम् | अनुशासितम् | अनुशासित | Disciplined | ଶୃଙ୍ଖଳିତ |
| गायन्ति | गानं कुर्वन्ति | गाते हैं | Sing | ଗାନ କରନ୍ତି |
| किल | निश्चयेन | निश्चय से | With determination | ନିଶ୍ଚିତ ଭାବରେ |
| धन्या: | प्रशंसिता: | प्रशंसनीय | Praiseworthy | ଧନ୍ୟ |
| अपवर्ग: | निर्वाणम् | मोक्ष | Liberation | ମୁକ୍ତି |
| भूय: | पुन: पुन: | बार-बार | Over and over again | ବାରଂବାର |
| सुरत्वात् | देवत्वात् | देवत्व से | From divinity | ଦେବତ୍ୱ ହେତୁ |
| वेत्ति | जानाति | जानता है | Knows | ଜାଣେ |
| निर्गुण: | गुणहीन: | गुण रहित | Without virtue | ଗୁଣହୀନ |
| बली | बलवान् | बलशाली | Powerful | ବଳଶାଳୀ |
| निर्बल: | बलरहित: | बलहीन | Weak | ବଳହୀନ |
| पिक: | कोकिल: | कोयल | Cuckoo | କୋଇଲି |
| वायस: | काक: | कौआ | Crow | କାଉ/କୁଆ |
| करी | गज: | हाथी | Elephant | ହାତୀ |
| नम्रा: | अवनता: | झुके हुए | Bent | ନମ୍ର |
| तरव: | पादपा: | वृक्ष | Trees | ଗଛଗୁଡ଼ିକ |
| फलोद्गमै: | फलभारै: | फलों के भार से | With weight of fruits | ଫଳ ଧରିଲେ |
| अम्बुभि: | जलै: | जल से भरे हुए | Filled with water | ଜଳପୂର୍ଣ୍ଣ ହୋଇ |
| दूरविलम्बिन: | दूरात् अध:अवनता: | दूर से नीचे झुके हुए | Come down from above | ଦୂରରୁ ନିମ୍ନଗାମୀ |
| घना: | मेघा: | बादल | Clouds | ମେଘଗୁଡ଼ିକ |
| अनुद्धता: | गर्वशून्या: | अभिमान से रहित | Polite | ଅହଂକାର ରହିତ |
| सत्पुरुषा: | सज्जना: | अच्छे लोग | Good people | ସାଧୁ ଲୋକମାନେ |
| समृद्धिभि: | प्रचुरै: धनै: | बहुत धन से | With abundance of wealth | ପ୍ରାଚୁର୍ଯ୍ୟ ଦ୍ୱାରା |
| कनकम् | सुवर्णम् | सोना | Gold | ସୁବର୍ଣ୍ଣ |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| परीक्ष्यते | परीक्षितं भवति | उसकी परीक्षा की जाती है | Is tested | ପରୀକ୍ଷା କରାଯାଏ |
| निघर्षणम् | घर्षणम् | घिसना | Rubbing | ଘର୍ଷଣ |
| छेदनम् | कर्तनम् | काटना | Cutting | କର୍ତ୍ତନ କରିବା |
| ताडनै: | प्रहारै: | प्रहार के द्वारा | By hitting | ପ୍ରହାର ଦ୍ୱାରା |
| कुलेन | वंशेन | कुल से | By the family | ବଂଶରେ |
| शीलेन | स्वभावेन | स्वभाव से | By nature | ସ୍ୱଭାବରେ |
| कर्मणा | कार्येण | कार्य से | By work | କାର୍ଯ୍ୟରେ |
| दीपयन्ति | प्रकाशयन्ति | प्रकाशित करते हैं | Illuminate | ଦୀପ୍ତିମାନ କରନ୍ତି |
| प्रज्ञा | विशेषज्ञानम् | विशिष्ट बुद्धि | Extra-ordinary intelligence | ଅସାଧାରଣ ଜ୍ଞାନ |
| कौल्यम् | कुलीनता | अच्छे कुल में जन्म | Birth in a good family | କୁଳୀନତା |
| दम: | इन्द् रियसंयम: | इन्दियों /इन्दिया संयम | Control over senses | ଇନ୍ଦ୍ରିୟ ସଂଯମ |
| श्रुतम् | शास्त्रज्ञानम् | शास्त्रों का ज्ञान | Knowledge of scriptures | ଶାସ୍ତ୍ରଜ୍ଞାନ |
| पराक्रम: | साहसम् | वीरता | Bravery | ସାହସ |
| अबहुभाषिता | मितभाषिता | कम और सार्थक बोलना | Speaking less but meaningfully | ଅଳ୍ପଭାଷୀଗୁଣ |
| छलम् | कपटता | छलना | Cheating | ଛଳନା |
| अभ्युपैति | प्राप्नोति | प्राप्त करता है | Associates | ପ୍ରାପ୍ତକରେ |
| दुर्जनेन | दुष्टजनेन | दुष्ट व्यक्ति से | With wicked people | ଅସାଧୁ ବ୍ୟକ୍ତି |
| समम् | सह | साथ | With | ସହିତ |
| सख्यम् | मैत्री | मित्रता | Friendship | ମିତ୍ରତା |
| दहति | ज्वलयति | जलाता है | Burns | ଜାଳିଦିଏ |
| अङ्गार: | दग्धकाष्ठ: | अङ्गारा | Charcoal | କୋଇଲା |
| कृष्णायते | मलिनं करोति | काला करता है | Blackens | କଳା କରିଦିଏ |
| दैवम् | भाग्यम् | भाग्य | Luck | ଭାଗ୍ୟ |
| सिध्यति | सिद्धं भवति | फलता है | Fruitifies | ସିଦ୍ଧ ହୁଏ |
| पुरुषाकारेण | पौरुषेण | पौरुष से | By human effort | ପୁରୁଷର ପ୍ରୟାସରେ |

DRAFT

## सन्धिविच्छेदः

| | | |
|---|---|---|
| धन्यास्तु | = | धन्याः + तु |
| स्वर्गापवर्ग | = | स्वर्ग + अपवर्ग |
| प्राप्नुवन्ति | = | प्र + आप्नुवन्ति |
| पिको वसन्तस्य | = | पिकः + वसन्तस्य |
| नम्रास्तरवः | = | नम्राः + तरवः |
| फलोद्गमैः | = | फल + उद्गमैः |
| नवाम्बुभिर्दूरविलम्बिनो घनाः | = | नव + अम्बुभिः + दूरविलम्बिनः |
| एवैषः | = | एव + एषः |
| परोपकारेण | = | पर + उपकारेण |
| सदैव | = | सदा + एव |
| पराक्रमश्चाबहुभाषिता | = | पराक्रमः + च + अबहुभाषिता |
| इत्येते | = | इति + एते |
| सत्यमस्ति | = | सत्यम् + अस्ति |
| तद्यच्छलमभ्युपैति | = | तत् + यत् + छलम् + अभ्युपैति |
| अभ्युपैति | = | अभि + उप + एति |
| चापि | = | च + अपि |
| उष्णो दहति | = | उष्णः + दहति |
| चाङ्गारः | = | च + अङ्गारः |
| यतो हि | = | यतः + हि |
| ह्येकेन | = | हि + एकेन |
| गतिर्भवेत् | = | गतिः + भवेत् |

DRAFT

## प्रश्नावली

### १. एकपदेन उत्तराणि लिखत -

(क) गीतानि के गायन्ति ? ..............................................

(ख) कः बलं न वेत्ति ? ..............................................

(ग) कः वसन्तस्य गुणं वेत्ति ? ..............................................

(घ) फलोद्गमैः के नम्राः भवन्ति ? ..............................................

(ङ) केन समं सख्यं न करणीयम् ? ..............................................

(च) केन विना दैवं न सिध्यति ? ..............................................

### २. उत्तराणि पूर्णवाक्येन लिखत -

(क) तरवः कथं नम्राः भवन्ति ? ..............................................

(ख) समृद्धिभिः के अनुद्धताः भवन्ति ? ..............................................

(ग) सत्पुरुषाः कीदृशाः भवन्ति ? ..............................................

(घ) का उत्तमा सभा कथ्यते ? ..............................................

(ङ) केन विना दैवं न सिध्यति ? ..............................................

(च) केन सह सख्यं न कारयेत् ? ..............................................

DRAFT

## ३. स्तम्भ मेलनं कुरुत -



| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| गायन्ति देवाः किल गीतकानि | सत्पुरुषाणां स्वाभाविकी नम्रता |
| गुणी गुणं वेत्ति | सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| भवन्ति नम्राः तरवः फलोद्गमैः | भारतभूमेः माहात्म्यवर्णनम् |
| यथा चतुर्भिः कनकं परीक्ष्यते | सज्जनः एव गुणानां मर्मज्ञः |
| अष्टौ गुणाः पुरुषं दीपयन्ति | दुष्टसङ्गः उष्णाङ्गारसदृशः |
| दुर्जनेन समं सख्यं न कारयेत् | केवलं दैवं प्रयत्नं विना असिद्धम् |
| एकेन चक्रेण न रथस्य गतिः | प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |



## ४. कोष्ठकतः पदानि चित्वा शून्यस्थानानि पूरयत -

फलोद्गमैः, गुणं, कृतज्ञता, सिध्यति , श्रुतम्, शीलेन

(क) गुणी .............................................. वेत्ति न वेत्ति निर्गुणः ।

(ख) भवन्ति नम्राः तरवः .............................................. ।

(ग) पुरुषः परीक्ष्यते कुलेन, .............................................., गुणेन, कर्मणा ।

(घ) गुणाः पुरुषं दीपयन्ति - प्रज्ञा, कौल्यं, दमः, .............................................. ।

(ङ) दानं यथाशक्ति .............................................. च ।

(च) एवं पुरुषकारेण विना दैवं न .............................................. ।

DRAFT

## ५. समुचितं विकल्पं चिनुत-

(क) ''गायन्ति देवाः किल गीतकानि'' - इत्यस्य श्लोकस्य मुख्यविषयः कः ?

(i) वसन्तस्य सौन्दर्यम् (ii) भारतभूमेः गौरवम्

(iii) कर्मणां फलम् (iv) दानस्य प्रभावः

(ख) ''गुणी गुणं वेत्ति'' इत्यत्र कः गुणं न जानाति ?

(i) गुणी (ii) निर्गुणः

(iii) पिकः (iv) बली

(ग) ''पिको वसन्तस्य गुणं न वायसः'' - इत्यस्य तात्पर्यं किम् ?

(i) पिकः मधुरं गायति न वायसः (ii) सुजन एव गुणं जानाति

(iii) वायसः अपि सरसं गानं करोति (iv) वसन्तः निर्गुणः अस्ति

(घ) ''भवन्ति नम्राः तरवः फलोद्गमैः'' इत्यस्य अर्थः कः ?

(i) वृक्षाणां कठोरता (ii) सत्पुरुषाणाम् उन्नतिः

(iii) फलयुक्ताः वृक्षाः नम्राः भवन्ति (iv) परोपकारिणां दुर्बलता

(ङ) ''न सा सभा यत्र न सन्ति वृद्धाः''- इत्यत्र सभायाः महत्त्वं किम् ?

(i) सभा मनोरञ्जनाय भवति

(ii) सभा धनसम्पत्तिं प्रदातुं शक्नोति

(iii) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः

(iv) सभा केवलं राजकार्यार्थं भवति

(च) दुर्जनेन सह सख्यं किमर्थं न कार्यम् ?

(i) सः मित्रं भवति (ii) सः धनं ददाति

(iii) सः शिक्षां ददाति (iv) सः उष्णाङ्गारवद् हानिकरः भवति



## वयं जानीमः

**विष्णुपुराणम्-** प्रसिद्धेषु अष्टादशसु पुराणेषु विष्णुपुराणम् अन्यतमम्। अस्मिन् पुराणे प्रायेण सप्तसहस्राधिकश्लोकाः सन्ति । अत्र भगवतः विष्णोः तस्य च अवताराणां विषयो वर्णितः। भारतवर्षस्य गौरवविषये विष्णुपुराणम् अतीव प्रामाणिकं तथ्यं प्रकाशयति ।

**महाभारतम्-** संस्कृतसाहित्ये महाभारतम् इति इतिहासग्रन्थः पञ्चमवेदरूपेण स्वीकृतः। अस्मिन् ग्रन्थे लक्षश्लोकाः सन्ति । अतः शतसाहस्रीसंहिता इति अस्य अपरं नाम । महाभारते अष्टादश पर्वाणि सन्ति ।

**भर्तृहरिः-** भर्तृहरिः संस्कृतकाव्यवाङ्मये महान् कविः अस्ति । नीतिशास्त्रविशारदस्य तस्य कृतयः नीतिशतकं शृङ्गारशतकं वैराग्यशतकं चेति भारतीयज्ञानपरम्परां पोषयन्ति।

**हितोपदेशः-** पण्डितनारायणेन हितोपदेशः कथाग्रन्थः सङ्कलितः । ग्रन्थेऽस्मिन् विविधाः कथाः नीतिश्लोकाः च सन्ति । हितोपदेशः चतुर्धा विभक्तः- मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः।

**चाणक्यनीतिः-** चाणक्यस्य नीतिश्लोकाः माणिक्यसदृशाः सन्ति। बालानां चरित्रनिर्माणाय आदर्शमानवजीवनप्रतिष्ठार्थं च आचार्यस्य चाणक्यस्य नीत्युपदेशाः अत्यन्तम् उपयोगिनः सन्ति ।



## परियोजनाकार्यम्

१. अन्तर्जालात् पुस्तकेभ्यश्च विंशतिसुभाषितानां संग्रहं कुरुत ।

२. किमपि नीतिवाक्यम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।

३. पाठे आगतानि सुभाषितानि कण्ठस्थीकृत्य कक्षायां श्रावयत ।

**६. मातृभाषया अनुवादं कुरुत -**

(क) देवाः गीतकानि गायन्ति ।

(ख) गुणी गुणं वेत्ति ।

(ग) फलोद्गमैः तरवः नम्राः भवन्ति ।

(घ) अष्टौ गुणाः पुरुषं दीपयन्ति ।

(ङ) दुर्जनेन समं प्रीतिं न कारयेत् ।

(च) पुरुषकारेण विना दैवं न सिध्यति ।

DRAFT

## ७. संस्कृतेन वाक्यानि रचयत -

(क) तरवः (ख) परीक्ष्यते (ग) विना

(घ) गायन्ति (ङ) दहति (च) यत्र

## ८. सन्धिविच्छेदं कुरूत -

(क) चाङ्गारः (ख) धन्यास्तु (ग) चापि

(घ) सदैव (ङ) इत्येते (च) सत्यमस्ति



## अतिरिक्तपठनम्

### भक्तकविः जयदेवः

जयदेवः उत्कलीयः । सः उत्कलस्य अविभक्तपुरीमण्डले प्राचीनदीतीरे 'केन्दुविल्व' इति ग्रामे जन्मग्रहणम् अकरोत् । सम्प्रति तद्ग्रामः आधुनिकखोर्द्धामण्डले जयदेवनिर्वाचनक्षेत्रम् इति परिचितः । अस्य माता रमादेवी पिता श्री भोजदेवः च । बाल्यकालतः मथुरावृन्दावनादिषु पुण्यस्थलेषु अटतः तस्य मनसि राधामाधवयोः कथायाः महान् प्रभावः जातः। भक्तकविः जयदेवः संस्कृत-संगीतयोः वेत्ता । अयं गीतगोविन्दकाव्यस्य लेखकः । इदं प्रसिद्धं गीतिकाव्यम् । काव्येऽस्मिन् भक्तिभावः विशेषरूपेण वर्णितः। काव्ये लिखिता भाषा अतीव सरला मनोहरा च । गीतगोविन्दं द्वादशसर्गात्मकं काव्यम् । अस्य काव्यसौन्दर्यम् अतुलनीयम् । अत्र शब्दलालित्यम् अर्थसौकुमार्यम् उभयोरपि समप्राधान्यं विद्यते । मधुरभक्तिमयं गीतिकाव्यमिदम् । भगवतः आराधनायै उद्दिष्टम् । अस्य काव्यस्य पठनेन हरिस्मरणे मनो निरतं भवेत् । जयदेवस्य पत्नी पद्मावती प्रथमतः गीतगोविदम् अवलयबध्य नृत्यति स्म । गीतगोविन्दस्य संगीताधारेण ओडिशीनृत्याङ्गनाः समग्रे विश्वे नृत्यं प्रदर्शयन्त्यः जनमानसं रञ्जयन्ति । अधुनापि वैष्णवमन्दिरेषु गीतगोविन्दस्य मधुरपदानि भक्तजनाः गायन्ति ।

भक्तिरसकविताम् इच्छसि चेत् तर्हि जयदेव सरस्वतीं शृणु इति स्वयं जयदेवः कथयति -

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ।

मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ।।इति ।

DRAFT

# एकादशः पाठः
# प्रियं मे भारतवर्षम्



भारतस्य एकस्मिन् ग्रामे आदित्य: नाम युवक: वसति स्म । स: अनेकानि पुस्तकानि पठति स्म । सामाजिकगणमाध्यमेषु विदेशस्य विकासनं प्रकृतिरमणीयतां च दृष्ट्वा स: आकृष्ट: । विदेशं प्रति गमने तस्य आसक्ति: जाता । स: तदर्थं धनसञ्चयनम् आरब्धवान् । वस्तूनि सज्जीकृतवान् अपि ।

अग्रिमदिने स: केनचित् साधुना अमिलत् । सम्भाषणावसरे आदित्य: विदेशस्य वर्णनं कृतवान् । साधु: मन्दहासेन तत् सर्व श्रुतवान् अनन्तरं साधु: भारतदेशस्य वर्णनं कर्तुम् आरब्धवान् । आदित्यसाध्वो: मध्ये वाग्वाद: अभवत् । साधु: आदित्यम् उक्तवान्- ''एकवारं सम्पूर्ण भारतपर्यटनं कृत्वा आगच्छ । अनन्तरं मेलिष्याव:'' इति ।

आदित्य: उक्तवान् - ''किन्तु अहं विदेशं गन्तुम् एव धनं सञ्चितवान्''

''अस्तु, अलं चिन्तया । भारतपर्यटनार्थम् अहं तुभ्यं धनं ददामि । परन्तु पर्यटनानन्तरं भारतम् अतिरमणीयम् इति सिद्धं चेत् इदं धनं मह्यं प्रतिदातव्यम्'' इति साधु: अकथयत् ।

आदित्य: एतत् अङ्गीकृतवान् ।

स: भारतयात्राम् आरभ्य देशस्य एकैकं कोणं गतवान् । पर्यटनसमये स विविधराज्येषु अनेकानि पुरातनानि मन्दिराणि, भूप्रकृते: सौन्दर्यम् इत्यादीन् सर्वान्-दृष्टवान् । स: शनै: शनै: मनसा भारतदेशे रुचिं प्राप्तवान् । तस्मिन् काले तस्य मनसि भाव: आगत:- 'अहं कश्चन कूपमण्डूक: आसम्' इति ।

तदनन्तरम् आदित्य: विदेशम् अपि गतवान् । तत्रापि एकैकं स्थलं दृष्टवान् । अन्ते तेन भाव: प्राप्त:- 'भारतदेशे यत् शिल्पसौन्दर्य- पावित्र्यादिकम् अस्ति तत् विदेशे नास्ति' इति ।

प्रत्यागत: स: साधुं दृष्टवा अवदत् - ''अहं पराजित: । अत: धनं प्रतिदातव्यं ननु ? किन्तु तदर्थं कश्चन समय: अपेक्ष्यते'' इति ।

तदा साधु: हसित्वा अवदत्- ''मम कृते धनं न आवश्यकम् । तत् धनम् अस्माकं देशाय उपयुज्यताम् । आवयो: मातृभूमि: भारतदेश: अतिरमणीय अमूल्य: च इति त्वम् अङ्गीकृतवान् । एतदेव आवश्यकम् । जागरण दृष्टया भाषा, भूषा, भजनं, भोजनं, भवनं, भ्रमणं यति- भ-षट्कं कथ्यते । आरम्भ: स्वस्मात् भवेत् । तत: स्वगृहे स्वपरिवारे कार्यालये क्रमेण सर्वत्र करणीयम् । सदा स्वमातृभूमि विषये अभिमान: भवतु'' इति ।



## अवधेयम्

### शब्दार्था :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| वसति | वासं करोति | रहता है | lives | ବାସ କରେ |
| सामाजिक माध्यमेषु | सामाजिक माध्यमेषु | सामाजिक माध्यम म | in the social medium | ସାମାଜିକ ମାଧ୍ୟମରେ |
| दृष्ट्वा | दर्शनं कृत्वा | देखकर | by observing | ଦେଖି |
| कर्त्तुम् | करणार्थम् | करनेके लिए | for doing | କରିବାକୁ |
| तुभ्यम् | तदा कृते | तुम्हारे लिए | for you | ତମ ପାଇଁ |
| प्रतिदातव्यम् | प्रतिदानं करणीयम् | लौटाना होगा | for returning | ଫେରେଇବାକୁ ହେବ |
| आरभ्य | आरम्भं कृत्वा | आरम्भ करके | by beginning | ପ୍ରାରମ୍ଭ କରି |
| पराजित: | पराजयं प्राप्त: | हारा हुआ | defeated | ହାରିଯାଇଥିବା |
| उपयुज्यताम् | उपयोगं करोतु | उपयोग करो | apply | ବିନିଯୋଗ କର |

DRAFT

### सन्धिविच्छेद:

सम्भाषणावसरे = सम्भाषण + अवसरे

वाग्वाद: = वाक् + वाद:

भारतपर्यटनार्थम् = भारतपर्यटन + अर्थम्

पर्यटनानन्तरम् = पर्यटन + अनन्तरम्

एकैकम् = एक + एकम्

कश्चन = क: + चन

तदनन्तरम् = तत् + अनन्तरम्

तत्रापि = तत्र + अपि

पावित्र्यादिकम् = पावित्र्य + आदिकम्

प्रत्यागत: = प्रति + आगत:

१. एकपदेन उत्तरं लिखत -

(क) युवकस्य नाम किम् ? ..........................................

(ख) सः केन अमिलत् ? ..........................................

(ग) आदित्यसाध्वोः मध्ये किम् अभवत् ? ..........................................

(घ) कः आदित्याय धनं दत्तवान् ? ..........................................

(ङ) स्वमातृभूमिविषये किं भवतु ? ..........................................

(च) भारतभ्रमणं कः कृतवान् ? ..........................................

२. कोष्ठकतः उचितं पदं चित्वा शून्यस्थानं पूरयत-

(कृतवान्, तुभ्यं, एकस्मिन्, विदेशस्य, भारतदेशे, उपयुज्यताम्)

(क) भारतस्य ——– ग्रामे आदित्यः वसति स्म ।

(ख) ——– विकासनं दृष्ट्वा सः आकृष्टः ।

(ग) आदित्यः विदेशस्य वर्णनं ——– ।

(घ) अहं ——– धनं ददामि ।

(ङ) मनसा ——– रुचिं प्राप्तवान् ।

(च) तत् धनम् अस्माकं देशाय ——– ।

३. संस्कृतेन वाक्यानि रचयत -

(क) ग्रामे (ख) पठति

(ग) कर्तुम् (घ) शनैः शनैः

(ङ) आवश्यकम् (च) अहम्

४. स्तम्भमेलनं कुरुत -

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| ग्रामे | ददामि |
| पुस्तकानि | चिन्तया |
| अहम् | भारतम् |
| अलम् | वसति |
| मातृभूमिः | पठति |

DRAFT

५. मातृभाषया अनुवादं कुरुत-

(क) आदित्य: साधुना सह अमिलत् ।

(ख) स: अनेकानि पुस्तकानि पठति स्म ।

(ग) देशस्य एकैकं कोणं गतवान् ।

(घ) अहं कश्चन कूपमण्डूक: आसम् ।

(ङ) साधु: हसित्वा अवदत् ।

(च) सदा स्वमातृभूमिविषये अभिमान: भवतु ।

६. पूर्णवाक्येन उत्तरं लिखत -

(क) किं दृष्ट्वा आदित्य: आकृष्ट: ?

(ख) साधु: आदित्यं किम् उक्तवान् ?

(ग) आदित्य: भारतयात्रायां कुत्र कुत्र गतवान् ?

(घ) 'भ'- षट्कं किम् ?

(ङ) स्वजागरणस्य आरम्भ: कस्मात् भवेत् ?

(च) कुत्र स्वजागरणं करणीयम् ?

७. शुद्धम् उत्तरं चिनुत -

१. भाषा, भूषा, भजनं, भोजनं, भवनं, भ्रमणं चेति किं करयते ?

(क) ष-षट्कम् (ख) भ-षट्कम्

(ग) म-षट्कम् (घ) न-षट्कम्

२. विदेशस्य विकासनं प्रकृतिरमणीयतां च दृष्ट्वा क: आकृष्ट: ?

(क) साधु: (ख) माधव:

(ग) आदित्य: (घ) गोविन्द:

३. आदित्य: अग्रिमदिने केन सह अमिलत् ?

(क) साधुना (ख) ऋषिणा

(ग) मुनिना (घ) गुरुणा

४. साधु: कस्य वर्णनं कर्तुम् आरब्धवान् ?

(क) विदेशस्य (ख) भारतस्य

(ग) उत्कलस्य (घ) स्वस्य

DRAFT

५. साधु: हसित्वा किम् अवदत् ?

(क) वस्त्रं न आवश्यकम् (ख) गृहं न आवश्यकम्

(ग) धनं न आवश्यकम् (घ) ज्ञानं न आवश्यकम्

६. ''एकवारं सम्पूर्णभारतपर्यटनं कृत्वा आगच्छ'' इति क: उक्तवान् ?

(क) साधु: (ख) गुरु:

(ग) मन्त्री (घ) पिता

७. सन्धिविच्छेदं कुरुत -

(क) एकैकम् -

(ख) इत्यादीन् -

(ग) वाग्वाद: -

(घ) तत्रापि -

(ङ) प्रत्यागत: -

(च) सम्भाषणावसरे -

८. प्रायेण पञ्चाशता (५०) पदै: मातृभाषया उत्तरं लिखत -

केन प्रकारेण आदित्यस्य मोहभङ्ग: अभवत् ?



## वयं जानीम:

- **भारतस्य पवित्रा: नद्य: -**

गङ्गा, यमुना, सिन्धु:, सरस्वती, गण्डकी, ब्रह्मपुत्र:,

नर्मदा, गोदावरी, कृष्णा, कावेरी, महानदी, सरयू...

- **भारतस्य पवित्राणि नगराणि -**

अयोध्या, मथुरा, माया (हरिद्वार), काशी, काञ्ची,

DRAFT

अवन्तिका (उज्जैनी), पुरी (जगन्नाथपुरी), प्रयागः, द्वारका,

पाटलीपुत्रम्, विजयनगरम्, इन्द्रप्रस्थः, अमृतसरः

- **भारतस्य चत्वारि धामानि -**

१. पूर्वभागे - पुरीधाम

२. पश्चिमभागे - द्वारिकाधाम

३. उत्तरभागे - बद्रिनाथधाम

४. दक्षिणभागे - रामेश्वरधाम

- **देवभूमौ चत्वारि धामानि-**

१. यमुनोत्री २. गङ्गोत्री ३. केदारनाथः ४. बद्रिनाथः

- पञ्च सरोवराः-

१. मानससरोवरः

२. नारायणसरोवरः

३. बिन्दुसरोवरः

४. पम्पासरोवरः

५. पुष्करसरोवरः

- द्वादशज्योतिर्लिङ्गानि

१. सोमनाथः

२. मल्लिकार्जुनः

३. महाकालेश्वरः

DRAFT

४. ओंकारेश्वरः

५. केदारनाथः

६. भीमशङ्करः

७. विश्वनाथः

८. त्र्यम्बकेश्वरः

९. वैद्यनाथः

१०. नागेश्वरः

११. रामेश्वरः

१२. घुश्मेश्वरः

DRAFT

## अतिरिक्तपठनम्

### पञ्च आह्वानानि

१. 'स्व'जागरणम् - स्वतन्त्रतायाः अनन्तरं भारतं स्वतन्त्रं जातं वा इति प्रश्नः उदेति । 'स्व' इत्यत्र किं किम् अन्तर्भवति ? स्वावलम्बनम्, स्वशिक्षा, स्वभाषा, स्वभूषा, स्वकलाः, स्वदेशभावना, स्वशास्त्राणाम् अध्ययनम् अध्यापनं, भारतीय-आहारः, चादीनि अन्तर्भवन्ति ।

२. समरसता - समाजे नानाविधाः जनाः सन्ति । विविधतायाम् एकता भारतस्य वैशिष्ट्यम् । वयं सर्वे अमृतस्य पुत्राः । सर्वेऽपि भेदभावनाः दूरीकृत्य वयं भारतीयाः इतिभावस्य जागरणं करणीयम् । तदर्थं कानिचन कार्याणि करणीयानि यथा- सर्वेषां मूल्यानां सम्माननम्, अपेक्षितवसतिषु सकुटुम्बं गमनम्, सकारात्मकविचाराणां प्रसारः च ।

३. पर्यावरणसंरक्षणम् - अस्माकं भारतीयसंस्कृतौ वृक्षाणां पूजनपरम्परा अस्ति । जले वरुणदेवः, सूर्यस्य उपासना, तुलसीपूजनम्, गोमयेन लेपनस्य, यज्ञशालायाँ घृताहुतिः, नदीनां मातृरूपेण पूजनं च इत्यादयः विश्वासाः भवन्ति । सम्प्रति पर्यावरणं दूषितं जायमानम् अस्ति । अतः पर्यावरणस्य संरक्षणाय अस्माभिः करणीयानि यथा- गृहे जलस्य संरक्षणम्, बहिः मलनिक्षेपणं न कुर्मः, दीप-व्यजनादीनाम् उपयोगे जागरूकता, प्लाष्टिकवस्तुत्यागः, यानानाम् अल्पव्यवहारः च ।

४. कुटुम्बप्रबोधनम् - 'वसुधैव कुटुम्बकम्' इति अस्माकं धारणा । भारतीयसंस्कृतौ कुटुम्बस्य स्थानं महत्त्वपूर्णम् अस्ति । समाजसंरचनायाः लघुतमं घटकम् अस्ति कुटुम्बम् । बालानां संस्कारः कुटुम्बतः भवति । अतः कुटुम्ब-व्यवस्थां दृढां कर्त्तुम् अस्माकं दायित्वानि यथा- सामूहिकं भोजनम्, अनौपचारिकतया सर्वे मिलित्वा चर्च्चा-पूजा-भजनादिकं सामूहिकम्, अतिथिसत्कारः, उत्सवानाम् आचरणम्, दूरवाण्याः अल्पः उपयोगः च ।

५. नागरिककर्त्तव्यानि - नागरिकाः उत्तमाः भवन्ति चेत् देशः अपि उत्तमः भवति । अतः उत्तमनागरिकरूपेण अस्माकं कर्त्तव्यानि निश्चयेन पालनीयानि । यथा- निर्वाचने मतदानम्, आयकरदानम्, मार्गनियमानां पालनम्, शिरस्त्रं धृत्वा यानचालनम्, अवकरपेटिकायाः सदुपयोगः, स्थाने स्थाने लिखितनियमानां पालनम्, संविधानस्य, राष्ट्रध्वजस्य राष्ट्रगीतस्य च सम्माननम्, अहिंसापालनम्, वृद्धानाम् असमर्थानां च साहाय्यम्, महिलानां सम्माननं चादीनि ।

## द्वादशः पाठः

# नववर्षं शुभमस्तु



(मेषसंक्रान्तिदिने शुभदा स्वगृहसज्जीकरणे रता । भित्तिफलके चित्राणि, गृहद्वारे पूर्णकलसः, चूतपत्राणां 'विभिन्नकुमुमानां न माला, प्रवेशद्वारे कदलीवृक्षः, सर्वत्र सुमनोहरः परिवेशः दृश्यते । अस्मिन्नवसरे आकाङ्क्षा आगत्य एतत्सर्वं दृष्ट्वा विस्मिता तां वदति ।

शुभदे ! अद्य अवकाशदिवसः मनोरञ्जनार्थं प्रदत्तः । एतत् सर्वं किम् ? भवत्याः गृहे उत्सवः इव अनुभूयते ?)

(आकाङ्क्षे ! सत्यमेव । अद्य उत्सवस्य अवसरः । उत्सवस्य अवसरः । उत्सवदिनम् नववर्षस्य आरम्भः । एतदर्थम् उत्सवः पालितः भवति किं तव गृहे एषः पालितः न भवति ?)

DRAFT



**आकाङ्क्षा-** नहि ! अस्माकं तु जनवरीमासस्य प्रथमदिवसे नववर्षपालनम् भवति । ईदृशं नववर्षपालनं कथं करोषि ? किं तव मतिभ्रमः जातः ?

**शुभदा -** जनवरीमासस्य प्रथमदिवसे वैदेशिकानां पक्षतः नववर्षपालनं विधीयते । अस्माकं राष्ट्रियस्तरे चैत्रशुक्लप्रतिपत् नववर्षरूपेण स्वीकृता अस्ति । उत्कलराज्ये प्राचीनकालात् विषुवसंक्रान्तौ एव नववर्षस्य प्रारम्भः भवति । तव कृते नववर्षशुभेच्छां ज्ञापयामि ।

आकाङ्क्षा - तर्हि नववर्षविषये मम ज्ञानार्थं किमपि कथय ।

शुभदा - आम् शृणु ।



भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायाम् उक्तवान् - 'कालः कलयतामहम्'' । कालः एव जगतः कलनाकारी । कालः कदापि कलनीयः न भवेत् । समयः एव कालस्य नामान्तरम् । समयस्य विभिन्नरूपेण विभाजनं भवति । सूर्योदयं सूर्यास्तञ्च अवलम्ब्य दिनं कल्पितं भवति । तथैव मासः ऋतुः - वर्षञ्च परिकल्पितानि । प्रतिवर्षं चक्राकारेण प्राकृतिकपरिवर्तनानि अनुभूयन्ते ।

विविधसभ्यतासु कालकलनार्थं भिन्नं भिन्नम् एककं स्वीकृतमस्ति । तदर्थं विभिन्नेषु स्थानेषु वर्षारम्भसूचनार्थम् अब्दप्रचलनं भवति । उत्कलीयपञ्जिकासु केषाञ्चिद् अब्दानां धारणा प्रदत्तास्ति । यथैव- विक्रमाब्दः, शकाब्दः, ख्रीष्टाब्दः, युगाब्दः, हिजिराब्दः दिल्लीश्वराब्दः, शालिवाहनाब्दः इति बहवः अब्दाः। सम्प्रति ख्रीष्टाब्दस्य बहुलं प्रचलनं भवति । परन्तु प्राचीनकालात् भारतवर्षे नववर्षपालनस्य पृथक्परम्परा प्रचलिता अस्ति । ब्रह्मपुराणे लिखितमस्ति -

''चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रे तु तदा सूर्योदये सति ।।''

अस्मिन् दिवसे प्रथमः सूर्योदयः अभवत् । चैत्रमासस्य शुक्लप्रतिपत्तिथेः वैशिष्ट्यं भवति यत् अस्मात् दिनादारभ्य कल्पाब्दः, सृष्टिसंवत्, वामनसंवत्, श्रीरामसंवत्, श्रीकृष्णसंवत्, कलियुगाब्दः, बौद्धसंवत्, महावीरसंवत्, विक्रमसंवत्, शालिवाहनसंवत्, शकाब्दः शङ्कराचार्यसंवत् प्रभृतीनां वर्षाणां गणना भवति । भारतीयपञ्जिकासु सौरमान-चान्द्रमान-नाक्षत्रिकमान प्रभृतीनाम् अनुसारेण कालगणना भवति ।

ओडिशाराज्ये मेषसंक्रान्तौ विषुवसंक्रान्तौ वा सौरमानवर्षस्य आरम्भः भवति । ग्रीष्मस्य तापः क्रमशः प्रखरः भवति । तापप्रशमनाय प्रकृतेः च शीतलीकरणाय उपायः अनुसृतः भवति । वृक्षराजीनां संरक्षणं

DRAFT

भवति। विशेषत: तुलसीवृक्षाय छायादानार्थम् व्यवस्था भवति । मानवानां देहेषु जलसंरक्षणार्थम् उपायस्य अवलम्बनं भवति । सक्तुदानेन, प्रपानकवितरणेन, व्यजन-छत्रिकाप्रदानेन मानवा: आश्वस्ता: भवन्ति । प्राणिजगत: वनस्पतिजगत: च सुरक्षया प्रकृते: सन्तुलनं भवति । उत्सवपालनार्थं राज्ये विभिन्नेषु स्थानेषु सांस्कृतिक: कार्यक्रम: अनुष्ठित: भवति ओडिशाराज्ये पञ्जिका विषुवसंक्रान्तौ एव प्रचलति ।

भारतवर्षे चैत्रशुक्लप्रतिपत् तिथौ नववर्षपालनं भवति । अस्मिन् समये प्रकृति: नूतनपुष्पै: सज्जिता पक्षिणां काकलिभि: मुखरिता भवति सान्तालसम्प्रदाया: मकरसंक्रमणावसरे 'साकारात्' इति नाम्ना नववर्षं पालयन्ति ।

नववर्षपालनं संस्कृते: परिचयं ददाति । अयमपि शुभावसर:, सर्वेषां मङ्गलकारक: च । अत: अस्मिन् अवसरे सम्पूर्णवर्षे सौभाग्यप्राप्तिनिमित्तं विविधानि कर्माणि अनुष्ठितानि भवन्ति । तीर्थस्नानं, देवार्चनं, प्रार्थिभ्य: दानं, यज्ञ:, स्वाध्याय: गुरुजनपूजनं, गृहाङ्गणसज्जीकरणं, सात्त्विकभोजनं, प्रपाणकपानं, गोसेवा, वृक्षरोपणं, देवतरूणां पूजनं, नूतन-कूप-प्रासाद देवगृहप्रभृतीनां प्रतिष्ठा च क्रियते । अधुनापि तदर्थं शुभाशंसाप्रेरणं सांस्कृतिकमनोरञ्जनकार्यक्रम:, पूर्वजानां स्मृतिचारणप्रभृतीनि माङ्गलिककर्माणि अनुष्ठीयन्ते । अत: गायाम:-

''नवीनवर्षं वितनोतु हर्षं
भवन्तु सर्वे सुखिन: सुभद्रा: ।
जगत्प्रशान्तिं परिचिन्तयन्त:
चरन्तु लोका भुवि मङ्गलञ्च ।।''

# अवधेयम्

## शब्दार्था :-

| शब्द | अर्थ | हिन्दी | English | ओड़िआ |
|---|---|---|---|---|
| स्वगृहसज्जीकरणे | स्वस्य गृहस्य मंडने | अपना घर सजाने के लिए | for decorating own house | ନିଜ ଘର ସଜାଉଥିବାରେ |
| भित्तिफलके | भित्तिफलके | भित्तिफलक में | on the wall/ board | କାନ୍ଥରେ |
| चूतपत्राणाम् | आम्रपत्राणाम् | आम्रपत्रोंका | of the leaves of the mango | ଆମ୍ବପତ୍ର ଗୁଡ଼ିକର |
| दृश्यते | विलोक्यते | दर्शन किया जाता है | behold | ଦେଖାଯାଏ |
| आगत्य | अगमनं कृत्वा | आकर | by coming | ଆସି |
| दृष्ट्वा | दर्शनं कृत्वा | देखकर | be seeing | ଦେଖି |
| अवकाशदिवस: | अवकाश दिनम् | छुट्टि का दिन | observed | ଛୁଟିଦିନ |
| अनुष्ठीयते | पाल्यते | माना जाता है | your | ଅନୁଷ୍ଠିତ ହେଉଛି / କରାଯାଏ । |
| भवत्या: | भवत्या:(स्त्री) | आपका | delusion/ false knowledge | ତୁମର |
| मतिभ्रम: | भ्रमन्ति | दोष | | ବୁଦ୍ଧିଭ୍ରମ |
| विधीयते | क्रियते | किया जाता है | prepared / done | ପାଳନ କରାଯାଏ |
| समीचीनम् | तर्कसंगतम् | तर्क सम्मत | appropriate | ଉଚିତ |
| तवकृते | तव/भवत: निमित्म् | आपके लिये | for you | ତୁମ ପାଇଁ / ଆପଣଙ୍କ |
| तर्हि | तदर्थम् | उसके लिये | for that | ତେବେ |
| ज्ञानार्थम् | ज्ञाननिमित्तम् | जानने के लिए | for knowing | ଜାଣିବାପାଇଁ |
| उक्तवान् | कथितवान् | बोला | expressed | କହିଥିଲେ |
| कलयताम् | परिकल्प्यताम् | परिकल्पना करने वालों का | among the all calculating | କଳନା କରୁଥିବା ବ୍ୟକ୍ତିମାନଙ୍କର |
| नामान्तरम् | अन्यत् नाम | दूसरा पर्याय | another name | ଅନ୍ୟ ନାମ |
| विभाजनम् | विभाग: | विभाजन | division | ବିଭାଜନ |
| अवलम्ब्य | अवलम्वनं कृत्वा | आश्रय करके | by adopting | ଆଧାର / ଆଶ୍ରୟ କରି |
| कल्पितम् | सृष्टम् | किया गया | created/ | ସ୍ଥିର କରାଯାଇଛି |
| एककम् | एककम् | यूनिट् | planned unit | ମାପଦଣ୍ଡ |
| अब्दप्रचलनम् | अब्दप्रचलनम् | अब्दचालू होना | use of era | ବର୍ଷର ଆରମ୍ଭ |
| पञ्जिकासु | पञ्चाङ्गेंषु | पञ्चाङ्ग में | in the calendar | ପାଞ୍ଜିଗୁଡ଼ିକରେ |
| ससर्ज | सृष्टं कृतवान् | सृष्टि कि | created | ସୃଷ୍ଟି କରିଥିଲେ |

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| अहनि | दिनानि | दिन | days | ଦିନରେ |
| आरभ्य | आरम्भं कृत्वा | आरम्भ करके | by beginning | ଆରମ୍ଭ କରି |
| पाल्यते | पालितो भवति | पालन किया गया | observed | ପାଳନ କରାଯାଏ |
| नाम्ना | नामत: | नामये | by name | ନାମରେ |
| प्रार्थिभ्य: | याचकेभ्य: | मांगने वालों को | to the beggars | ଆଶାୟୀମାନଙ୍କୁ |
| स्वाध्याय: | स्वशास्त्राध्ययनम् | अपना विषय पढ़ना | learning of own branch | ନିର୍ଦ୍ଦିଷ୍ଟ ସୂକ୍ତ / ମନ୍ତ୍ରପାଠ |
| सक्तु | सक्तु | सत्तु | sattu | ଛତୁଆ |
| प्रपानक | प्रपानकम् | रस प्रपानक् | mixed juice | ପଣା |
| क्रियन्ते | सम्पाद्यन्ते | किया जाते हैं | made | କରାଯାଏ |
| गायाम: | गानं कुर्म: | गाते हैं | sing | ଗାଇବା |
| वितनोतु | विस्तारं कुर्वन्तु | विस्तारं करते हैं | spread | ବିସ୍ତାର କରୁ |
| सुभद्रा: | मङ्गलयुक्ता: | कल्याणमय | bestowed with benevolence | ସଦାଚାର ବିଶିଷ୍ଟ |
| परिचिन्तयन्त: | चिन्तां कुर्वन्त: | चिन्ता करके | may think | ବିଚାର କରି |
| चरन्तु | कुर्वन्तु | करें | may do | ଆଚରଣ କରନ୍ତୁ |
| भुवि | भुवने | भुवन में | in the world | ପୃଥିବୀରେ |

## सन्धिविच्छेद :

शुभमस्तु = शुभम् + अस्तु

अस्मिन्नवसरे = अस्मिन् + अवसरे

सत्यमेव = सत्यम् + एव

एतदर्थम् = एतत् + अर्थम्

श्रीमद्भगवद्गीता = श्रीमत् + भगवत् + गीता

कलयतामहम् = कलयताम् + अहम्

नामान्तरम् = नाम + अन्तरम्

सूर्योदयम् = सूर्य + उदयम्

सूर्यास्तम् = सूर्य + अस्तम्

DRAFT

| | | |
|---|---|---|
| तथैव | = | तथा + एव |
| चक्राकारेण | = | चक्र + आकारेण |
| स्वीकृतमस्ति | = | स्वीकृतम् + अस्ति |
| प्रदत्तास्ति | = | प्रदत्ता + अस्ति |
| यथैव | = | यथा + एव |
| शकाब्द: | = | शक + अब्द: |
| प्रथमेऽहनि | = | प्रथमे + अहनि |
| दिनादारभ्य | = | दिनात् + आरभ्य |
| तदनुसारम् | = | तत् + अनुसारम् |
| इत्यत: | = | इति + अत: |
| अयमपि | = | अयम् + अपि |
| मङ्गलकारकश्च | = | मङ्गलकारक: + च |
| शुभाशंसा | = | शुभ + आशंसा |



## प्रश्नावली

१. एकपदेन उत्तरं लिखत: -

(क) सर्वत्र कीदृश: परिवेश: दृश्यते ? ......................................

(ख) प्रवेशद्वारे के वृक्षा: शोभन्ते ? ......................................

(ग) सम्प्रति कस्य अब्दस्य बहुलप्रचलनं भवति ? ......................................

(घ) ब्रह्मा किं ससर्ज । ......................................

(ङ) कस्मैवृक्षाय छाया प्रदानार्थं व्यवस्था भवति ? ......................................

(च) नवीनवर्षं किं वितनोतु ? ......................................

DRAFT

## २. शून्यस्थानानि पूरयत-

(क) भित्तिफलके ________ ।

(ख) अद्य ________ आरम्भः ।

(ग) एवदर्थं ________ अनुष्ठीयते ।

(घ) तव ________ जातः ।

(ङ) ________ कलयतामहम् ।

(च) ________ वितनोतु हर्षम् ।

(चित्राणि, मतिभ्रमः, कालः नवीवनवर्षं, उत्सवः, नववर्षस्य)

## ३. मातृभाषया अनुवादं कुरुत -

(क) किं तव गृहे एषः न भवति ?

(ख) तव कृते नववर्षशुभेच्छां ज्ञापयामि ।

(ग) कालः कदापि कलनीयः न भवेत् ।

(घ) भारतवर्षे चैत्रशुक्लप्रतिपत्तिथौ नववर्षपालनं भवति ।

(ङ) नववर्षपालनं स्वसंस्कृतेः परिचयं ददाति ।

(च) सान्तालसम्प्रदायस्य मकरसंक्रान्त्यवसरे ''साकारात्'' इति नाम्ना नववर्षपालनं भवति ।

## ४. स्तम्भमेलनं कुरुत-

| 'क' स्तम्भ | 'ख' स्तम्भः |
|---|---|
| नव वर्षम् | चान्द्रमान |
| ग्रीष्मस्य | सूर्यास्तम् |
| सूर्योदयम् | तापम् |
| सौरमान | सन्तुलनम् |
| देवतरूणाम् | शुभमस्तु |

DRAFT

५. संस्कृतेन वाक्यानि रचयत-

(क) आगत्य (ख) दृष्ट्वा (ग) शृणु (घ) एव (ङ) तदा (च) गणना

६. सन्धिविच्छेदं कुरुत -

(क) सत्यमेव

(ख) चक्राकारेण

(ग) प्रथमेऽहनि

(ङ) शुभाशंसा

(च) इत्यत:

७. शुद्धमुत्तरं चिनुत -

(क) कुत्र कदलीवृक्षा: शोभन्ते ?

१. उपवने, २. प्रवेशद्वारे ३. गृहमध्ये ४. मार्गे

(ख) चित्राणि कुत्र सन्ति ?

१. गृहद्वारे, २. पुस्तके ३. उत्पीठिकायाम् ४. भित्तिफलके

(ग) भारतवर्षे कदा नववर्षपालनं भवति ?

१. जनवरीमासप्रथमदिवसे २. मकरसंक्रमणे

३. चैत्रशुक्लप्रतिपत्तिथौ ४. दीपावलीदिवसे

(घ) सूर्योदयं सूर्यास्तं च अवलम्ब किं कल्पितं भवति ?

१. मास:, २. वर्षम्, ३. संवत्सर: ४. दिनम्

(ङ) तापप्रशमनाय क: अनुसृत: भवति ?

१. उपाय:, २. विषय:, ३. प्रचार:, ४. विचार:

(च) विषुवसंक्रान्तौ क: पालित भवति ?

१. समारोह:, २. उत्सव:, ३. समागम:, ४. समावेश:

(छ) प्रपाणकपानं कदा भवति ?

१. शीतकाले, २. नववर्षपालनावसरे, ३. रात्रौ, ४. प्रातः

## ८. पूर्णवाक्येन उत्तरं लिखत -

(क) भगवान् श्रीकृष्णः कुत्र कालः कलयितामहम् इति उक्तवान् ?

(ख) किं किम् अवलम्ब्य दिनं कल्पितं भवति ?

(ग) किमर्थं भिन्नं भिन्नम् एककं स्वीकृतम् ?

(घ) अब्दानां धारणा कुत्र प्रदत्ता अस्ति ?

(च) सान्तालसम्प्रदायाः कदा नववर्षपालनं कुर्वन्ति ?

## ९. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत-

नववर्षपालविषये वर्णनं कुरुत ।



## वयं जानीमः

१. यूरोपीयदेशेषु प्राक् कालगणनार्थं ''रोमाने क्यालेण्डर'' व्यवह्रियते स्म । रोमदेशस्य सम्राट् जुलियस् सीजर अस्य परिवर्तनं कृतवान् । अनन्तरं १५८२ ख्रीष्टाब्दे पोप् त्रयोदशः ग्रेगोरी परिवर्त्तनं कृत्वा वर्षस्य मानं ३६५.२४२५ दिनानि अकरोत् । २२२ ख्रीष्टपूर्वाब्दात् प्राक् मइमासस्य प्रथमदिवसः नववर्षरूपेण पालितः अभवत् । तस्मिन् वर्षे मार्च्चमासस्य १५ तारिकायां नववर्षपालनम् अभवत् । १५३ ख्रीष्टपूर्वाब्दात् एव जनवरी मासस्य प्रथमदिवसः नववर्षरूपेण पालयते ।

२. बिन्ध्यपर्वतकावेरीनद्योः मध्यभागस्थितः भूमिभागः 'दक्षिणापथ' नाम्ना प्रख्यातः । कर्णाटकप्रदेशः, तेलेङ्गानाप्रदेशः, आन्ध्रप्रदेशः, तामिलनाडुप्रदेशः च अस्मिन् अन्तर्गताः भवन्ति । एषु स्थानेषु वर्षस्य प्रथमः दिवसः ''युगादि'' इति उच्चयते ।

३. स्वाधीनताप्राप्तेः परं प्रख्यात वैज्ञानिक मेघनादसाहामहाशयानां प्रामुख्येन एका समितिः राष्ट्रियपञ्चाङ्गस्य रचनाम् अकरोत तदर्थं चैत्रमासस्य प्रतिपत्तिथौ नववर्षप्रारम्भः भवति । राष्ट्रियपञ्चाङ्गं समग्रदेशे प्रचलति ।

DRAFT




आपृच्छस्व पुराणम् आमन्त्रयस्व
च नवम् आशा - सुस्वप्न-जिगीषाभि: ।
ପୁରୁଣାକୁ ବିଦାୟ ଜଣାଇ ଓ ନବବର୍ଷକୁ ଆଶା, ସୁସ୍ୱପ୍ନ ତଥା ବିଜିଗୀଷାର ସହିତ ଆମନ୍ତ୍ରଣ କର ।

२. नववर्षं नवचैतन्यं ददातु
सर्व: तरतु दुर्गाणि
सर्वो भद्राणि पश्यतु
सर्व: कामान् अवाप्नोतु
सर्व: सर्वत्र नन्दतु ।

ସମସ୍ତେ ଦୁର୍ଗମ ପଥ ଅତିକ୍ରମ କରନ୍ତୁ । ସମସ୍ତେ କଲ୍ୟାଣ ପ୍ରାପ୍ତ କରନ୍ତୁ । ସମସ୍ତଙ୍କ ମନସ୍କାମନା ପରିପୂର୍ଣ୍ଣ ହେଉ । ସମସ୍ତେ ସକଳ ପରିସ୍ଥିତିରେ ଆନନ୍ଦ ଲାଭ କରନ୍ତୁ ।

३. वर्षं नवीनं यशसे तवास्तु

४. वर्षं नवं मङ्गलम् आतनोतु ।

५. नववर्षं नवे हर्षे भवतु भवतां प्रियम् ।

६. नूतनं वर्षं वितनोतु हर्षम् ।

DRAFT

७. शुभं भवतु नववर्षम् ।

८. नवीनवर्षस्य समागमोऽयम्
तनोतु ते मंगलमप्रमेयम्
समस्तकार्येषु सनातनी या
दृष्टिः सुराणां सफलीकरोतु ।।

९. हृदयमन्दिरे प्रेमज्योति-र्विराजताम्
मनोऽरविन्दं विन्दतु विमलं सुन्दरताम्
सुचिन्तनं चिरन्तनं हरतु विषाद-विमर्षम् ।।
शुभं भवतु नववर्षम् ।।

DRAFT

# त्रयोदशः पाठः
# पितामहस्य पत्रम्

(पौत्री नगरे छात्रावासे उषित्वा पाठं पठति । पौत्र्याः पत्रस्य प्रत्युत्तररूपेण पितामहः पत्रं प्रेषयति ।)



॥ वन्दे मातरम् ॥

स्नेहिते सुजाते,

मम स्नेहाशीर्वादं स्वीकुरु । श्रीजगन्नाथस्य कृपया अत्र सर्वं कुशलम् अस्ति । त्वम् अपि तत्र कुशलिनी स्याः इति आशा ।

तव पत्रं पठित्वा अहम् अतीव आनन्दितः । तव विद्यालये भाषणप्रतियोगिता भविष्यति इति आनन्दस्य विषयः । तत्र त्वं 'स्वतन्त्रतावीरः जयी राजगुरुः' इति विषये भाषणं करिष्यसि इति ज्ञात्वा गौरवान्वितः अस्मि ।

अहम् अस्मिन् पत्रे जयिराजगुरोः विषये किञ्चित् लिखामि । त्वं सम्यक् सर्वं पठ, स्मर च । निश्चयेन प्रतियोगितायां सफला भविष्यसि ।

DRAFT

## जयी राजगुरुः



भारतवर्षम् अस्माकं देशः । एषः देशः अस्माकं मातृभूमिः । वयं सर्वे अस्य दायादाः । अस्माभिः एषा मातृरूपेण पूज्यते । वैदेशिकाः बहुवारम् अस्याः उपरि आक्रमणं कृतवन्तः । आङ्ग्लजनाः वाणिज्यं कर्त्तुम् अत्र आगतवन्तः । क्रमशः अत्र स्थित्वा अस्मान् शासितवन्तः । तेषां शासनेन भारतीयाः अकथनीयं दुःखं प्राप्तवन्तः । भारतं तेषां शासनात् मोचयितुं बहवः नेतारः अग्रे आगताः । ते अस्मभ्यम् उद्बोधनं दत्तवन्तः ।

तदानीं खोर्धाराज्यस्य राजा आसीत् ठक्कुरराज: मुकुन्ददेव: । तस्य मन्त्री आसीत् जयी राजगुरु: । स: राजपरिवारस्य पारम्परिक: गुरु: । अङ्ग्लशासनस्य विरोधने १८१७ तमे वर्षे महान् प्रजासंग्राम: अभवत् । तस्य संग्रामस्य मुख्यभूमिकां नीतवान् जयी राजगुरु: । तस्य भाषणं शाणितम् अस्त्रम् इव आसीत् । तस्य आह्वानेन पाइकजाति: मिलिता । सर्वे मिलित्वा आङ्ग्लशासकानां प्रतिरोधं कृतवन्त: ।

वणिज: आङ्ग्लजना: अतीव चतुरा: । ते गुप्तपथेन निशार्धे दुर्गं प्रविष्टा: । कौशलेन राजगुरुं निगृहीतवन्त: । तत: बहुदूरं बालेश्वरं तं नीतवन्त । तत: मेदिनीपुरस्य बाघतोटा इति स्थाने तस्य विचार: अभवत् । एकस्य वटवृक्षस्य शाखाभ्यां तस्य बन्धनं कृतवन्त: । स: जीवनं त्यक्तवान्, किन्तु आङ्ग्लशासकानां वश्यतां न स्वीकृतवान् । तस्य मरणात्परं बहव: राजगुरुसदृशा: स्वाधीनतासैनिका: उत्पन्ना: । किन्तु राजगुरो: देशप्रेम इतिहासे स्वर्णाक्षरै: लिपिबद्धम् अभवत् । तस्य त्यागबलेन उत्कलजननी धन्या अभवत् । वयम् अपि तस्य मार्गम् अनुसृत्य देशस्य रक्षां करिष्याम: । अत: उद्घोषयाम:-

मातृभूमि: भारतम् । मम शिक्षा देशरक्षा । मम दीक्षा मातु: रक्षा ।

एतत् पत्रं प्राप्य मम कृते पुन: पत्रं लिख । भगवती भुवनेश्वरी त्वां सर्वदा रक्षतु । तव मङ्गलं भूयात् इति तव पत्रस्य प्रतीक्षायाम् ।



तव शुभार्थी

पितामह: **दीनबन्धु:**

DRAFT

## अवधेयम्

### शब्दार्था :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| दायादाः | सन्तानाः | उत्तराधिकारी | heir | ସନ୍ତାନ |
| उद्बोधनम् | प्रबोधनम् | उद्बोधन देना | awareness | ବୁଝାଇବା |
| ठक्कुरराजः | ठाकुरराजा इति | ठाकुर राजा | Thakur Raja | ଠାକୁର ରାଜା |
| शाणितम् | तीक्ष्णम् | तीक्ष्ण | double-edged | ଧାରୁଆ |
| अनुसृत्य | अनुसरणं कृत्वा | अनुसरण करके | after following | ପଛେ ପଛେ ଯାଇ |
| निगृहीतवन्तः | वन्दीकृतवन्तः | बन्धन में डाला | captivate | ବାନ୍ଧି ପକାଇଲେ |
| १८१७ तमे | सप्तदशाधिक-अष्टादशशततमे | १८१७ में | in 1817 | ୧୮୧୭ ତମ |
| पितामहः | पितुः पिता | दादा | grandfater | ଜେଜେ ବାପା |
| पौत्री | पुत्रस्य पुत्री | पोती | granddaughter | ନାତୁଣୀ |
| सम्यक् | उत्तम भावेन | ठीकसे | properly | ଭଲ ଭାବରେ |
| प्राप्य | प्राप्तं कृत्वा | लाभ करके | by obtaining | ପାଇ) |
| भूयात् | भवेत् | आशीर्वादमूलक हो | may be | (ଆଶୀର୍ବାଦାର୍ଥକ) ହେଉ |
| प्रतीक्षायाम् | | अपेक्षा में | in waiting | ପ୍ରତୀକ୍ଷାରେ |
| उषित्वा | वासं कृत्वा | वास करके | by dwelling | ବାସ କରି |

### सन्धिविच्छेदः

प्रत्युत्तररूपेण = प्रति + उत्तररूपेण

स्नेहाशीर्वादम् = स्नेह + आशीर्वादम्

अतीव = अति + इव

इतोऽपि = इतः + अपि

किञ्चित् = किम् + चित्

प्राप्तवान् = प्र + आप्तवान्

निशार्धे = निशा + अर्धे

DRAFT

## प्रश्नावली

१. एकपदेन उत्तरं लिखत -

(क) पौत्र्याः नाम किम् ?

(ख) पितामहः पौत्र्याः कृते किं लिखति ?

(ग) के वाणिज्यं कर्त्तुं भारतम् आगतवन्तः

(घ) मुकुन्ददेवः कस्य राज्यस्य राजा आसीत् ?

(ङ) मुकुन्ददेवस्य मन्त्री कः आसीत् ?

(च) राजगुरोः आह्वानेन का मिलिता ?

२. कोष्ठकतः शुद्धं पदं चित्वा शून्यस्थानं पूरयत-

(क) अत्र सर्वं ——- अस्ति ।

(ख) त्वं सम्यक् सर्वं ——-

(ग) तव ——- प्रतीक्षायाम् ।

(घ) तस्य त्यागबलेन ——- धन्या अभवत् ।

(ङ) ——- राजगुरुं निगृहीतवन्तः ।

(च) ——- सर्वे अस्याः दायादाः ।

पठ, पत्रस्य, कुशलम्, उत्कलजननी, वयम्, कौशलेन

३. मातृभाषया अनुवादं कुरुत - (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

(क) भारतवर्षम् अस्माकं देशः ।

(ख) वयं सर्वे अस्याः दायादाः ।

(ग) वणिजः आङ्ग्लजनाः अतीव चतुराः ।

(घ) कौशलेन राजगुरुं निगृहीतवन्तः ।

(ङ) ततः बहुदूरं बालेश्वरं तं नीतवन्तः ।

४. विषयानुसारं स्तम्भमेलनं कुरुत- (ସ୍ତମ୍ଭ ମିଳାଅ)

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| वयं | नेतारः |
| बहवः | चतुराः |
| आङ्ग्लजनाः | सर्वे |
| राजगुरोः | वटवृक्षस्य |
| एकस्य | देशप्रेम |

५. संस्कृतभाषया पूर्णवाक्येन उत्तराणि लिखत-

(क) भारतवर्षं केषां देशः ?

(ख) खोर्द्धाराज्यस्य राजा कः आसीत् ।

(ग) कस्मिन् वर्षे महान् प्रजासंग्रामः अभवत् ।

(घ) सर्वे मिलित्वा केषां प्रतिरोधं कृतवन्तः ?

(ङ) राजगुरुसदृशाः के उत्पन्नाः ?

(च) कस्य देशप्रेम स्वर्णाक्षरैः लिपिबद्धम् ।

६. वाक्यानि रचयत- (ବାକ୍ୟ ରଚନା କର)

अस्माकम्, वयम्, मम, भारतम्, अभवत्, महान्

७. सन्धिविच्छेदं कुरुत - (ସନ୍ଧିବିଚ୍ଛେଦ କର)

मरणात्परम्, स्वर्णाक्षरैः, निशार्धे

८. शुद्धम् उत्तरं चिनुत -

१. सुजाता कुत्र उषित्वा पाठं पठति ?

(क) गृहे (ख) विद्यालये

(ग) छात्रावासे (घ) वने

२. विद्यालये कस्य प्रतियोगिता आसीत् ?

(क) गीतस्य (ख) भाषणस्य

(ग) नृत्यस्य (घ) लेखनस्य

३. **खोर्द्धाराज्यस्य राजा कः आसीत् ?**

(क) मुकुन्ददेवः (ख) भोजदेवः

(ग) कपिलदेवः (घ) गोकुलदेवः

४. **आङ्ग्लशासनविरोधे कदा प्रजासंग्रामः अभवत् ?**

(क) १८१७ वर्षे (ख) १९१७ वर्षे

(ग) १७१७ वर्षे (घ) १९४७ वर्षे

५. **आङ्ग्लजनाः राजगुरुं कुत्र नीतवन्तः ?**

(क) पुरीम् (ख) खोर्द्धाम्

(ग) कटकम् (घ) बालेश्वरम्

६. **जयीराजगुरुः आङ्ग्लशासकानां किं न स्वीकृतवान् ?**

(क) वश्यताम् (ख) धनम्

(ग) पत्रम् (घ) प्रशंसाम्

७. **सन्धिविच्छेदं कुरूत ।**

(क) प्रत्युत्तररूपेण -

(ख) निशार्धे -

(ग) प्राप्तवान् -

(घ) किञ्चित् -

(ङ) इतोऽपि -

(च) अतीव -

८. **प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत -**

जयीराजगुरोः देशभक्तिं वर्णयत ।

DRAFT



## वयं जानीमः

अधुना नानाविधानां यन्त्राणां तन्त्राणां च विकासः दृश्यते । पूर्वं पत्राणां द्वारा सूचनानां भावानां च प्रेषणं भवति स्म । पत्रे अस्माकं संस्कारः परिस्फुटः भवति । आगच्छन्तु पत्रलेखनस्य अवधेयान् विषयान् जानीमः ।

१. पत्रस्य उपरिभागे मङ्गलसूचकं पदं भवति यथा-

- ॥ ॐ ॥, 卐, श्रीः......
- श्रीगणेशाय नमः....
- ॐ सरस्वत्यै नमः...
- हरिः ॐ....
- जय जगन्नाथ...

२. पत्रस्य दक्षिणभागे उपरि प्रेषकस्य स्थानं, तिथिः च भवतः-

- यथा- पुरी
- आषाढ-शुक्ल-द्वितीया
- सोमवासरः

३. यस्य कृते प्रेषयामः तस्य सम्बोधनं कर्तव्यम्

- आत्मीय बन्धो !
- अयि मित्र !
- सम्मान्याः गुरुचरणाः !
- स्नेहमय अनुज !
- स्नेहित भ्रातः !
- आदरणीय गुरो !
- पूज्ये मातः !
- प्रिय सखि !

DRAFT

# केचन उत्कलस्य स्वतन्त्रतासङ्ग्रामिणः

१. वीर सुरेन्द्र साए

२. बाजि राउतः

३. बिर्सा मुण्डा

४. विश्वनाथ दासः

५. बक्सि जगबन्धुः

६. जयी राजगुरुः

७. लक्ष्मण नायकः

८. रमादेवी चौधुरी

९. मालती चौधुरी

१०. अन्नपूर्णा महारणा

११. गोपबन्धु दासः

१२. मधुसूदन दासः

DRAFT

# चतुर्दशः पाठः
# भारतगीतिका

(विद्यालयप्राङ्गणे बान्धवीद्वयं मिथः आलापं करोति)



**भारती -** अयि वन्दिते ! गतदिवसे सभायां गीतं सर्वेषां नो जननी.. इति श्रुतं वा ?

**वन्दिता -** भारती ! आम् । श्रुतम् । तत् अति सरलं देशात्मबोधकच्य इदं कविवर राधानाथ रायः विरचितवान् इति जानामि ।



**भारती -** गीतमिदं कदा किमर्थञ्च लिखितम्, जानासि वा ?

एका सभा कटकनगरस्य इदगाह-प्रान्तरे १९०३ दिसम्वर मासस्य ३०-३१ दिवसद्वये प्रथमम् अनुष्ठिता अभवत् ।

**वन्दिता -** आम् जानामि । स्वतन्त्र-उत्कलप्रदेश प्रतिष्ठायै उत्कल सम्मिलनी इति सभा आहूता । तस्याः प्रारम्भे उद्बोधनार्थं गीतम् इदं रचितम् ।



**भारती -** आम् स्मरामि । मम पितामहः अवदत् यत् तत्र सभायां महाराजः श्रीरामचन्द्रभञ्जदेवः सभापतिः आसीत् । तत्र च कुलवृद्धः मधुसूदन दासः, उत्कलमणिः गोपबन्धुः, व्यासकविः फकीरमोहनः गोपालचन्द्र

DRAFT



प्रहराजः, भक्तकविः मधुसूदनः, महाराजः कृष्णचन्द्र गजपतिः, चन्द्रशेखर वेहेरा, राजेन्द्र नारायण भञ्जदेवः विक्रमदेववर्मा तथा अन्ये च उपस्थिताः आसन् ।

**वन्दिता :-** एतत् गीतं समग्रे भारतवर्षे अपि प्रसिद्धम् । एतदपि अस्माकं स्वाभिमानं गौरवं च प्रख्यापयति ।

सर्वेषां नो जननी भारतधरणी कल्पलतेयम् ।
जननी-वत्सल-तनयगणैस्तत् सम्यक् शर्म विधेयम् । ध्रुवम् ।

**अन्वय् :-** इयं कल्पलता भारतधरणी नः सर्वेषां जननी (अस्ति) । जननीवत्सलतनयगणैस्तम् शर्म सम्यक् विधेयम् ।

**पदच्छेद :-** सर्वेषां नः जननी भारतधरणी कल्पलता इयम् ।

जननीवत्सलतनयगणैस्त तत् सम्यक् शर्म विधेयम् ।

**भावार्थ :-** अस्माकम् इयं भारतमाता कल्पलता इव सर्वविधकामनापूरणकारिणी भवति । वयं सर्वे तस्याः तनयाः जननीवत्सलाः । अतः सर्वदा यथोचितानन्दविधानं कुर्याम ।

**ଓଡ଼ିଆ ଅର୍ଥ :-** କଳ୍ପଲତାସ୍ୱରୂପ ଏହି ଭାରତଧରଣୀ ଆମ ସମସ୍ତଙ୍କର ଜନନୀ ଅଟନ୍ତି । ତେଣୁ, ଜନନୀଙ୍କର ସ୍ନେହଶୀଳ ତନୟଗଣ (ଭାରତମାତାଙ୍କର) ଯଥୋଚିତ ଆନନ୍ଦ-ବିଧାନ କରିବା ଉଚିତ ।

**हिमगिरि सीमन्तित- मस्तकमिदमम्बुधि- परिगतपार्श्वम् ।**
**अस्मज्जन्मदमन्नदमनिशं श्रौतपुरातनमार्षम् । (१)**

**पदच्छेद :-** हिमगिरिसीमन्तितमस्तकम् इदम् अम्बुधिपरिगतपार्श्वम् अस्मद् जन्मदम् अन्नदम् अनिशं श्रौतपुरातनम् आर्षम् ।

**अन्वय :-** इदं हिमगिरिसीमन्तितमस्तकम् अम्बुधिपरिगतपार्श्वम् अस्मज्जन्मदम् अनिशम् अन्नदं श्रौतपुरातनम् आर्षं भवति ।

**भावार्थ : -** हिमालयः अस्य भारतवर्षस्य मस्तकरूपेण शोभते । सागराः अस्य चतुःपार्श्वे परिवेष्टिताः भवन्ति । भारतवर्षम् अस्माकं जन्मभूमिः, या अविरतम् अस्मभ्यम् अन्नं जलञ्च प्रददाति । इयं भूमिः प्राचीनकालात् वैदिकसंस्कृतेः ऋषिपरम्परायाः च स्थली भवति ।

**ଓଡ଼ିଆ ଅର୍ଥ:-** ଭାରତବର୍ଷର ମସ୍ତକ ହିମାଳୟକୁ ସୀମନ୍ତରୂପେ ଧାରଣ କରିଛି । ଏହାର ପାର୍ଶ୍ୱ ସାଗର ପରିବେଷ୍ଟିତ । ଏହା ଆମର ଜନ୍ମଦାତା ଓ ଅବିରତ ଅନ୍ନଦାତା । ଏହା ବେଦପରମ୍ପରା ସହିତ ପୁରାତନ ଋଷି ପରମ୍ପରାରେ ସମୃଦ୍ଧ ।

• **विजनितहर्ष भारतवर्ष विश्वोत्कर्षनिदानम्**
**भारतशर्मणि कृतमस्माभिर्नवमिदमैक्यविधानम् ।१।**

**पदच्छेद:-** विजनितहर्षं भारतवर्षं विश्वोत्कर्षनिदानं भारतशर्मणि कृतम् अस्माभिः नवम् इदम् ऐक्यविधानम्।।

**अन्वय:-** भारतवर्षं विजनितहर्षं विश्वोत्कर्षनिदानं भवति । अस्माभिः भारतशर्मणि इदं नवम् ऐक्यविधानं कृतम् ।

**भावार्थ:-** भारतवर्षं जनानां हृदये हर्षं जनयति, विश्वस्य उत्कर्षस्य श्रेष्ठकारणञ्च भवति । वयं सर्वे भारतवर्षस्य मङ्गलनिमित्तं नवम् ऐक्यविधानं कुर्मः ।

**ଓଡ଼ିଆ ଅର୍ଥ:-** ଏହି ଭାରତବର୍ଷ ଆନନ୍ଦ ସୃଷ୍ଟି କରିଛି । ଏହା ବିଶ୍ୱର ଉତ୍କର୍ଷର ଶ୍ରେଷ୍ଠକାରଣ । ଏହି ଭାରତବର୍ଷର ମଙ୍ଗଳପାଇଁ ଆମ୍ଭେମାନେ ଏହି ନୂତନ ଏକତା ବିଧାନ କରିଛୁ ।

**भारतपङ्कजदलमिदमुत्कलमण्ड़लमिति विदितं यत्**
**तस्य कृते वयमत्र समेता विहितात्रोत्कलसंसत् ।३।**

**पदच्छेद:-** भारतपङ्कजदलम् इदम् उत्कलमण्ड़लम् इति विदितं यत् तस्य कृते वयम् अत्र समेताः विहिता अत्र उत्कलसंसत् ।

**अन्वय:-** इदं यत् उत्कलमण्ड़लं (तत्) भारतपङ्कजदलम् इति विदितम् । तस्य कृते वयम् अत्र समेताः । (अस्माभिः) अत्र उत्कलसंसद् विहिता ।

**भावार्थ:-** भारतवर्षं विकसितकमलमिव विराजते । तस्य एकं दलमिव उत्कलराज्यं शोभते । उत्कलस्य निमित्तं वयमत्र समवेताः भवामः । अत्रापि उत्कलसम्मिलनी अनुष्ठिता भवति ।

**ଓଡ଼ିଆ ଅର୍ଥ:-** ପ୍ରସ୍ଫୁଟିତ ପଦ୍ମ ପରି ଆମର ଏ ଭାରତଭୂମି ଶୋଭାପାଉଛି । ଆମର ଉତ୍କଳଭୂମି ସେହି ପଦ୍ମର ଗୋଟିଏ ପାଖୁଡ଼ା ପରି ଅଟେ । ତାହାପାଇଁ ଆମେ ଏଠାରେ ସମବେତ ହୋଇଛୁ । ଏଠାରେ ଉତ୍କଳସମ୍ମିଳନୀ ଅନୁଷ୍ଠିତ ହେଉଛି ।

**भारतमेका गतिरस्माकं नापरास्ति भुवि नाम**
**सर्वादौ परिषत्कर्मणि तत् भारतमेव नमामः ।**

**पदच्छेदः-** भारतम् एका गतिः अस्माकं न अपरा अस्ति भुवि नाम सर्वादौ परिषत्कर्मणि तत् भारतम् एव नमामः ।

**अन्वयः-** भारतम् अस्माकम् एका गतिः । भुवि अपरा नाम न अस्ति । परिषत्कर्मणि सर्वादौ तत् भारतम् एव नमामः ।

**भावार्थः-** भारतम् अस्माकम् एका एव गतिः । पृथिव्याम् अपरा आश्रयस्थली नास्ति । उत्कलसम्मिलन्याः कर्मणि प्रथमतः तत् भारतवर्षम् एव वयं नमामः ।

**ଓଡ଼ିଆ ଅର୍ଥ:-** ଭାରତ ଆମର ଏକମାତ୍ର ଗତି ବା ଆଶ୍ରୟସ୍ଥଳ ଅଟେ । ସମଗ୍ର ପୃଥିବୀରେ ଅନ୍ୟ ଆଶ୍ରୟସ୍ଥଳୀ ନାହିଁ । ତେଣୁ ଉତ୍କଳ ସମ୍ମିଳନୀର କାର୍ଯ୍ୟ ଆରମ୍ଭ ପୂର୍ବରୁ ପ୍ରଥମେ ସେହି ଭାରତବର୍ଷକୁ ପ୍ରଣାମ କରିବା ।

DRAFT

## अवधेयम्



### शब्दार्थाः :-

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| सर्वेषाम् | सकलानाम् | सबका | of all | ସମସ୍ତଙ୍କର |
| नो / नः | अस्माकम् | हमारा | our | ଆମ୍ଭମାନଙ୍କର |
| तनयगणैः | सन्तानगणः | पुत्रों के द्वारा | by the sons | ପୁତ୍ରମାନଙ୍କଦ୍ୱାରା |
| कल्पलता | कल्पलता | कल्पलता | wish-yielding | କଳ୍ପଲତା (ପୌରାଣିକ କାମପ୍ରଦାୟିନୀ) |
| शर्म | सुखम् | मंगल | happiness | ମଙ୍ଗଳ |
| सम्यक् | उचितम् | उचित | proper | ଉଚିତ / ଉତ୍ତମ |
| विधेयम् | करणीयम् | करना चाहिए | may be done | କରିବା ଉଚିତ |
| ध्रुवम् | ध्रुवगानम् | रटना | to be repeated after each verse | ଘୋଷା |
| हिमगिरि | हिमालय | हिमालय | Himalay | ହିମାଳୟ |
| सीमन्तित | सीमन्तरूपेण | सीमंत की तरह | acting asthe parting of hair | ସୀମନ୍ତପରି |
| अम्बुधि | सागर | सागर | sea/ocean | ସାଗର |
| परिगत | परिव्याप्त | घिरा हुआ | spread | ପରିବେଷ୍ଟିତ |
| जन्मदम् | जन्मदायकम् | जन्मदाता | progenitor/creator | ଜନ୍ମଦାତା |
| अन्नदम् | अन्नदायकम् | अन्नदाता | giver of food | ଅନ୍ନଦାତା |
| अनिशम् | अविरतम् | अविरत | continuous | ସର୍ବଦା |
| श्रौतपुरातनम् | श्रुतिसम्बद्धम् पुरातनम् | वैदिक कालसे परिचित है | old and related with veda | ବୈଦିକକାଳରୁ ପରିଚିତ ହେତୁ ପୁରୁଣା |
| आर्षम् | ऋषिसम्बद्धम् | श्रुतिसम्बद्धम् पुरातन | archaic | ଋଷିପରମ୍ପରାରେ ସମ୍ବନ୍ଧ |
| विजनितहर्षम् | हर्षस्य जनकम् | गरषिसम्बद्धम् | creation of bliss | ଆନନ୍ଦପ୍ରଦ |
| विश्वोत्कर्षनिदानम् | विश्वोत्कर्षस्य आधारः | हर्ष उत्पादक विश्वाकर्षक आधार | the all round development | ବିଶ୍ୱର ଉତ୍କର୍ଷର ଶ୍ରେଷ୍ଠକାରଣ |
| भारतशर्मणि | भारतस्य मङ्गलम् | भारत के कल्याण के लिए | for the benevolent of Bharat | ଭାରତର ମଙ୍ଗଳପାଇଁ |
| ऐक्यविधानम् | एकता संरचनम् | एकता विधान | | ଏକତାବିଧାନ |
| भारतपङ्कजदलम् | भारतरूपकस्य कमलस्य दलम् | भारत रूपी कमल की पखुड़ी | for creation of the country like the petals of the lotus | ଭାରତରୂପକ ପଦ୍ମର ପାଖୁଡ଼ା |

DRAFT

| शब्द | अर्थ | हिन्दी | English | ଓଡ଼ିଆ |
|---|---|---|---|---|
| विदितम् | तस्य निमित्तम समवेता: | प्रसिद्ध | for that assembled | ପ୍ରସିଦ୍ଧ |
| कृते | कृता | के लिए | arranged | ପାଇଁ |
| समेता: | | समवेत हुए | the conference | ସମବେତ |
| विहिता | अनुष्ठिता | सम्पर्क हुई | formed/started | ଅନୁଷ୍ଠିତ ହେଉଛି |
| उत्कलसंसत् | उत्कलसभा | उत्कलसभा / सम्मेलन | of Utkal | ଉତ୍କଳସଭା/ସମ୍ମିଳନୀ |
| अपरा | अन्या | भिन्न | different | ଅନ୍ୟ |
| भुवि | सर्वाग्रे | विश्व में | in the world | ପୃଥିବୀରେ |
| सर्वादौ | सभाकार्ये | सबसे पहले | at the outset | ସର୍ବପ୍ରଥମେ |
| परिषत्कर्मणि | प्रणामं कुर्म: | सभाकार्य में | in the meeting | ସମ୍ମିଳନୀ କାର୍ଯ୍ୟରେ |
| नमाम: | | प्रणामं करते हैं | bow down | ନମସ୍କାର କରୁଛୁ । |

## सन्धिविच्छेद:

नो जननी = न: + जननी

कल्पलतेयम् = कल्पलता + इयम्

तनयगणैस्तत् = तनयगणै: + तत्

मस्तकमिदमम्बुधि = मस्तकम् + इदम् + अम्बुधि

अस्मज्जन्मदमन्नदमनिशम् = अस्मत् + जन्मदम् + अन्नदम् + अनिशम्

पुरातनमार्षम् = पुरातनम् + आर्षम्

विश्वोतकर्ष = विश्व + उत्कर्ष

कृतमस्मोभिर्नवमिदमैक्यविधानम् = कृतम् + अस्माभि: + नवम् + इदम् + ऐक्यविद्यानम्

दलमिदमुत्कलमण्ड़लमिति = दलम् + इदम् + उत्कलमण्ड़लम् + इति

वयमत्र = वयम् + अत्र

समेता विहितात्रोत्कलसंसत् = समेता: + विहिता + अत्र + उत्कलसंसत्

भारतमेका = भारतम् + एका

गतिरस्माकम् = गति: + अस्माकम्

नापरास्ति = न + अपरा + अस्ति

सर्वादौ = सर्व + आदौ

भारतमेव = भारतम् + एव

DRAFT

## प्रश्नावली

१. एकपदेन उत्तरं लिखत -

(क) अस्माकं जननी का ?

(ख) भारतधरणी कीदृशी ?

(ग) तनयगणैः किं विधेयम् ?

(घ) अम्बुधिः इति पदस्य कः अर्थः ?

(ङ) किं भारतपङ्कजदलम् ?

(च) परिषत्कर्मणि सर्वादौ वयं किं नमामः ?

२. शून्यस्थानानि पूरयत-

(क) सर्वेषां ——— जननी ।

(ख) ——- शर्म विधेयम् ।

(ग) विजनितहर्षं ——– ।

(घ) ——— कृते वयमत्र समेताः ।

(ङ) नापरास्ति भुवि ——– ।

(च) ——— भारतमेव नमामः ।

(भारतवर्षम्, तस्य, नाम, तत्, सम्यक्, नो)

३. मातृभाषया अनुवादं कुरुत-

(क) सम्यक् शर्म विधेयम् ।

DRAFT

(ख) तस्य कृते वयमत्र समेताः ।

(ग) भारतमेका गतिरस्माकम् ।

(घ) नापरास्ति गतिरस्माकम् ।

(ङ) विहितात्रोत्कलसंसत् ।

(च) विश्वोत्कर्षनिदानम् ।

## ४. स्तम्भमेलनं कुरुत -

| 'क'स्तम्भः | 'ख'स्तम्भः |
| --- | --- |
| जननी | गतिः |
| शर्म | कर्मणि |
| उत्कलमण्ड़लम् | एव |
| एका | विधेयम् |
| परिषत् | भारतधरणी |
| भारतम् | विदितम् |

DRAFT

## ५. संस्कृतेन वाक्यरचनां कुरुत -

(क) सम्यक् (ख) कृते (ग) अत्र (घ) एव

(ङ) नाम (च) अनिशम्

## ६. शुद्धम् उत्तरं चिनुत :-

(क) कः ''भारतगीतिकाम्'' अरचयत् ?

(१) राधानाथः (२) गोपबन्धुः (३) लक्ष्मीकान्तः (४) गङ्गाधरः

(ख) का अस्माकं जननी ?

(१) पृथिवी (२) नदी (३) गोमाता (४) भारतधरणी

(ग) कः भारतवर्षस्य सीमन्तः ?

(क) विन्ध्यः (२) कैलासः (३) हिमालयः (४) महेन्द्रः

(घ) कदा भारतमेव नमामः ?

(१) पृष्ठतः (२) अग्रतः (३) ऊर्ध्वदेशे (४) सर्वादौ

(ङ) भारतं किमिव भवति ?

(१) पङ्कजम् (२) मन्दारम् (३) पाटलम् (४) मल्लिका

(च) 'अन्नदम्' इत्यस्य कः अर्थः ?

(१) अन्नदानम् (२) अन्नदायकम् (३) खाद्यम् (४) कृषकः

७. **सन्धिविच्छेदं कुरुत -**

(क) कल्पलतेयम् (ख) तनयगणैस्तत्

(ग) पुरातनमार्षम् (घ) गतिरस्माकम्

(ङ) भारतमेव (च) वयमत्र

८. **पूर्णवाक्येन उत्तरं लिखत -**

(क) सर्वेषां नो का जननी ?

(ख) भारतस्य मस्तकं कीदृशं शोभते ?

(ग) भारतशर्मणि अस्माभिः किं कृतम् ?

(घ) उत्कलमण्ड़लं केन भावेन विदितम् ?

(ङ) परिषत्कर्मणि सर्वादौ वयं किं कुर्मः ?

(च) भारतस्य पार्श्वं कैः परिगतम् ?

९. **प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत-**

कविः केन रूपेण भारतवर्षस्य महिमानं वर्णयति ?

DRAFT



## वयं जानीमः गायामः च

# अतिरिक्त पठनम्

# मम माता देवता

- श्री ल. म. चक्रदेवः

मम माता देवता ।
मम माता देवता ।।
अतिसरला, मयि मृदुला
गृहकुशला, सा अतुला ॥ मम माता ॥
पाययति दुग्धं, भोजयति भक्तं
लालयति नित्यं, तोषयति चित्तम् ॥ मम माता ॥
सायङ्काले नीराजयति
पाठयति च मां शुभङ्करोति
।। (श्लोक) ।।
शुभं कुरु त्वं कल्याणम्
आरोग्यं धनसम्पदः ।
दुष्टबुद्धिविनाशाय
दीपज्योतिर्नमोऽस्तु ते ।।
पाठयति च मां शुभङ्करोति ।। ॥ मम माता ॥
रात्रौ अङ्के मां स्वापयति
मधु मधु मधुरं गीतं गायति
आ आ आ आ आऽऽ ॥ मम माता ॥

DRAFT

# अतिरिक्त पठनम्

## लोकहितं मम करणीयम्

- डा. श्रीधर भास्कर वर्णेकर

(हिन्दोलरागः) आदितालः

मनसा सततं स्मरणीयम्
वचसा सततं वदनीयम्
लोकहितं मम करणीयम् ।। ॥ लोकहितं ॥

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम् ।
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम् ।। ॥ मनसा ॥

न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम् ।
कार्यक्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम् ।। ॥ मनसा ॥

दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम् ।
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम् ।। ॥ मनसा ॥

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे ।
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम् ॥ मनसा ॥

DRAFT

# राष्ट्रवन्दनम्

-डॉ. विश्वास:

यत्र प्रवहति विमला गङ्गा
यत्र पवित्रं वेदश्रवणम्,
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

यत्र बालगङ्गाधरतिलक:
स्वराज्यशपथं घोषितवान् ।
यत्राहिंसां गान्धिमहात्मा
स्वतन्त्रतासाधनमकरोत् ।।

यत्र रवीन्द्रो मधुरं गानं
राष्ट्रसमुत्तेजकमतनोत् ।
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

यत्र समस्तं मतं समानं
मनुजा: सर्वे सहोदरा: ।
यत्र विचारविहङ्गोत्पतने
न भवति काऽपि परिसीमा ।

यत्र च धर्मे न्याये च जन:
सुपथे संततं प्रवर्तते ।
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

DRAFT

# आदर्श-प्रश्नपत्रम्

## ଅଙ୍କ ବିଭାଜନ

| | | | |
|---|---|---|---|
| ଗଦ୍ୟରୁ | • ସଂସ୍କୃତରେ ଏକପଦରେ ଉତ୍ତରମୂଳକ ପ୍ରଶ୍ନ | ୧×୫ | ୦୫ |
| | • ସଂସ୍କୃତରେ ପୂର୍ଣ୍ଣବାକ୍ୟରେ ଉତ୍ତରମୂଳକ ପ୍ରଶ୍ନ | ୨×୫ | ୧୦ |
| | • ମାତୃଭାଷାରେ ଅନୁବାଦ | ୨×୫ | ୧୦ |
| | • ନିଜ ଭାଷାରେ ଦୀର୍ଘ ଉତ୍ତରମୂଳକ ପ୍ରଶ୍ନ | ୧୦×୧ | ୧୦ |
| ପଦ୍ୟରୁ | • ସଂସ୍କୃତରେ ଏକପଦରେ ଉତ୍ତରମୂଳକ ପ୍ରଶ୍ନ | ୧×୫ | ୦୫ |
| | • ସଂସ୍କୃତରେ ପୂର୍ଣ୍ଣବାକ୍ୟରେ ଉତ୍ତରମୂଳକ ପ୍ରଶ୍ନ | ୨×୫ | ୧୦ |
| | • ନିଜ ଭାଷାରେ ଦୀର୍ଘ ଉତ୍ତରମୂଳକ ପ୍ରଶ୍ନ | ୧୦×୧ | ୧୦ |
| ଗଦ୍ୟ ଓ ପଦ୍ୟରୁ | • ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ | ୧×୫ | ୦୫ |
| | • ସ୍ତମ୍ଭ ମିଳନ | ୧×୫ | ୦୫ |
| | • ସନ୍ଧି | ୨×୫ | ୧୦ |
| | • ସଂସ୍କୃତରେ ବାକ୍ୟ ଗଠନ | ୨×୫ | ୧୦ |
| | • ଶୁଦ୍ଧ ଉତ୍ତର ଚୟନ | ୨×୫ | ୧୦ |
| | | | **୧୦୦** |

DRAFT

# आदर्श-प्रश्नपत्रम्

## (अर्द्धवार्षिकी परीक्षा)

### अष्टमश्रेणी

### विषयः – संस्कृतम्

**समयः – घण्टाद्वयम्** **पूर्णाङ्काः– १००**

१. संस्कृतभाषया एकेन पदेन उत्तरं लिखत । [1×5=5

(क) कः योगसिधिः कविः ?

(ख) कीदृशजलेन स्नानं कर्त्तव्यम् ?

(ग) बाङ्कीनरपतेः नाम किम् आसीत् ?

(घ) यः क्रियावान् सः कः ?

(ङ) समाजदिनपत्रिकायाः कः प्रतिष्ठाता ?

२. संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत । [2×5=10

(क) देवीदयालः गौतमबुद्धाय किं न्यवेदयत् ?

(ख) के षट् ऋतवः भवन्ति ?

(ग) गोपबन्धोः कृते उत्कलमणिः इति उपाधिः किमर्थं प्रदत्तः ?

(घ) राज्ञी शीघ्रं कम् आहूतवती ?

(ङ) गोपबन्धुः कुत्र जन्म लब्धवान् ?

३. मातृभाषया अनुवादं कुरुत– [2×5=10

(क) एषः निश्चयेन कश्चन देवविशेषः अस्ति ।

(ख) सः बुभुक्षया आकुलः आसीत् ।

(ग) ते सर्वे अतिदुःखेन जीवन्ति ।

(घ) मम एकं वचनं शृण्वन्तु ।

(ङ) अन्याययुद्धेन त्वं मम पतिं निहतवान् ।

(च) स्वदेशभूमौ लीयतां तनुः ।

**४. प्रायेण पञ्चाशता (५०) पदैः मातृभाषया उत्तरं लिखत ।** [10×1=10

वाग्भटस्य मतेन कः अरुक् भवति ?

**अथवा**

राज्याः शुकदेव्याः वीरत्वं वर्णयत ।

**५. संस्कृतभाषया एकेन पदेन उत्तरं लिखत ।** [1×5=5

(क) श्रद्धावान् किं लभते ?

(ख) लक्ष्यसिद्धिः कीदृशी भवतु ?

(ग) कः मनुष्यान् उपदिशति ?

(घ) अर्जुनाय गीतां कः उपदिष्टवान् ?

(ङ) सम्मोहात् किं भवति ?

**६. संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत । (पञ्चानाम्)** [2×5=10

(क) सर्वेषां मनः कीदृशं भवेत् ?

(ख) कीदृशं वाक्यं वाङ्मयं तपः उच्यते ?

(ग) सङ्गच्छध्वम् इत्यस्य कः अर्थः ?

(घ) जनः कथं विनाशं प्राप्नोति ?

(ङ) सर्वे किं परित्यज्य ऐक्यभावेन जीवेयुः ?

(च) जनः किं लब्ध्वा उत्तमां शान्तिं प्राप्नोति ?

**७. निजभाषया प्रायेण पञ्चाशता (५०) पदैः उत्तरं लिखत ।** [10

कः स्थितधीः उच्यते ?

**अथवा**

ऋषिः केषां समानत्वम् इच्छति ?

DRAFT

**८. कोष्ठकात् उपयुक्तपदं चित्वा शून्यस्थानानि पूरयत ।** [1×5=5

(क) महर्षेः .............. नाम भवन्तः श्रुतवन्तः स्युः ।

(ख) समानं ................. सहचित्तमेषाम् ।

(ग) वयं .......... करिष्यामः ।

(घ) तद्विद्धि .......... परिप्रश्नेन सेवया ।

(ङ) तस्य ............... अनेके शिष्याः आसन् ।

(आश्रमे, प्रणिपातेन, चरकस्य, मनः, युद्धम्)

**९. स्तम्भमेलनं कुरुत–** [1×5=5

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| दिव्यसन्तोषम् | धन्वन्तरिः |
| आकृतिः | नष्टानि |
| शुकः | अनुभूय |
| वासगृहाणि | इन्द्रियसंयमी |
| संयतेन्द्रियः | सङ्कल्पः |

DRAFT

**१०. सन्धिं / सन्धिविच्छेदं कुरुत । (पञ्चानाम्)** [2×5=10

(क) एतदेव =

(ख) तथैव =

(ग) वाङ्मयम् =

(घ) प्रातः + उत्थाय =

(ङ) परः + परम् =

(च) विश्व + इतिहासे =

**११. संस्कृतभाषया वाक्यानि रचयत–(पञ्चानाम्)** [2×5=10

(क) अतीव (ख) भवेत्

(ग) असौ (घ) चिन्तितवान्

(ङ) च (च) कदाचित्

१२. शुद्धम् उत्तरं चिनुत – [2×5=10

(क) नित्यं किं कर्त्तव्यम् ?

(i) शयनम् (ii) दन्तविशोधनम्

(iii) रोदनम् (iv) धावनम्

(ख) लक्ष्मीपुराणस्य क: रचयिता ?

(i) जगन्नाथदास: (ii) बलरामदास:

(iii) शिशुअनन्त: (iv) अच्युतानन्द:

(ग) कति वेदा: ?

(i) त्रय: (ii) चत्वार:

(iii) पञ्च (iv) षट्

(घ) संज्ञानसूक्तं कस्मिन् वेदे अस्ति ?

(i) ऋग्वेदे (ii) यजुर्वेदे

(iii) सामवेदे (iv) अथर्ववेदे

(ङ) 'धर्मपद' इति पुस्तकं क: रचितवान् ?

(i) गोपबन्धु: (ii) नीलकण्ठ:

(iii) गोदावरीश: (iv) कृपासिन्धु:

(च) गौतमबुद्ध: कदा आगन्तुम् अकथयत् ?

(i) प्रभाते (ii) सायम्

(iii) मध्याह्ने (iv) रात्रौ

❖❖❖



DRAFT

# आदर्शप्रश्नपत्रम्

## (वार्षिकपरीक्षा)

### अष्टम - श्रेणी

### विषयः – संस्कृतम्

**समयः – घण्टाद्वयम्** **पूर्णाङ्काः– 100**

**१. संस्कृतभाषया एकेन पदेन उत्तरं लिखत ।** [1×5=5

(क) कः ज्वरपीडितः आसीत् ?

(ख) मित्रद्वयं कुत्र आलपति ?

(ग) प्रबला ज्वला कुत्र भवति ?

(घ) के वाणिज्यं कर्त्तुं भारतम् आगतवन्तः ?

(ङ) मेषसंक्रान्त्याः नामान्तरं किम् ?

**२. संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत ।** [2×5=10

(क) उदरे किं क्रीड़ति ?

(ख) मुकुन्ददेवस्य मन्त्री कः आसीत् ?

(ग) कीदृशं पुत्रं विहाय गोपबन्धुः समाजसेवाम् अकरोत् ?

(घ) भगवान् श्रीकृष्णः कुत्र ''कालः कलयतामहम्'' इति उक्तवान् ?

(ङ) 'भ'- षट्कं किम् ?

(च) ब्रह्मा कस्मिन् मासे जगत् ससर्ज ?

**३. मातृभाषया अनुवादं कुरुत–** [2×5=10

(क) स्वयम् अहं खड्गचालनं करिष्यामि ।

(ख) चल चल शीघ्रं चल ।

(ग) साधुः हसित्वा अवदत् ।

(घ) तव कृते नववर्षशुभेच्छां ज्ञापयामि ।

(ङ) भारतवर्षम् अस्माकं देश: ।

(च) भारतमेका गतिरस्माकम् ।

४. **निजभाषया प्रायेण पञ्चाशता (५०) पदै: उत्तरं लिखत ।** [10×1=10

शिक्षाक्षेत्रे कृषिक्षेत्रे वाणिज्ये च डिजिटल् इत्यस्य उपयोग: केन प्रकारेण भवति ?

**अथवा**

मित्रद्वयं केन रूपेण कुष्माण्डं प्रतारितवत् ?

५. **संस्कृतभाषया एकेन पदेन उत्तरं लिखत ।** [1×5=5

(क) गीतानि के गायन्ति ?

(ख) केन विना दैवं न सिद्ध्यति ?

(ग) अम्बुधि: इति पदस्य क: अर्थ: ?

(घ) केन समं सख्यं न करणीयम् ?

(ङ) क: वसन्तस्य गुणं वेत्ति ?

६. **संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत । (पञ्चानाम्)** [2×5=10

(क) सर्वेषां नो का जननी ?

(ख) सत्पुरुषा: कीदृशा: भवन्ति ?

(ग) उत्कलमण्डलं केन भावेन विदितम् ?

(घ) का उत्तमा सभा कथ्यते ?

(ङ) सङ्गच्छध्वम् इति पाठे का प्रेरणा अस्ति ?

(च) भारतस्य पार्श्वे कै: परिगतम् ?

७. **निजभाषया प्रायेण पञ्चाशता (५०) पदै: उत्तरं लिखत ।** [10

क: भगवत: प्रियजन: भवति ?

**अथवा**

कवि: केनरूपेण भारतवर्षस्य महिमानं वर्णयति ?

DRAFT

८. **कोष्ठकात् उपयुक्तपदं चित्वा शून्यस्थानानि पूरयत ।** [1×5=5

(क) ............ अनुसारं भोक्तव्यम् ।

(ख) अहं ............. प्रति गच्छामि ।

(ग) एवं पुरुषाकारेण विना दैवं न ............... ।

(घ) धनम् अस्माकं देशाय ................. ।

(ङ) नवीनवर्षं विननोतु ..................... ।

(नगरम्, सिद्ध्यति, ऋतोः, हर्षम्, उपयुज्यताम्)

९. **स्तम्भमेलनं कुरुत–** [1×5=5

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| शीघ्रम् | पशवः |
| गुणी गुणं वेत्ति | शुभमस्तु |
| गृहपालिताः | आनय |
| अलं | सज्जनः एव गुणानां मर्मज्ञः |
| नववर्षम् | चिन्तया |

१०. **सन्धिं / सन्धिविच्छेदं कुरुत । (पञ्चानाम्)** [2×5=10

(क) किमपि =

(ख) निशार्द्धे =

(ग) अतीव =

(घ) किम् + चित् =

(ङ) कः + चन =

(च) सत्यम् + एव =

DRAFT

११. संस्कृतभाषया वाक्यानि रचयत–(पञ्चानाम्) [2×5=10

(क) याहि (ख) आनय

(ग) वयम् (घ) पठति

(ङ) नाम्ना (च) कृते

१२. शुद्धम् उत्तरं चितुन – [2×5=10

(क) विषुवसंक्रान्तौ कस्य वितरणं भवति ?

(i) धनस्य (ii) धान्यस्य

(iii) प्रपानकस्य (iv) नारिकेलस्य

(ख) भारतगीतिका केन रचिता ?

(i) गोपबन्धुना (ii) राधानाथेन

(iii) गङ्गाधरेण (iv) लक्ष्मीकान्तेन

(ग) कः क्रन्दन् प्रस्थितः ?

(i) स्वामी (ii) कुष्माण्डः

(iii) धनपतिः (iv) विद्यापतिः

(घ) ऋषिः केन जुहोति ?

(i) हविषा (ii) पयसा

(iii) वचसा (iv) मनसा

(ङ) ''गायन्ति देवाः किल गीतकानि'' इत्यस्य श्लोकस्य मुख्यविषयः कः ?

(i) वसन्तस्य सौन्दर्यम् (ii) कर्मणां फलम्

(iii) दानस्य प्रभावः (iv) भारतभूमेः गौरवम्

(च) आङ्गलजनाः राजगुरुं कुत्र नीतवन्तः ?

(i) पुरीम् (ii) खोर्द्धाम्

(iii) कटकम् (iv) बालेश्वरम्

❖❖❖

# भाति मे भारतम्

**पद्मश्री. रमाकान्त शुक्ल:**

भाति मे भारतम् भाति मे भारतम्
भूतले भाति मेऽनारतं भारतम् ।।ध्रुवकम् ।
विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्धैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद्
भूतले भाति मेऽनारतं भारतम् ।।१ ।।
वेशभूषाशनोपासनापद्धति-
क्रीडनामोद-संस्कार-वृत्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति तन्मामकं भारतम् ।।२ ।।
दर्शनज्ञानचारित्र्यसम्मेलनं
यत्र मोक्षस्य मार्गं भणन्त्यागमा: ।
ज्ञानमास्ते च भार: क्रियां वै विना
भूतले भाति तन्मामकं भारतम् ।।३ ।।
जाह्नवी-चन्द्रभागा-जलै:पावितं
भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुङ्गभद्रा-विपाशादिभिर्भावितं
भूतले भाति मेऽनारतं भारतम् ।।४ ।।

DRAFT



# वन्दे उत्कलजननि !

मूलरचयिता - कान्तकविःलक्ष्मीकान्त महापात्रः

वन्दे उत्कलजननि !
चारुहासमयि !चारुभाषमयि !
जननि ! जननि ! जननि ! (ध्रुवपदमिदम्)

पूत-पयोधि-विधौत-शरीरे !
ताल-तमाल-सुशोभित-तीरे !
शुभ्र-तटिनीकूल-शीकर समीरे ।।
जननि ! जननि ! जननि ! ।।

घनघनवनभूमिराजिनिजाङ्गे !
नीलभूधरमालासज्जतरङ्गे !
कलकलमुखरितचारुविहङ्गे !
जननि ! जननि ! जननि ! ।।

सुन्दरशालि-सुशोभित क्षेत्रे !
ज्ञानविज्ञान-प्रदर्शित-नेत्रे !
योगिमुनिगण कुटिर पवित्रे !
जननि ! जननि ! जननि !

सुन्दर-मन्दिर मण्डितदेशे !
चारुकलावलीशोभितवेशे !
पुण्यतीर्थचय-पूर्ण प्रदेशे !
जननि ! जननि ! जननि !

उत्कल-शूरवर-दर्पित-गेहे !
अरिकुल-शोणित-चर्च्चित देहे !
विश्व-भूमण्डलकृतवर स्नेहे !
जननि ! जननि ! जननि !

कविकुलमौलिसुनन्दनवन्दये !
भुवनविघोषित कीर्त्यऽनिन्द्यो !
धन्ये पुण्ये नित्यशरण्ये !

जननि !जननि !जननि !

DRAFT



ଶିକ୍ଷକ ଶିକ୍ଷା ନିର୍ଦ୍ଦେଶାଳୟ ଏବଂ ରାଜ୍ୟ ଶିକ୍ଷା ଗବେଷଣା ଓ
ପ୍ରଶିକ୍ଷଣ ପରିଷଦ, ଓଡ଼ିଶା, ଭୁବନେଶ୍ୱର

ମୁଦ୍ରଣ : ପାଠ୍ୟପୁସ୍ତକ ଉତ୍ପାଦନ ଓ ବିକ୍ରୟ, ଭୁବନେଶ୍ୱର-୧